नं० ४७८८ - घ

शान्तिरत्नम्,

पत्राणि २३५

नं० ४७७८-घ

शान्तिरत्नम्

शान्तिरत्नम्

नं० ४७७८-घ

पत्राणि २३५

४६६८

शांतिरत्नपत्रे रहस्य वस्ता १२

शां॰ति
क॰म॰
१

ॐ श्रीगणेशाय नमः ॐ नारायणात्मजश्रीमद्रामकृष्णास्यसूनुना कमलाकरसंज्ञेन प्रोच्यन्ते शां-
तयः क्रमात् १ तत्र एवं विनायकं पूज्य ग्रहांश्चैव विधानतः कर्मणां फलमाप्नोति श्रियं चाप्नोत्यनुत्त-
मं २ इति याज्ञवल्क्येन सर्वकर्मांगत्वोक्तेर्विनायकशांतिरुच्यते तत्राधिकारिणमाह याज्ञवा-
ल्क्यः विनायकः कर्मविघ्नसिद्ध्यर्थं विनियोजितः गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा ३ तेनो-
पसृष्टो यस्तस्य लक्षणानि निबोधत स्वप्नेऽवगाहतेऽत्यर्थं जलं मुंडांश्च पश्यति ४ काषायवाससश्चैव
क्रव्यादांश्चाधिरोहति अंत्यजैर्गर्दभैरुष्ट्रैः सहैकत्रावतिष्ठते ५ व्रजन्नपि तथात्मानं मन्यतेऽनुगतं
परैः भविष्यापि तैलार्द्रगात्रं विधुरं करवीरविभूषितं ६ एवं स्वप्नानुक्त्वा प्रत्यक्षदर्शनान्याह याज्ञ-
वल्क्यः विमना विफलारंभः संसीदत्यनिमित्ततः तेनोपसृष्टो लभते न राज्यं राजनंदनः ७ कुमा-
री न च भर्तारमपत्यं गर्भमंगना अंगना गर्भं न लभते गर्भिणी चापत्यं न लभते न जीवंतीत्यर्थः आ-
चार्यत्वं श्रोत्रियश्च न शिष्योऽध्ययनं तथा ८ वणिक् लाभं न चाप्नोति कृषिं चापि कृषीवलः स्नपनं
तस्य कर्तव्यं पुण्येऽह्नि विधिपूर्वकं ९ तस्योपसृष्टस्य तेनोपसृष्ट एवाधिकारी सर्वशूद्रोपीति तस्या-
प्यधिकारः ब्राह्मणैः क्षत्रियैर्वैश्यैः कर्मनिर्विघ्नसिद्ध्यर्थं संपूज्यस्तु गजाननः इति शौनकोक्तेः अत्र १

एवमहार्णवे यजमानस्तु शूद्रश्चेद् द्विजैस्तां वियोजयेत् इत्युक्तं एवं स्त्रीणामप्यधिकारः अतएवा
हृहन्यराशारेणातेनोपहतपुंस्त्वान्न कर्मस्यात्रिः फलंकं न स्त्रीणामपि तथा सर्वे क्रियमाणं न निःफल
मित्युपलक्षितं स्त्रीणामधिकारार्थमुक्तं अत्रापि कुमारी न च भर्त्तारमित्यादिः अत्र गणेश्रीमुक्तेऽपि
हस्तगृध्यादुपुक्तोमम वैष्यावाम्यनमेषुभी नक्षत्रे च मुहूर्त्ते च मे चैवान्नलदेवनः इति विलुप्तमो वि
नायकं यानेनाविशिष्यात्कानि नक्षत्राणि शुक्लपक्षे च तत्पूर्णा वा वारेणापि षष्ठास्य च निष्प्य च वीर
नक्षत्रे तस्यैव पुरतो नृप इति भविष्यपुराणोक्तायोगविशेषाश्रुद्धेया विवाहादिकर्मोग
मुपसर्गनाशार्थं च यच्च कश्चिद्देवनक्षत्रे कृत्तिकादिविशाखान्ते यस्तु एवं नक्षत्रमिति श्रुतं स्तु तेऽका
र्यं पुण्याह एव कृतेः इत्युक्तेः हृहन्यराशारोपि च तत्पूर्णा शुक्लपक्षेत्रायने चान्तरे तथा पुण्यार्थं
सर्वसिद्ध्यर्थं कुर्याच्छान्तिं विनायकीं हृष्टभावच्छन्दोदसः याज्ञवल्क्यः गौरसर्षपकल्केन साज्ये
नोत्सादितस्य च सर्वौषधैः सर्वगन्धैर्विलिप्तशिरसस्तथा भद्रासनोपविष्टस्य स्वस्ति वाच्या द्वि
जाः शुभाः उत्सादितस्य उद्वर्त्तितस्य सर्वौषधयो लिखा मुरामांसी वचा कुष्ठशैलेयं रजनीद्वयं स
टीचंपकमुस्ता च सर्वौषधिगणः स्मृतः इति छंदोगपरिशिष्टोक्तानि चत्वारि स्नानानि तत्रैव स्मृतेः

मुरामहामांस्यंगमोहरी इति प्रसिद्धा शैलेयं शिलाजं सर्वगंधा उक्ताः हैमाद्रौ मदनरत्ने च गारुडे
कर्पूरं चंदनं दर्पः कुंकुमं च समांशकं सर्वगंधमिति प्रोक्तं समस्तसुरवल्लभं इति मदनरत्ने तु चंद
नं कुंकुमागुरुकर्पूरकस्तूरिकाजातीफलानि सर्वगंधा उक्ताः तत्र मूलचिंत्यं अश्वस्थानाद्गजस्थाना
द्वल्मीकात्संगमाद्ध्रदात् मृत्तिका रोचनं गंधान् गुग्गुलं चाप्सु निक्षिपेत् आहृतान्येकवर्णैश्च चतु
र्भिः कलशैर्ह्रदात् गंधान् सर्वगंधान् अत्र विशेषमाह पाराशरे वैजवापः चतुः प्रस्रवणेभ्यश्च तु रः
कुंभानाहृत्य तेषु सर्वौषधीः सर्वगंधान् हिरण्यव्रीहियवौ गुग्गुलं मदमारहृत्करमिति क्षिपेदि
ति शेषः किंच चर्मण्यानडुहे रक्ते स्थाप्य भद्रासनं ततः इदं च पूर्वं स्थाप्य भद्रासनं ततः इदं च पूर्वे
विनियोगोक्तेः तत्रैकहस्ताद्विहस्ता वा चतुरंगुलोच्छ्रा वेदी कार्येति केचित् तच्चिंत्यं वेद्यां मानाभावा
त् करणे पि हस्तोच्छ्रायुक्ता यत्र होमोत्तरमभिषेकः स्नानोत्तरतः पूर्वतो वा कार्यः अत्र त्वभिषेकोत्तरं हो
मः अतः पूर्वतो होमः पश्चाच्च भद्रासनं कार्यं प्राच्युदक्प्रधानि कर्माणि इति कात्यायनोक्तेः तेनोत्तर
तः स्नानपीठं तद्दक्षिणे होमश्च मूरवाणां क्षेपः दक्षिणे स्थापनेः अत्र मध्ये स्वस्तिकं कृत्वा तत्र रक्त
मानडुहं चर्म प्राचीनग्रीवमुत्तरलोमास्तीर्य तत्र श्रीपर्णीपीठं तदुपरि श्वेतवस्त्रमिति भद्रासनं कृत्वा २

तस्यपूर्वादिचतुर्दिक्षुचतुरःकलशान्संस्थाप्यतेषुवरुणंसंपूज्यैशान्यांवेद्यांपीठेवारक्तवस्त्रेप्रतिमायां
गणेशंशांविकेतद्वामेगायत्रीश्यामामावाहयेत् अपरार्कंभविष्यत्वंयाश्रपिदेवताउक्ताः व्योमकेशान्तसंपूज्यपार्व
तीभीमजंतथा कृष्णास्यपितरंतातश्चकमांवसितंतथा पिप्पलाङ्कदपुत्रंचकोणंलक्ष्मचभारत विधुंतु
दंवाफलेयंतंदकस्यधारिणं व्योमकेशःशिवःभीमजोगणपः श्रुत्वाभौमःसितःशुक्रःपिप्पलोगुरुः
कोदण्डोबुधःकोणःशनिःलक्ष्मचेन्दुः वाफलेयःस्कन्दःनंदकधारीविष्णुः सहस्रांशुशतधारमरीचिभिः
पावनेकृंत तेनत्वामभिषिंचामिपावमान्यःपुनंतुते भगंतेवरुणोराजाभगंसूर्योबृहस्पतिः भगमि
न्द्रश्चवायुश्चभगंसप्तर्षयोददुः यत्तेकेशेषुदौर्भाग्यंसीमंतेयच्चमूर्धनि ललाटेकर्णयोरक्ष्णोरापस्त
त्घ्नन्तुसर्वदा एकैकोमंत्रः कुंभत्रये त्रिभिस्त्वतुर्थकुंभः सर्वैर्मंत्रैश्चतुर्थमिति बोलेटचनादितिविस्ता
नेश्वरः त्रिभिरेकैकःकुंभस्तुपरार्कः स्नातस्यसार्षपतैलंसर्ववर्णोद्वर्तनंज्ञफयान्त्यनिकुशाग्रंच
नपरिगृह्यच सितपुष्पंसमितश्चवतथाहृगलकंटकटौ कृष्णांगेराजपुत्रश्चैतंयंतेस्त्वाहासममन्वितेः ता
मभिर्वलिमंत्रैश्चनमस्कारसमन्वितैः यजमानमस्तकेमितानादिनामभिस्तैलंऋत्वातेश्चवरुवस्त्रो
ऋत्वातत्छेषणेद्रादिदशदिक् पालेभ्योनामभिर्बलिंदद्यादितिविस्तानेश्वरमहार्णवे पूर्वोक्तनाम

श्रा॰क॰
२
3

भिस्तैलेभ्यन्वानैरेवकृतादिवलिदानं नतचरुहोमं मानाभावात् इत्यपरार्कः बृहत्परशरोपि नामभि
श्च वलिं दद्यान्नमस्कारसमन्वितैरित्यादिनामभिर्वलिमाह दध्याज्यतण्डुलैः शूर्पे कुशानास्तीर्य सर्वतः
कृताकृतांस्तण्डुलांश्च पललौदनमेवच मत्स्यान्पक्वांस्तथैवामान्मांसमेतावदेवतु कृतान्नंकृताश्च वहना
श्रनवहनाश्च पललंतिलपिष्टं मांसमित्यन्ये तन्मिश्रश्चौदनः एतावत्पक्वमामं च पुष्पंचित्रंस्रगंधंचस्तुरां
चत्रिविधामपि त्रिविधागौऽजमाक्षीपैष्टीच एतच्छ्रद्धपरं त्वायत्रिवेश्यानां पैष्टी विप्रेणतु सर्वापिवर्ज्या
तिमहार्णवः तत्र मानाभावात् चतुर्वर्णाधिकाराच्च नच सुरासमेधोमधंचकलौ वर्ज्या द्विजातिभिरिति
निषेधः तस्य सौत्रामण्यामपि सुराग्रहणस्यच संग्रह इत्यनेनोपसंहारात् हेमाद्रिस्तु निषेधस्यानिवृ
तिमात्रार्थत्वेनविशेषानवेक्षणान्नोपसंहारः विशेषनिषेधस्तु दोषाधिक्यार्थ इत्याह अतस्तदभाव
शूद्रैर्द्विजैश्चपयोग्राह्यं सौत्रामण्यां पयोग्रहा वा सुरेति श्रापस्तंवेन विकल्पाभिधानात् तत्रसैंधव
मि श्रमितिमहार्णवादयः पिष्टाः मूलकंपूरिकापूपास्तथैवांडेरकः स्रजः दध्यन्नं पायसं चैव गु
डपिष्टंसमोदकं मूलकं प्रसिद्धमितिमहार्णवः तदाकारः पिष्टविकार इतिमदनरत्नविज्ञानेश्व २
रौ अपूपः स्नेहपक्वो गोधूमविकारः उंडेरकस्रजः स्वद्रापूपा इत्यपरार्कः वर्त्तुलेश्चतुरस्रैश्चदी

र्वैः पिष्टविकारकैः निर्मिताः स्वजउच्यंतेऽडडेरेकसमारब्धयेति महार्णवे मदनरत्ने च गुडमिश्रंपि
ष्टमित्यर्थः मोदकाः पैष्टाश्चापूपाः अर्काः लड्डुकाश्चेति मदनरत्ने बृहत्पराशरेण कुल्माषाः फलानि वा
पिकान्युक्तानि बलिमंत्राः प्रयोगे वक्ष्यंते एतान्सर्वानुपाहृत्य भूमौ कृत्वा ततः शिरः शूर्पे निधाय
निवेद्येत्यर्थः विनायकस्य जननीमुपतिष्ठेत ततोंविकां दूर्वासर्षपपुष्पाणां दत्त्वार्घ्यं पूर्णमंजलिं
दूर्वादिपूर्णमंजलिं सजलं विनायकायांविकायै चार्घ्यं दत्वोपतिष्ठेतेत्यर्थः रूपं देहि यशो देहि
भगं भगवति देहि मे पुत्रान्देहि धनं देहि सर्वकामांश्च देहि मे विनायकोपस्थाने भगवति सूक्ष्मः
इति विज्ञानेश्वरः तत्र समानविधानत्वात्प्रकृतिविकारभावे कथं स्यादिति चिंत्यं अतएवं विना
यकेरस्युक्ते ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः ब्राह्मणान्भोजयेद्दद्याद्वस्त्रयुग्मं गुरोरपि
एवं विनायकं पूज्य ग्रहांश्चैव विधानतः कर्मणां फलमाप्नोति श्रियं चाप्नोत्यनुत्तमामिति एजमा
नाभिषेकवस्त्रं चाचार्याय दद्यात् आत्मनो वा सभ्याचार्याय ददातीति मदनरत्ने वैजवापोक्तेः
अथ बौधायनसूत्रे विशेषः अथातो विनायककल्पं व्याख्यास्यामो मासि मासि चतुर्थ्यां शुक्लप
क्षस्य पंचम्यां वाऽभ्युदयादौ सिद्धिकामः ऋद्धिकामः पशुकामो वा विनायकस्य बलिं हरेत् पूर्वेद्युः

यां॰ क
४
4

कृत्वैकभक्तोपश्राचम्यदेवयजनोल्लेखनाद्यग्निमत्वोन्मुक्त्वादक्षिणामुखंहस्तिमुखंदेवतमावाहयति
विघ्नविघ्नेश्वरागच्छविघ्नेत्येवनमस्कृत्य आविश्वायभवास्माकंसदास्माकंभवोऽद्यवेत्यथहर्वाद्दत्वानास्त्रम
नोमिश्रमर्घ्यंददातीमाज्ञापःशिवतमाःपूताःपूततमामेध्यामेध्यतमाश्चमृतनाश्चमृततमाःपाद्याश्चर्च्या
श्चार्हणीयाश्चाभिषेचनीयामार्जनीयाश्चप्रतिगृह्यतां॰ भगवान्विनायकोपीत्यथतुसीगंधपुष्पधूपदी
पैरभ्यर्च्योपतिष्ठते नमोभूपतयेनमोभवनपतयेनमोभूतानांपतयेनमइत्यथतिस्वस्तिस्वोविनाय
कानीजिह्वोति विनायकायभूपतयेनमोविनायकायस्वाहा एवंविनायभुवनपतयेनमोविना॰
यस्वाहा विना॰ भूतानांपतयेनमोविना॰ यस्वाहा जयप्रभृतिसिद्धमायेबवरप्रदानादपूपंकरा
मोदकसक्तून् पायसमित्यथास्माउपाकिरतिविघ्नायस्वाहा एवंविनायकयवीरायःशूरायःउग्रा
यभीमायः हस्तिमुखाय॰ वरदायः विघ्नायः विघ्नदेभ्यः स्वाहेत्यथभूतेभ्योवलिमुपहरेयेभूताःप्र
चरंतीत्यथपंचसूत्रकंकणंहस्तेवध्नाति विनायकमहावाहोविघ्नमेननतवात्मया॰ कामायेसाधि
ताःसर्वेरदंव्याहृतिभिराबध्नामिकंकणमित्यथाग्निंप्रदक्षिणीकृत्वाप्रणम्याभिवाद्यविनायकंवि
सर्जयति: कृतंयदिमयाद्यापमहाभागगणेश्वर उत्तिष्ठस्वगणःसाधुयाहिमद्यंप्रसीदनामितिद ४

धिमधुपयश्चाज्यंविसर्जनंकल्पयति अथप्रयोगः पूर्वोक्तेशुभदिनेकर्त्तादेशकालौस्मृत्वाविनाय
कोपसर्गशांत्यर्थंममकर्मणोनिर्विघ्नतासिद्ध्यर्थंममकफलसिद्ध्यर्थंलक्ष्मीप्राप्त्यर्थंवाविनायकशांतिं
करिष्येइतिसंकल्प्यगणेशपूजनपुण्याहवाचनमातृकापूजननांदीश्राद्धानिकृत्वाचतुरः पराशरम
तेऽष्टौवाऋत्विजोवृणुयात् तेषुचत्वारःस्वस्तिवाचका इतिमदनरत्ने अथाचार्यःपंचवर्णैःशुक्लैर्वा
पिष्टैर्मध्येस्वस्तिकंकृत्वातदुपरिरक्तमानडुहंचर्मप्राचीनग्रीवमुत्तरलोमास्तीर्यतत्रश्रीपर्णीकाष्ठजं
पीठंसंस्थाप्यतत्रश्वेतंवस्त्रमाच्छाद्यचतुर्दिक्षुचत्वारिस्वस्तिकानिकृत्वातेषुप्रागादितः महीद्यौरि
त्यादिनाकांडानुसमयेनएकवर्णांश्चतुरःक्रमात् धान्यराशौनिधायप्रदोदकेननदीसंगमोदके
नवापूर्य उद्धृतासिवराहेणकृष्णेनशतबाहुना मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतमिति मंत्रेण
तेषुपंचमृदःक्षिप्त्वा गंधद्वारामितिचंदनागरुकेशरकस्तूरीकर्पूरादीन्याधानोरोचनंगुग्गुलंनिक्षि
प्याश्वत्थवटइतिपंचपल्लवान्निक्षिप्यचंदनमालाभूषितान्कृत्वायाः फलिनीरितिफलंसहिरण्यानी
तिपंचरत्नानिहिरण्यरूपइतिहेमनिक्षिप्य युवासुवासाइतिवस्त्रेणावेष्ट्यपूर्णादर्वीतिपूर्णपात्रंनि
धायैवंचतुर्दिक्षुकृत्वाप्रतिकलशंकलशस्यमुखेदेवदानवइत्यादिपठेत् ततश्चतुर्दिक्षुचत्वारऋ

घं०क
५
5

त्विजः त्वंनोअग्नेइतिवरुणमावाह्यषोडशोपचारैः संपूज्यानोभद्राः शंनोवातः पवतामित्यादिस्वशाखास्थ
शांतिपठेयुः ततः आचार्योभद्रासनस्यपूर्वतोहोमार्थंस्थंडिलंकृत्वातदीशान्यांहस्तमात्रवेदिकायांपीठ
वस्त्रादौ तत्पुरुषायविद्महेवक्रतुंडायधीमहि तन्नोदंतिः प्रचोदयात् इतिविनायकं सुभगायैविद्म
हेकाममालिन्यैधीमहि तन्नोगौरीप्रचोदयात् इत्यंबिकायांचहैमप्रतिमायामावाहयेत् अपराकेभ
विष्यत्वन्याअपिदेवताउक्ताः व्योमकेशंतत्संपूज्यपार्वतीभीमजंतथा कुलस्यपितरंजातमर्कआरशि
ंततथा धिषणंकेटपुत्रंचकोणंलक्ष्मचभारत विधुंतुदंबाकुलेयंनंदकस्यचधारिणं व्योमकेशः
शिवः भीमजोगणेशः आरोभौमः सितः शुक्रः केटपुत्रोबुधः कोणः शनिः लक्ष्मचंद्रः बाकुलेयः स्कं
दः नंदकधारीविष्णुः तत्पश्चिमेपृथग्वकांशप्रतिमास्वक्षतपुंजेषुव्योमकेशंपार्वतींभीमजंवसुदेवं
अर्कं मंगलं शुक्रं बृहस्पतिं बुधं शनिं चंद्रं राहुं बाकुलेयं विष्णुं एतान् इंद्रादिलोकपालांश्चावाह्या
सनादिनैवेद्यान्तैरुपचारैः संपूज्यभद्रासनस्यपूर्वतः स्थंडिलेगृह्योक्तविधिनाग्निंप्रतिष्ठाप्यान्वादध्या
त् केचित्तुग्रहमखमेवमेतत्समानतंत्रंकुर्वंति तत्रविनायकाद्युत्तरतोग्रहा वाहनंकुर्यात् तत्रान्वा
धानेचक्षुषीअंतमुक्त्वा अत्रप्रधानंग्रहानामिदाज्यचरुभिः मितंसंमितेनशालंकटंकूश्मांडराजपुत्रं ५

दैकैकयाचर्वाहुत्या व्योमकेशादीनेकैकयाचर्वाहुत्या घोषेणास्विष्टकृतमित्यादि चरुं श्रपयित्वा बर्हिष्या
स्नाप्यगव्याज्यलोलितेनगौरसर्षपकल्केनोद्वर्त्तितं सर्वांगं पूर्वोक्तैः सर्वौषधैः सर्वगंधैश्च विलिप्य शिरस्सो
यजमानमाचार्यो मंगलवेदघोषैर्भद्रासने उपवेशयेदिति विज्ञानेश्वरमहार्णवादयः बृहत्पराशरो
प्येवमाह उपवेश्यासनं तं यदिति तन्मदनरत्ने उक्तं. ततो यजमानः पूर्ववृत्तैर्ब्रह्मभिर्ब्राह्मणैः सह स्वस्ति
वाचनं कुर्यात् ततो जीवत्पतिपुत्राभिः सवेषाभिः स्त्रीभिर्निराजनं कार्यं नाभ्यङ्गश्च यजमानः वस्त्राणि कं
चुकानि च दद्यादित्याचारः ततः आचार्यः पूर्वदेशस्थं कलशमादाय सहस्राक्षं शतधारमृषिभिः पाव
नं कृतं तेन त्वामभिषिंचामि पावमान्यः पुनंतु ते इति मंत्रेण यजमानमभिषिंचेत् भगोते वरुणो राजा
भगं सूर्यो बृहस्पतिः भगमिंद्रश्च वायुश्च भगं सप्तर्षयो ददुरिति दक्षिणकुंभेन ततः यत्ते केशेषु दौ
र्भाग्यं सीमंते यच्च मूर्धनि ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नंतु सर्वदा इति पश्चिमकुंभेन ततः उत्तरक
लशमादाय सहस्राक्षमित्यादिभिस्त्रिभिर्मंत्रैरभिषिंचेत् अपरार्कमते त्वेताभिरेकैककुंभेनाभिषेकः
ततश्चतसृभिर्मिलितैः कुंभैर्बृहत्पराशरोक्तैरभिषिंचेत् यत्तत्पावनं स्नानं सहस्राक्षमृषिस्मृतं ते
न त्वा शतधारेण पावमान्यः पुनंत्विमाः शक्रादिदशदिक्पाला ब्रह्मेशाः केशवादयः आपस्त्वेमे

ग्रं॰ क॰
९

6

तद्दौर्भाग्यं पापानि दहतु सर्वदा स्वामिन्याप्ताः पश्योषधयः सन्तु मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यं च वयं
द्विष्मः समुद्रा गिरयो नद्यो मन्तयः सुपतिव्रताः दौर्भाग्यं ते नैव पापानि यच्छन्तु सर्वदा पादगुल्फोरुजा
घास्यतितं वोदरनाभिषु स्तनोरुवाक्हस्ताग्रग्रीवाङ्गसांगसंधिषु नासाललाटकर्णभ्रूकेशांतेषु च यत्
स्थितं तदायो ज्वं तद्दौर्भाग्यं पापानि यच्छन्तु सर्वदा ततश्चाचार्यः प्राङ्मुखो यजमानस्य पश्चात्तिष्ठन्सव्यपाणि
नाकुशान् यजमानस्य मूर्ध्नि निधाय तत्र सार्षपं तैलमौडुम्बरेण स्रुवेणादाय ॐ मितायस्वाहा ॐ मिता
यदामितियजमानः एवमग्रेपि ॐ संमितायस्वाहा ॐ शालायस्वाहा ॐ कटंकटायस्वाहा ॐ कूष्मांडाय
स्वाहा ॐ राजपुत्रायस्वाहा इति षडाहुतीर्जुहुयात् अपरार्कमते तु शालकंटकटाभ्यामेका कूष्मांडराज
पुत्राय चैकाहुतिरिति चतस्रः ततः वक्ष्यमाणाध्यायानादिकृत्वा पूर्वोक्तः षड्भिर्मंत्रैरभ्यो चरुं हुत्वा व्योमकेशा
दिभ्यश्चैकैकाहुतिं हुत्वा स्विष्टकृदादिप्रायश्चित्तहोमान्ते सर्वाशिदिक्ष्विंद्रादिदशलोकपालेभ्यो नाममं
त्रैश्चरुशेषेण बलिं दत्वा शुद्धोदकेन स्नातो धौते नववस्त्रधरो यजमानः साचार्यो विनायकमंबिकां च पूर्वो
क्तगंधाद्यैर्भ्यो षोडशोपचारैः संपूज्य कृताकृततंडुलान् तिलपृथुकौदनं पक्वापक्वमत्स्यान्नदभावे
मैंधवयुतं पात्रत्रये वीरं पक्वमांसं मांसमूलकापूपपूरिकांडेरस्रकटध्वजपायसंगुडमिश्रपिष्टमोद ९

कलशं स्थित्वा सर्वे धूपं षष्ठकुल्माषफलानि चैकपात्रे शूर्पे वा कृत्वा पूर्वोक्तमंत्रेण विनायकाय नम उपहारं
निवेदयामीत्युपहारं विनायकायैवमंबिकायै च दत्वा कुसुमगंधदूर्वासर्षपसहितोदकेनांजलिमापूर्य
प्रत्येकं पूर्वोक्तमंत्राभ्यामर्घ्यं दत्वा दूर्वासर्षपपुष्पांजलिं च मंत्राभ्यां दत्वा भूमौ शिरः कृत्वा रूपं देहि यशो
देहि भगं भगवन्देहि मे पुत्रान्देहि धनं देहि सर्वकामांश्च देहि मे इत्यंबिकां चोपतिष्ठेत ताह हन्यत्र शरोमं
ज्ञातरमाह सौभाग्यमंबिके देहि रूपं भगं यशोऽपि च स्त्रियं पुत्रांश्च कामांश्च तथा सौर्यं च देहि मे गणेशमा
तरं बालेय यत्किंचिन्मदभीप्सितं एकनाम्नैव तद्देहि देहि गौरि वरान्ममेति अर्घ्यदानमुपस्थानं च च
तुष्टये बल्यंतं तदेकार्यमिति मदनरत्ने ततश्चाचार्यः शूर्पे कृष्णानां स्त्रीयं कृतान्नं कृतानामुपहारं तत्र तिथा
यवानुष्यये भुवमभ्युक्ष्य कृष्णानां स्त्रीयं तत्र मंत्रोक्ता देवताः संपूज्य तत्र शूर्पे निधाय बलिं दद्यात् मंत्रास्तु
बलिं गृह्णंत्विमे देवा आदित्या वसवस्तथा मरुतो याश्विनौ देवाः सुपर्णाः पन्नगा ग्रहाः असुरा यातुधाना
सुपिशाचा मातरो रगाः शाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः जृंभगाः सिद्धगंधर्वा नागाद्वि
याधरा नगाः दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः जगतां शांतिकर्त्तारो ब्रह्माद्याश्च महर्षयः
मा विघ्नं मा च मे पापं मा संतु परिपंथिनः सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखावहाः ततो यजमानश्

हस्तमागत्य पादौ प्रक्षाल्याचम्याहरणीकृतिं कृत्वाचार्यं संपूज्य तस्मै वस्त्रयुगं हेमं च दक्षिणां दत्वा ब्राह्मणेभ्यो यथा
शक्त्यन्नेभ्यश्च भूयसीं दत्वा विनायकाम्बिकयोः कृत्तरपूजां कृत्वा विसर्ज्याचार्याय दत्वाग्निं संपूज्य विभूतिं दत्वा
ग्निं विसर्ज्य ब्राह्मणान् भोजयित्वा कर्मेश्वरार्पणं कुर्यात् इति नारायणभट्टसूरिसूनुरामकृष्णभट्टसूनुक
मलाकरभट्टकृते शान्तिरत्ने विनायकशान्तिः हेमाद्रौ भविष्ये चतुर्थ्यां वारुणे हैमं पलार्धं तच्छोभनं का
रयित्वा कुशायुते तिलद्रोणोपरि न्यसेत् वस्त्रैः पुष्पैः पूजयित्वा नैवेद्यानान्यपवरपृथक् ततस्तु ब्राह्मणे
दद्याद्गणेशः प्रीयतामिति कार्यारंभेषु सर्वेषु तस्य विघ्नं न जायते तेन विनायकशान्त्या विकल्पः वारुणः
सप्तजन्मानि भवेत्तिमदविकलाः इदं चैत्रे श्रावणे कार्तिके वा कार्यमिति हेमाद्रिः अथ सर्वकर्मस्वग्निनिर्ण
यः मनुः वैवाहिकेग्नौ कुर्वीत गृह्यं कर्म यथाविधि पंचयज्ञविधानं च पक्तिं चान्वाहिकीं गृही अत्र मेधा
तिथिः गृह्याग्निसाध्यमष्टकापार्वणश्राद्धहोमादि गृह्यकारैरुक्तं गृह्यं न त्वन्यगृह्यं नाम किंचित्कर्मास्ति
तेन गृह्यकारोक्तमेव लक्षणं गृह्यं मन्तव्यं नापि गृहशब्दः शालावचनः न हि शालायां किंचित् कर्मोक्तं
यदपि वास्तुकर्मोक्तं तदप्यग्निसंबंधिद्विजानामेवोक्तं नारदापि वचनः गृहीत्यनेनैव गतत्वात् पंचयज्ञे
क्तिर्वैश्वदेवमात्रपरा अन्येषामनग्निसाध्यत्वात् यद्वा गृह्यकर्मत्वेन तत्राप्यग्निसंबंधसिद्धेर्न तद्व्यर्था

मिदं किं तत्पंचयज्ञविधानं च गृही कुर्यादिति विभागः अन्वाहिकं वैश्वदेवार्थं नित्यं पक्तिं चाग्नौ कुर्या
दिति याज्ञवल्क्येनापि कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही दायकालाहृते वापि श्रौतं वैतानिका
ग्निषु अत्र यद्यपि स्मार्तस्य तदुक्तं वैश्वदेवादिकं कर्म तस्यैव विज्ञानेश्वरेणोक्तं तथापि समान्यस्य विशेषा
पेक्षत्वात् उपसंहारन्यायेन गृह्यपरत्वमेवेति मेधातिथिः इदमुक्तस्तावदुपसंहारः यथा दिवा संध्यास
कर्णस्य ब्रह्मसूत्रस्य च पवित्रं दक्षिणकर्णे कृत्वेति विशेषपरत्वं अत्रापराकोऽपि स्मार्तगृह्योक्तं कर्म प्र
त्यहं नित्यं स्मार्तहोमपार्वणश्राद्धादि न त्वस्मार्तं पौराणं वा गृह्यपत्न्यादि नित्यप्राप्तं यदनूद्यते न
हि विवाहाग्नौ कुर्वीत तच्छेषः श्रौते वैवाहिककर्मणो वोत्पादन इति तत्र वृत्तिः दायः पितृधनं तत्र हृते वाऽपि
त्यकार्यं श्रौतमग्निहोत्रादि वैतानिकेषु गार्हपत्यादिषु कुर्वीत यत्तु स्मार्तं पौराणं गृह्यपत्तमहाहृद
यात चैडीयज्ञादिकर्माणां वैवाहिकश्रौताग्निसंबंधनिबन्धनार्थं कल्पसूत्रगृह्यसूत्रप्राप्तमेवान्यत इति
अन्वाहिकी नित्यवैश्वदेवार्थं पक्तिं पाकं च गृह्याग्नौ कुर्वीत अपसव्येन कराग्रेण पुनराधानमर्हतीति स्मृतेः
मिताक्षरायां पालित्वेनोऽपि यस्य चाग्नौ न क्रियते यस्य चान्नं न दीयते अभोज्यं तद्वेदज्ञैः [illegible] नापवसेद
हुः तेन पुरुषार्थान्न संस्कारार्थश्च वैश्वदेवो गृह्य एवेति मन्तव्यः वैश्वदेवकृतेः त्रीपधाने पुनः पाको

शा॰क॰
८

8

लौकिकाभावेवनष्टेपि तदाहापरार्के बौधायनः अचोदितेनपाकेनकृतेनोद्धरेणवा लौकिकोग्निः सवितेयः
पुनराधानमर्हतीति वैश्वदेवादन्नात्पर्युक्ष्यस्वाहाकारैर्जुहुयात् वैश्वदेवस्याग्नेर्जुहोत्यग्नये स्वाहेत्यादिसूत्रेण
नादौ पुरोडाशकपालेनेति वचनदर्शनस्यैवग्रहणात् अतएवाग्नौ चैव वैश्वदेवाभावान्न शूद्रस्याग्नौ पाकः पर्वा
णि तु वैश्वदेवार्थस्यैव भोजननियमः परान्निपक्वं नाश्नीयादन्यवर्णाश्रोषितोग्निमानिति केचित् तन्ना
मूलं चिंत्यं अतएवान्यदा लौकिकाग्निपक्वस्यापि भोजनं सिद्धं यत्तु प्रातर्होमं तु निर्वर्त्य समुद्धृत्य कृता
शनात् शेषं महानसे कृत्वा मासमित्याकं समाचरेत् निष्पन्नेष्वन्नपाकेषु पुनरानीय तं क्षिपेत् उल्मुकं तु
समानीय वैश्वदेवं समाचरेदिति तद्ब्रह्मचारिणां पचनाग्निविधानादग्न्यायतनाद्बहिर्गमने दोषश्रुतेश्च त
ञ्चिन्नपरं अन्येषां तु शालाग्नौ तु पचेदन्नं लौकिके वापि नित्यशः यस्मिन्नग्नौ पचेदन्नं तस्मिन्होमो विधी
यते इति वैजवापोक्तार्थः यत्तु पारस्करः पचनाग्नौ पचेदन्नं सूतके मृतके पि च अपक्रान्तवसेद्रात्रिं
पुनराधानमर्हतीति तदल्पकर्माग्नौ पाकपरमित्येके तं तत्त्वं नाकरमेवेदं अन्यथाग्रहणं तं होमयेत्स्मा
र्तेन तदभावेकृतमित्यादिविरोधात् आपत्स्वापि भार्यादिरग्निर्दीयादिर्वाग्निर्गृह्याणि आश्वलाय
नोपि उक्तानि वैतानिकानि गृह्याणि वक्ष्याम इति यानि कर्माणि वक्ष्यामस्तान्येव गृह्याणीत्यर्थः ८

ग्न्यत स्मार्त्तेषौपासनाग्नावा शांतिकपौष्टिकव्रतहोमतुलाग्रहयज्ञमहारुद्रादि लौकिके एवेति सिद्धं देवयाज्ञि
कादयस्तु गृह्यशब्दं दंपत्योर्वर्त्तते तयोः फलं यावत्कर्म ग्रहयज्ञशांतिकव्रतहोमपाकादि स्मार्त्तपौरा
णां वा तत्सर्वं गृह्यमावसथ्याग्नौ कार्यं तदुक्तं छंदोगपरिशिष्टे तस्मिन्नेवान्यहोमः स्यात्त्वेकैकासमिदाहु
ति स्वगर्भसत्क्रियार्थाश्च यावन्नासौ प्रजायते अग्निस्तु नामधेयादौ होमे सर्वत्र लौकिकः न हि पित्रा समानी
तः पुत्रस्य भवति क्वचिदिति समिदाहुतिह पाकर्माणि शिष्यकर्तृका स्वगर्भसंस्कारार्थाश्च सीमंतादी
न्युक्ते त्वनुषंगः तेन वचनात्स्वेष्वौजातेष्टिवदित्यर्थः सदारोन्यान्पुनर्दारानुद्वोढुं कारणान्तरान् पुर
छेदग्निमान्कर्त्तव्यहोमोस्य विधीयते स्वेग्नावेव भवेद्धोमो लौकिके न कदाचन तथाहिताग्नेः स्वकर्मलौ
किकेग्नौ विधीयते इति तत्रैवोक्तेश्च त्याज्यः यथा स्याधानेनोत्पन्नानां श्रौतानां ग्नीनां गार्हपत्ये हवींषि श्रप
यत्याहवनीये जुहोति दक्षिणाग्नावन्वाहार्यं पचति पिंडपितृयज्ञेन चरंतीत्यादि श्रुतिभिः कर्मविशेषवि
नियोगेन नैराकांक्ष्यान्नान्यत्र स्मार्त्तकर्मपाकादौ विनियोग इति मीमांसकैः कर्कायैश्चोक्ताः तथा गृ
ह्याग्नेरपि गृह्याणि वक्ष्यामः भार्यादिरग्निस्तस्मिन्नरण्याणि गृह्यस्थालीपाकानां कर्म इत्यं कर्म य
था विधीति कल्पसूत्रमन्वाहार्ये गृह्यकर्मस्वविनियोगेन नैराकांक्ष्यान्त्रैव गृह्यनियमान्नान्यत्र स्मा–

प्रा॰ क॰
६
9

न्नेपौराणेषु शांतिकपौष्टिकव्रतादिहोमेषु तीर्थगयादिश्राद्धेषु वा गृह्याग्निप्राप्तिः किंतु लौकिकाग्निरेव
अन्यथा स्मार्त्तपौराणकर्मविधीनामपि सिद्धाग्निविधानादायतनैराकान्त्याद्यत्राप्यस्मार्त्तपौराणेष्वपि
श्रौताग्निहोत्रादिकर्मस्विव नित्याग्निद्विजस्त्रीशूद्राणामप्यधिकारः स्यात् नाधिकारि भवेच्छूद्रः एतत्प
र्मेन वैदिके तस्माच्छूद्रः पाकयज्ञैर्यजेताव्रतवान्स्वयमित्यादिवचनादेव निषादस्थपतेरिवाधिका
र इति वाच्यं शूद्रग्रहणस्य एवोक्तन्यायप्राप्तानुवादेनातंत्रत्वात् ॥१ अन्यथाग्निद्विजस्त्रीणामनधि
कारापत्तेः अत एव हेमाद्रिविज्ञानेश्वराद्यैर्ग्रहयज्ञविनायकशान्त्यादौ लौकिकाग्निरेव सर्वेषामुक्तः व
चनात्वन्यत्रापि विनियोगः यथा हेमाद्रौ मार्कण्डेयः आहिताग्निस्तु जुहुयाद्दक्षिणाग्नौ समाहितः
अनाहिताग्निरौपसदे अग्न्यभावे द्विजेऽप्सु वा वायवीये आहृत्य दक्षिणाग्निं तु होमार्थं वै प्रयत्नतः अ
न्यार्थं लौकिकं वापि जुहुयात्कर्मसिद्धये इदं सर्वाधानिपरं दर्शविहराग्निपरं वा हेमाद्रौ गृह्ये प्रजाप
तिः औपासनेनाग्निसिद्धिरग्नौकरणमेव च इदं गृह्योक्तदर्शाष्टकादिश्राद्धपरमनुवादः गृह्यानुक्ते
तीर्थगयादौ तु नाग्नौकरणं गतेन यांत्या वाज्यभागवत् गृह्याग्निः किंतु लौकिके पाणौ जले वा न
च दारा यां समीपे स्यात् श्राद्धं तेयो विधिस्तदेति न चैव वायवीयोक्तेः मितात्तरायां जावालोपि आरंभे सर्व ६

कृच्छ्राणांसमाप्तौचविशेषतः आज्येनैवहिशालाग्नौजुहुयाद्व्याहृतीःपृथक् स्वस्त्यर्थसारेपि गार्ह्यमौ
पासनेकुर्यात्सर्वाधानीनलौकिके स्मार्तंचलौकिकेकुर्याच्छ्रौतंवैतानिकाग्निषु अतएवगृह्याग्निंविनापि
होमेधर्मप्राप्तिरुक्ताकात्यायनसूत्रे एषएवविधिर्यत्रक्वचिद्धोमइति अत्रकर्कः यत्रक्वचिद्धोमःशांति
कपौष्टिकादिष्वपि क्वचिद्बह्वृचःस्वगृह्याव्यतिरेकेणापियथायंविधिःस्यादिति यथादावाग्नौकुशोद्धा-
दिरितिदृष्टांतेनगृह्याग्निंविनापिपौराणशांतिकपौष्टिकादौतत्रप्राप्तिराह अन्यत्रापि गृह्येपरिसमूहना
दिप्राप्तिःयत्रतुलौकिकाग्निस्थापनं तत्रोद्धनावोक्षितेग्निमुपसमादधीतेत्यादिप्राप्तिरित्याह तदेतल्लौ
किकेशांत्यादिहोमंगमयति अन्यथातेषुगृह्यनियमोऽन्यत्रलौकिकाग्निप्राप्तिस्तत्रविधिश्चनिर्विषयो-
ऽर्थएवस्यात् बह्वृचसूत्रेपि अथखलुयत्रक्वचहोष्यन्स्यात् अत्रवृत्तिः क्वचगृह्यणागृह्याग्निंविनापि
लौकिकेग्नौहोमेतत्रप्राप्तिमाह यदप्युक्तं गृह्यशाखोदंपत्योर्वर्ततइति तदप्युक्तं सर्वाणिवेधेषुहिदा
रवचनाःशालावचनोवागृह्यशब्दउक्तोनतुदंपतिवाची तेनगृह्यसूत्रंविनास्मार्तपौराणशांतिकपौष्टि
कव्रतबलादिहोमःसर्वःसोऽग्नेरपिलौकिकाग्नावेवेतिसिद्धं अन्यथातेषांकर्मणांगृह्याग्निप्रयोजक
त्वमप्रयोजकत्वंचेतिवैरूप्यंस्यात् यत्तुकात्यीयपरिशिष्टेएवमुक्तं तत्रापिगृह्योक्तेषुएवस्वगतप्र

ग्रा·क·
९

लेष्वग्निनियमः नान्यगतेषु गर्भसंस्कारादाविनेतिविवेकः जातेष्टौयस्मिन्जाते सूनएवसरतिमतश्छ्वा
ग्नत्क्षिविशेषोक्तेवधिः कथंचतत्सुतेजातेष्टिः स्वग्नौस्यादितिचिंत्यं तेनदेवयादिकादयः कानीयसूत्रकर्क
भाष्यार्थस्ताप्यज्ञानान्मीमांसान्यायाज्ञानाच्चमूर्खाएव यदप्याथर्वणपरिशिष्टे महाशांतिविधानेन
निर्मथ्याग्निसमाहितः निर्मथ्यहावयेत्तत्रसमिधाज्ञाम्रणान्वहन् यातंसहस्रंकोटिवाविंशतिर्दश
वाद्विजाः जुहुयुः शांतवृक्षस्यसमिधोद्धृतसंयुताः स्वयंवापियजेद्ब्रह्मासविताऽरंदिनेदिनइति यच्च
सामवेदेगौतमसूत्रे शांतिपुण्याहस्वस्त्ययनतापुष्यपंगतसंयुक्ताभ्युदयिकानिविद्वेषणासंवनना
भिचरादिषहृडिगुक्तानिचषणालाग्नौकुर्यादिति तदपिगृह्यसूत्रोक्ताशांत्यादिकर्मपरमेव अन्यथा
एवंविधात् यदपिकर्केणगृह्याग्निंविनाश्राद्धमेवनास्तीत्युक्तं तदपिसंवत्सरेप्रेमायात्रैदयायाः स्त्रि
त्रहनिप्रेतस्यादित्यादिदर्शाष्टकाह्निकाद्दासोत्रविधिनिषेधपरं नतसार्वविधितीर्थसंक्रात्यादिश्राद्ध
परं अग्निंविनाब्राह्मिश्राद्धसपिंडनाद्यभावात्तेनविनाग्नासिद्धेरन्योन्याश्रित्यासर्वविलवापत्तेः तेनसूत्रोक्ते
रेवगृह्याग्निनियमोनान्यत्रेतिसिद्धं महारुद्रेपरशुरामोपि तस्मिन्कुंडेतगृह्योक्तोकर्तव्याकुशकंडिका
लौकिकाग्निंसमानीयकुंडमध्येततोन्यसेदिति यदपित्रिकांडमंडनीयेपठंति इत्थंहीदविकारांश्च श्राद्ध ९

भष्टानूपवांस्तथा फलमूलानि वाश्रीयात्पर्वणि प्रोषितोग्निमान् परान्नं पक्वं नाश्रीयाद्धि हायणउ गोरसै
धाकपिण्याकसक्त्वादिग्राममधात्फलादिकं सकृत्पणि सर्पिष्मद्गाविष्टलघुभोजनं नसायंनोपवासश्च
सायंशाकास्तथैवत्रयमिति तदपि निर्मूलं पूर्वापरविरुद्धं मूलविधं प्रणामात्रमिति संदेहः इतिग्रामकृत्य
महात्मजकमलाभट्टकृतौ सर्वकर्मस्वग्निनिर्णयः अथ सर्वशान्तिकप्रकृतित्वाद्गृहयज्ञ उच्यते स्कांदयाज्ञ
वल्क्यो श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत् वृष्ट्यायुः पुष्टिकामो वा तथैवाभिचरन्नपि सचतुर्धा के
वलः अयुतहोम लक्षहोम कोटिहोमश्च इति याज्ञवल्क्याद्यैरुक्तः अन्ये मात्स्य उक्ताः ग्रहयज्ञस्त्रि
धा प्रोक्तः पुराणश्रुतिचोदितः प्रथमोयुतहोमः स्याल्लक्षहोमस्ततः परं तृतीयः कोटिहोमश्च सर्वका
मफलप्रदः ते सर्वे द्वेधा नैमित्तिकाः काम्याश्च तदेषां स्तत्रैव गृहस्योत्तरपूर्वेण मंडपं कारयेद्बुधः रुद्रा
यतनभूमौ वा चतुरस्रमुदक्प्लवं दशहस्तमथाष्टौ वा हस्तान्कुर्याद्विधानतः तस्य द्वाराणि चत्वारि क
र्तव्यानि विचक्षणैः मंत्रसक्कावत्स्या चतुरस्राश्चतुर्द्वारा अष्टहस्तादिनस्त्रयः चतुर्विंशतिहस्ता-- हीन
मध्योत्तमाः क्रमात् षड्द्वादशहस्तायाद्विहस्ताद्विवृद्धितो नवा अष्टाविंशतिपर्यंताः केचिज्जगुर्मनीषि
भिः अग्निपुराणे त्वेवं अयं मंडपः काम्ये नित्ये नैमित्तिकादौ नित्यनैमित्तिकं हित्वा सर्वमन्यत्तमं

डं इति शारदातिलकात् कुंडमंडपप्रकारोऽस्मत्पितृकृतप्रयोगदीपिकायां मत्कृते दानकमलाकरे च ज्ञेयः
स्कांदे नवग्रहमखे कुंडं हस्तमात्रं समं भवेत् चतुरस्रमधो हस्तं योनिवक्त्रं समेखलं चतुरंगुलविस्तारा
मेखला तद्वदुच्छ्रिता मानहीनाधिकं कुंडमनेकभयदं स्मृतं योनिर्मात्स्ये वितस्तिमात्रयोनिः स्यात् षट्
सप्तांगुलविस्तृता कूर्मपृष्ठोन्नता मध्ये पार्श्वयोश्चांगुलोच्छ्रिता गजोष्ठसदृशी तद्वदायता छिद्रसंयुता
मेखलोपरि सर्वत्र अश्वत्थदलसन्निभा· कुंडाभावे स्थंडिले वा कार्यं नित्यनैमित्तिकं होमं स्थंडिले
वा समाचरेत् इति शारदातिलकात् कुंडमेवं विधं न स्यात् स्थंडिले वा समाश्रयेत् इति प्रपंचसारात् स्कां
दे तस्य चोत्तरपूर्वेण स्थंडिलं हस्तमात्रकं· तस्य कुंडस्य स्थंडिलवेदी त्रिवप्रे चतुरस्रं च वितस्त्युच्छ्रायसंमि
तं द्व्यंगुलोच्छ्रितो वप्रः प्रथमः समुदाहृतः त्र्यंगुलोच्छ्रायसंयुक्तं वप्रद्वयमथोपरि द्व्यंगुलस्तत्र वि
स्तारः सर्वेषां कथितो बुधैः नवग्रहमखे कुर्यादृत्विजः स्वतः शुभान् अथवा चैकमभ्यर्च्य द्विजं वि
नाब्राह्मणान्सहमदतरत्वे स्कांदे नवग्रहमखे ऋत्विजश्चत्वारो वेदवादिनः अथवा ऋत्विजो शांतौ द्वा
वेव श्रुतिविदौ द्वावेवाप्युतहोमे तु नप्रज्ञेन विस्तरो वैधो संभवे सर्वतोभद्रं कार्यं मंडलं सर्वतो
भद्रमेतत्साधारणं स्मृतमिति शारदातिलकात् मात्स्ये प्रणिपत्य द्विजः कार्यो नेकत्वाब्राह्मणवा ११

चनं अग्निप्रणयनं कृत्वा तेषामावाहयेत्ततः देवतानां ततः संस्थानं विंशाद्धादशाधिकाः आदित्यादिग्र
हाः सर्वे साधिप्रत्यधिदेवताः प्रतिमा आह याज्ञवल्क्यः ताम्रकात्स्फटिकाद्रक्तचंदनात्स्वर्णकादुभौ
रजतादयसः सीसात्कांस्यात्कार्या ग्रहाः क्रमात् स्ववर्णैर्वा पटे लेख्या गंधैर्मंडलकेषु वा मात्स्ये
पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः सप्ताश्वः सप्तरज्जुश्च द्विभुजः स्यात्सदा रविः श्वेतः श्वेता
वरधरो दशाश्वः श्वेतभूषणः गदापाणिर्द्विबाहुश्च कर्तव्यो वरदः शशी रक्तमाल्याम्बरधरः श
क्तिशूलगदाधरः चतुर्भुजो मेषगमो वरदः स्याद्धरासुतः पीतमाल्याम्बरधरः कर्णिकारसम
द्युतिः खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भुजौ दंडि
नौ वरदौ कार्यौ साक्षसूत्रकमंडलू इंद्रनीलद्युतिः शूली वरदो गृध्रवाहनः बाणबाणासनधरः
कर्तव्योर्कसुतः सदा करालवदनः खड्गचर्मशूली वरप्रदः नीलः सिंहासनस्थश्च राहुरत्र प्र
शस्यते धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः सर्वे
किरीटिनः कार्या ग्रहा लोकहितावहाः स्वांगुलेनोच्छ्रिताः सर्वे शतमष्टोत्तरं सदा स्कांदे जन्म
भूगोत्रमग्निश्च वर्णस्थानमुखानि च योऽज्ञात्वा कुरुते शांतिं ग्रहास्तेनावमानिताः इत्यत्रो

प्रा॰ क॰ कः कलिंगेषु यमुनायां च चंद्रमाः । अंगारकस्त्ववंत्यां च मगधायां हिमांशुजः । सैंधवेषु गुरुर्जातः शु-
१२ क्रो भोजकटे तथा । शनैश्चरस्तु सौराष्ट्रे राहुर्वै राठिनापुरे । अंतर्वेद्यां तथा केतुरित्येता ग्रहभूमयः । आदि-
त्यः काश्यपे गोत्रे आत्रेयश्चंद्रमा भवेत् । भारद्वाजो भवेद्भौमस्तथात्रेयश्च सोमजः । गुरुश्चैवांगिरोगोत्रः
शुक्रो वै भार्गवस्तथा । शनिः काश्यपः प्रवाच्यो राहुः पैठीनसिस्तथा । केतवो जैमिनीयाश्च ग्रहाग्निस्त-
12 दनंतरं । आदित्ये पिंगलो नाम पिंगलः सोम उच्यते । धूमकेतुस्तथा भौमे जठराग्निर्बुधस्य तु । गुरौ
चैव शिखी नाम शुक्रे भवति हाटकः । शनैश्चरे महातेजा राहोः केतोर्हुताशनः । भास्करांगारकौ
रक्तौ शुक्लौ शुक्रनिशाकरौ । सोमपुत्रो गुरुश्चैव तावुभौ पीतकौ स्मृतौ । कृष्णं शनैश्चरं विद्याद्राहुं
चित्राश्च केतवः । गोभिलेन तु ब्राह्मणौ भार्गवाचार्यौ क्षत्रियावर्कलोहितौ वैश्यौ सोमबुधौ ज्ञेयौ शेषा-
न्म्लेच्छांस्तु निर्दिशेत् । इति वर्णा उक्ताः । स्कांदे मध्ये तु भास्करं विद्याच्छशिनं पूर्वदक्षिणे । दक्षिणे लोहि-
तं विद्याद्बुधं पूर्वोत्तरेण तु । उत्तरेण गुरुं विद्यात्पूर्वेणैव तु भार्गवं । पश्चिमे तु शनिं विद्याद्राहुं दक्षिण-
पश्चिमे । पश्चिमोत्तरतः केतुं स्थाप्या वै शुक्लतंडुलैः । अथ वा वर्णकैः कार्याः कार्याः स्वर्णादिधा-
तुभिः । शुक्रार्यौ प्राङ्मुखौ ज्ञेयौ गुरुसौम्यावुदङ्मुखौ । प्रत्यङ्मुखः शनिः सोमः शेषा दक्षिणतोमुखाः ॥ १२

प्राङ्मुखो वोर्ध्वदृष्टी उदङ्मुखो वामदृष्टी प्रत्यङ्मुखो वाधोदृष्टी आदित्याभिमुखो वा इति मात्स्योक्तेरिति
हेमाद्रिः विकल्प इत्युक्तं वर्णरूपगुणैर्युक्तान्याहृत्यावाहयेत्ततान् ग्रहमंडलानि स्कांदे भानोस्तु
मंडलाकारं सोमस्य चतुरस्रकं अंगारके त्रिकोणं तु बुधे बाणाकृतिं तथा गुरोस्तु पट्टिशाकारं पंचास्रं
भार्गवे तथा धनुस्तत्स्यार्किं विद्याद्राहोः शूर्पाकृतिं तथा ध्वजाकारं केतवस्तु गणेशं तत्स्वरूपिणं
तद्वर्णमंडलेषु ताम्रादिप्रतिमास्तंडुलैः स्थापयेदित्यर्थः मंडलमूर्त्योर्विकल्प इति हेमाद्रिः ग्रहमं
त्रानाह याज्ञवल्क्यः आकृष्णेनेमं देवा अग्निर्मूर्धा दिवः ककुत् उद्बुध्यस्वेति च ऋचो यथासंख्य
म्प्रकीर्तिताः बृहस्पते अति यदर्यस्तथैवान्नात्परिस्रुतः शन्नो देवीस्तथा कांडात्केतुं कृण्वन्नेवाग्निमाल
या स्कांदे तु कयानश्चित्र इति राहोश्चैतदुक्तं मात्स्ये त्वन्ये उक्ताः अग्निं दूतं दिनेशाय सोमाप्यायस्व इत्यपि
स्योना पृथिवि भौमाय इदं विष्णुर्बुधाय च इन्द्र आसां सुरेज्याय शुक्रज्योतिः सिताय च प्रजापतेति
सौराय आयं गौरिति राहवे केतवे ब्रह्मजज्ञानमेभिः स्वैः स्वैर्मंत्रैः प्रतिष्ठिता अन्यार्थानामपि मंत्राणां व
चनात्स्वार्थमिंद्रस्यादित्यायेनाविति प्रयोगः होमेप्येत एवाधिदेवाः स्कांदे सूर्यस्य चोत्तरे शं
भुमुमां सोमस्य दक्षिणे स्कंदमंगारकाच्चैव दक्षिणस्यां निवेशयेत् सोमात्पश्चिमतो विष्णुं ब्र

त्माजीवस्य पूर्वतः इंद्रमैंद्यामि नाडिमे दस्याग्नेयतो यमं राहोः पूर्वोत्तरे कालं सर्वभूतभयावहं केतोर्निर्ऋ
तिदिग्भागे चित्रगुप्तं निधापयेत् ईश्वरं चैव कं चेति श्रीशूलेनेति च पार्वती यदक्रंदेति च स्कंदं विस्नं विलोर
गटतः आब्रह्मन्निति ब्रह्माणं सजोषाइंद्रं सर्वं यमायत्वेति च यमं कालं कार्षिरसीति च चित्रावसोरिति
मंत्रेण चित्रगुप्तं निधापयेत् अग्निरापादिति निर्विसृरिंद्रापैंद्रीप्रजापतिः सर्पाब्रह्मा च निर्दिष्टा अधिदेवा
यथाक्रमं अग्निंहूतमिति निल्यमैंवरुणस्य उद्युत्तमं स्योनापृथिवि मे दित्याइंदं विष्णुस्तु विष्णवे इंद्राय
इंद्रंतीइंद्रस्योत्तानपर्णाणाचीस्रतो प्रजापतेप्रजेशस्य एषब्रह्मेतिवाविधेः मंत्रेन मोस्तु सर्पेभ्यः
सर्पाणां स्थापयेत्ततः गोभिलवसिष्ठा गृहदेवनयामध्ये अधिदेवान्निवेशयेत् मदनरन्नेमंसग्रहे
न अधिदेवादक्षिणतो वामे प्रत्यधिदेवताः स्थापनीयाः प्रयत्नेन वाहनीभिः पृथक्पृथक् उत्प
लपरिमाणे ग्रहस्य दक्षिणपार्श्वे स्थापयेदधिदेवतां ग्रहस्योत्तरपार्श्वे तन्न्यसेत्प्रत्यधिदेवतां शौनकः
क्षेत्रस्य पतिना क्षेत्रपालं भूजो नरं न्यसेत् भूजो भौमः ग्रहदेवाद्यदेवानां नैवेद्यं कुसुमानि च ग्र
हवशात्सनं दाने स्थापने चानुपूर्वशः इत्युक्तं वासिष्ठेनान्यथोक्तं रुद्रं च व्यंवकं मंत्रेण रवेरुत्तरतो १३
न्यसेत् सोमस्याग्नेयदिग्भागे श्रीसूनेमेन कात्मजा यदक्रंदेति भौमस्य स्कंदं याम्ये प्रपूजयेत्

विसंविस्तारशतादेतियजेत्सूर्यं बुधस्यच गुरोर्हस्तत्रयंतः स्थाप्योब्रह्माब्रह्मेतिमंत्रतः सजोषेंद्रेतिमंत्रे
णप्राच्यांशक्रंनिधापयेत् प्रानेः पश्चिमतः स्थाप्योयमायत्वेत्यचायमृः काषिरसीतिमंत्रेणराहोः काक्ते
नयोत्तरे चित्रगुप्तंनकेतूनांचित्रावसितिनैर्ऋते ग्रहदेवनयोमध्येश्रधिदेवान्निवेशयेत् मात्स्ये विनाय
कंतथादुर्गांवायुमाकाशमेवच आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारको मदनरत्ने स्कांदे उत्तरेश
निरृत्यांभ्यांगुरोःकेतोश्चदक्षिणे गणाधिपंप्रतिष्ठाप्यसर्वदेवनमस्कृतं तत्रैवसंग्रहे राहुमंदादिने
यानामुत्तरस्यांयथाक्रमं गणेशदुर्गावायुस्त्वराहुकेत्वोश्चदक्षिणे आकाशमश्विनौचेतिपंचेता
न्स्थापयेद्बुधः वसिष्ठः विनायकंगणानांत्वादुर्गांवैजातवेदसे वायोयेनेनयावायुंहुतंहुतेनति
चावरं यांवाकपोतिसंहृज्यांदावश्विनौताननाश्विनौ गोभिलीयोदाविंशाहेवताः स्थाप्यादिक्पालाश्च
दिग्गताः याज्ञवल्क्यः यथावर्णंप्रदेयानिवासांसिकुसुमानिवा गंधाश्चवलयश्चैवधूपोदेयस्तु
गुग्गुलः स्कांदे दिवाकरकुजाभ्यांहिदापयेद्रक्तचंदनं चंदनेभागंवेचैवाश्चितवर्णान्प्रदापये
त् कुंकुमेनतुसंयुक्तंचंदनंजीवसोम्ययोः अगरुंचंदनंदद्याद्राहुकेत्वर्कजेषुच ग्रहवर्णानि
पुष्पाणिगायत्र्यारूपमादहेत् रवेःकुंदरुकंधूपंपाशिनस्तुहूत्वाद्वता भौमेसर्जरसंचैवस्त्र

ग्रा॰क
५

गहंचतुर्थेस्मृतं सिह्लाकं गुरवेदद्याच्छुक्रेबिल्वागरुंतथा गुग्गुलंमंदचारेतुलाक्षाराहोश्चकेतवे
उद्दीप्यस्वेतिमंत्रेणदीपंदद्यादनंतरंइतिः गुडौदनंरवेर्दद्यात्कुक्कायचहुतोदनं मिश्रितंतिलमाषैश्च
नैवेद्यंतुयथानेश्वरे राहोर्माषौदनंदद्यात्केतोश्चित्रौदनंतथा मात्स्येतु मसूरांश्चकुजेदद्यादित्युक्तं
निवेदयित्वाहुतिभिर्होमंकुर्यादनंतरंइतिः अत्रविशेषोमत्कृतेदानकमलाकरेज्ञेयः धूपादेपा
श्चस्वरभीरूपदिशाद्धितानकं अधिदेवादीनांस्वल्पतरपरिमलैःसर्वेषांलोकपालानांचंदनंचवि
लेपनं शतपत्राणिपुष्पाणिदद्याद्गुग्गुलधूपकं दीपंगोघृतसंयुक्तंनैवेद्यंचहुतोदनं मात्स्ये
शाखान्तरेणतस्याश्चदध्यक्षतविभूषितं चूतपल्लवसंयुक्तंफलवस्त्रयुगान्वितं पंचरत्नसमायुक्तंपं
चभंगयुतंतथा स्थापयेद्वारुणंकुंभंवरुणंतत्रविन्यसेत् गंगाद्याःसरितःसर्वाःसमुद्राश्चसरांसि
च गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात् मृदमानीयविप्रेंद्रसर्वौषधिसमन्वितां स्नानार्थंवि
न्यसेत्तत्रयजमानस्यधर्मवित् याज्ञवल्क्यःकर्तव्यामंत्रवंतश्चचरवःप्रतिदैवतं नानादैवतान्समो
प्यवेतिश्रुतिसूत्रवचनात्समूहैकत्र्यैवाश्रपयेत् मात्स्ये होमंसमारभेत्सर्पिर्यवव्रीहितिलादिभिः हे १५
माद्रौदेवीपुराणे गणाधिपतयेदद्या-- ध्यात्वचराजतिः अन्यथाविफलंत्विश्रभवतीहनसंशयः

14

अर्कः पलाशः खदिरस्त्वपामार्गोऽथ पिप्पलः उडुंबरः शमी दूर्वा कुशाश्च समिधः क्रमात् एकैकस्यात्र
ष्टशतमष्टाविंशतिरेव वा होतव्यामधुसर्पिर्भ्यां दध्ना क्षीरेण वा युताः प्रादेशमात्राः समिधश्शाखाश्च
पलाशिनीः देवानामपि सर्वेषां स्वपांशुपरमार्थवत् स्वेन स्वेनैव मंत्रेण होतव्याः समिधः पृथक् होत
व्यं च हुताद्यक्तः चरुभक्ष्यादिकं ततः स्कांदे स्थापनमंत्रा एव होममंत्रा उक्ताः अधिदेवादीनां चैवं वासि
ष्ठामपि शेषाणां स्थापने मंत्रैर्होमो व्याहृतिभिस्तिलैः मात्स्ये त्वधिदेवानां त्वन्ये मंत्रा उक्ताः आवोरा
जेति रुद्रस्य बलिहोमं समाचरेत् आपो हि ष्ठेत्युमायाश्च स्योनेति स्वामिनस्तथा विस्नोरिदं विस्नुरि
ति तमीशेति स्वयंभुवः इंद्रमिदेवतातये इंद्रायज्ञकृयास्तु नः तथा यमस्य चायं गौरिति होमः
प्रकीर्तितः कलशस्य ब्रह्मजज्ञानमिति मंत्र प्रशस्यते चित्रगुप्तस्य विज्ञानमिति वेदविदुः अग्नि
दूतं वृणीमह इति वह्नेरुदाहृतः उदुत्तमं वरुणमित्ययं मंत्राः प्रकीर्तिताः भूमेः पृथिव्यत
रिक्षमिति वेदेषु पठ्यते सहस्रशीर्षा पुरुष इति विस्नोरुदाहृतः इंद्रापेंद्रीमरुत्वत इति
शक्रस्य शस्यते उत्तानपर्णे सुभगे इति द्रव्याः प्रशस्यते प्रजापतेः श्रुतहोमः प्रजापतइ
ति स्मृतः नमोऽस्तु सर्वेभ्य इति सर्पाणां मंत्र उच्यते एष ब्रह्मा य ऋत्विय इति ब्रह्मणो मदा

ग्रा॰ क॰ हुतः विनायकस्यचान्नमिति मंत्रो बुधैः स्मृतः जातवेदसे सुनवामसोमं मंत्रोयमुच्यते आदित्यन
१५ स्येनसद्याकाशस्य उदाहृतः काणाशिशुर्महीनां च वायोर्मंत्रः प्रकीर्तितः एषो उषा अपूर्व्याति प्रि
यादिवो मंत्र उच्यते नैवेद्यशेषं कृत्वा तु होममंत्रादनंतरं अथ व्याहृतिभिर्हुत्वा एकैकस्य यथाक्रमं
अष्टोत्तरं च साहस्रं शतमष्टाधिकं तथा अष्टाविंशतिरष्टौ वा एकैकस्य तु होमयेत् नैवेद्यशेष
होमः केषांचित् ततो वदानधर्मेण स्रुचैव जुहुयाच्चरुं हुत्वार्कसमिद्भिश्च स्रुवेणाज्यं च हा
पयेत् शाकलोनेति मंत्रेण तिलान्व्याहृतिभिर्हुनेत् चरुणा च समिद्भिश्च सर्पिषा च तिलैः क्रमात्
तत्तन्मंत्रैश्च होतव्याः क्रमात्तदधिदेवताः तेन चरोः प्रत्याहृत्य वदानधर्मः केचिदुस्तेन होममा
हुस्तच्चिंत्यं मात्स्ये होतव्यं च समित्सर्पिश्चरुभक्ष्यादिकं पुनः मंत्रैर्देशाहुतीर्हुत्वा होमं व्याहृ
तिभिस्ततः उदङ्मुखः प्राङ्मुखो वा कुर्याद्ब्राह्मणपुंगवाः पुनर्व्याहृतिभिरिति चेदापवादे कदेश
स्यावगतसाहित्यवक्तव्यो नूपादेवगतत्वात्तर्वव्याहृतिभिरेकाहुतिरित्येवमुक्तं हेमाद्रौ भ
विष्योत्तरेपि होमो व्याहृतिभिश्चैव सर्वस्तत्र विधीयते भूर्भुवः स्वस्तथा स्वाहा लक्षहोमो॥
विधीयते भक्ष्यादिकं नैवेद्यशेषं कृत्वा ततो जुहुमंत्रैर्घृतहोमीयः तिलादिद्रव्येण प्रत्येकं दश १५

15

हुतीहुत्वा प्रसावादि भूरादिव्याहृतिभिर्व्यस्ताभिस्तिसृभिः समस्ताभिश्चैकेत्येवमाहुत्याः पुनस्तद्धो
मादिसंख्यापूरणीये जि हेमाद्रौ मदनरत्ने चोक्तं एवं विभागे मूलं तत्र न विद्मः तत्रं तु तिसृभिर्व्याहृ
तिभिरेकाहुतिरित्येवं सर्वो होमः इति प्रतिभाति तदुक्तं हेमाद्रौ भविष्ये भूर्भुवः स्वस्तथा स्वाहान्त
तद्धोमो विधिः स्मृतः इति हेमाद्रिस्तु पूर्वापरविरोधान्माप्यदिरोधाच्च भ्रांत एव मात्स्ये मंत्रवंतश्च क
र्तव्याश्चरवः प्रतिदेवतं हुत्वा चतांश्चरूंस्सम्यक् ततो होमं समाचरेत् पूर्णाहुतिं च मूर्धानं दिवस्त्वभि
पातयेत् श्रयाभिषेकमंत्रेण वाद्यमंगलगीतकैः पूर्णाकुंभेन तेनैव होमांते प्रागुदङ्मुखैः यजा
मानस्य कर्तव्यं चतुर्भिः स्नपनं द्विजैः तत्र स्वराज्ञीत्यादयो मंत्राः प्रयोगे वक्ष्यंते अग्निपुराणे मूर्धानं
दिवमंत्रेण संस्रावेण च धारया दद्याज्झायपूर्णां वै नोपविश्य कदाचन महार्णवे तु मूर्धानं पुन
स्त्वादित्याः पूर्णादर्वि सप्त ते अग्ने इति पूर्णाहुतौ चत्वारो मंत्रा उक्ताः भविष्योत्तरे न संख्यानियम
स्त्वत्र ब्राह्मणानां तु रोत्तम न कालनियमश्चैव स्वेच्छया यत्र उच्यते ततः शुक्लांबरधरः शुक्लमा
ल्यानुलेपनः सर्वौषधैः सर्वगंधैः स्नापितो वेदपुंगवैः यजमानः सपत्नीकऋत्विजश्च समाहितः
दक्षिणाभिः प्रयत्नेन पूजयेद्गतविस्मयः वासिष्ठा ततस्तस्याभिषिक्तस्य रक्षार्थं बलिमाक्षिपेत्

दिग्विदिक्षु विचित्रैर्दीपैर्नीराजयेत्ततः प्रयोगपारिजाते वामनः आचार्यप्रभृतिभ्यश्च ग्रहार्चनफलं ततः
समिदाज्यचरूणां च तिलहोमफलं तथा तेषां जपफलं तद्वद्दत्तीयाञ्जलपूर्वकं ततस्तेभ्यो यथाशक्ति
दातव्या दक्षिणा पृथक् ताश्च याज्ञवल्क्येनोक्ताः धेनुः शंखस्तथानड्वान्हेमवासो हयः क्रमात् कृष्णा
गौरायसं छाग एता वै दक्षिणाः क्रमात् मात्स्ये सुवर्णेन समाः कार्या यजमानेन दक्षिणाः सर्वेषामथ
गां दद्यात्कुर्वीयेन न तुष्यति स्वमंत्रेण प्रदातव्याः सर्वाः सर्वत्र दक्षिणाः ते च दानमंत्राः मत्कृते दानकम
लाकरे ज्ञेयाः अत्रापि प्रयोगे वक्ष्यंते मदनरत्ने आश्वलायनः एवमेकाहुतौ विप्रं होमे त्वत्रेन भोज
जयेत् अत्यर्णामध्यमश्चापि विप्रमेकं शताहुतौ सहस्रस्य घृताहुतेनैवैकं जयञ्योपि प्रभोजयेत् अ
न्यथा दहति क्षिप्रं तद्राष्ट्रं नात्र संशयः अतो दानमशक्तो यो दक्षिणां तत्र मेनवा जपैः प्रणामैः स्तो
त्रैश्च तोषयेत्तर्पयेद्गुरून् स्कांदे यथा ग्रहा द्विजस्तद्वद्दिवि क्षितौ वेदपारगाः तोषयेत्तद्गुवस्त्राद्यैस्त
दमेनं विसर्जयेत् याज्ञवल्क्यः गुडौदनं पायसं च हविष्यं क्षीरषाष्टिकं दध्योदनं हविश्चूर्णं मांसं
चित्रान्नमेव च दद्याद्ग्रहक्रमादेतद्द्विजेभ्यो भोजनं बुधः शक्तितो वा यथालाभं सत्कृत्य विधिपूर्
वकं हविष्योदनः चूर्णतिलचूर्णमिश्रौदनः वसिष्ठः ईशान्यामाहरेत्कुम्भं सचाप्यपस्तुवेणवा २९

चंदनेकार्ययेनेनशिरःकंठांसकेषुच मात्स्ये एवंसमग्रंनिष्पाद्यसर्वदेवान्विसर्जयेत् यान्तुदेवगणाः सर्वे
पूजामादायपार्थिव इष्टकामप्रसिद्ध्यर्थंपुनरागमनायच अनेनविधिनायस्तुग्रहपूजांसमाचरेत् सर्वा
न्कामानवाप्नोतिप्रेत्यस्वर्गेमहीयते यस्तुपीडाकरोत्यंतमल्पवित्तस्यवाग्रहः तंतुयत्नेनसंपूज्यशेषा
नप्यर्चयेद्बुधः तथा सदेवाघुतहोमाद्येनवग्रहमखः स्मृतः विवाहोत्सवयज्ञेषुप्रतिष्ठादिषुकर्मसु
निर्विघ्नार्थंमुनिश्रेष्ठतथोद्वेगाद्भुतेषुच वश्यकर्माभिचारादितथोच्चाटनादिकं नवग्रहमखंकृ
त्वाततःकर्मसमारभेत् अन्यथाफलदंपुंसांनकाम्यंजायतेक्वचित् अद्भुते भूकंपादि अन्यच्चात्रवि
शेषः पितृकृतप्रयोगदीपिकायांज्ञेयः यत्तुशिष्टाः ग्रहमंत्राणामयुतसहस्रादिसंख्यायाजपंकृत्वात
द्दशांशेनतिलैर्होमंकुर्वंति तत्कुत्रापिजपावृत्तेः किंमूलकमितिनविद्मः इत्ययुतहोमविधिः अथ
प्रयोगः सचयथाऽस्मत्पितामहकृतोऽस्त्येव तथापिसंक्षेपेणोच्यते कर्त्तादेशकालौस्मृत्वाश्रीकामः
ग्रहपीडायामुत्पातेरोगेवातच्छांतिकामः शत्रुपराजयकामोवा अयुतहोमाख्यनवग्रहयज्ञेनाहं
यक्ष्येकेवलेनग्रहयज्ञंकरिष्ये इतिवासंकल्प्यगणेशंसंपूज्यमातृपूजांवृद्धिश्राद्धंचकृत्वाचार्यं
वृत्वाप्रार्थयेत् त्वंनोगतिःपितामातात्वंगतिस्त्वंपरायणं त्वत्प्रसादेनविप्रर्षे सर्वंमेस्यान्मनोगतं

आपद्विमोक्षाय च मे कुरु यज्ञमतं द्विजः कोटिहोमाख्यमतुलं शान्त्यर्थं सार्वकामिकमिति ततः चतुर
ऋत्विजो वृणुयात् यथाचार्यो ब्रह्मा चेति दैतेषां तत्कालविधया मधुपर्कः तदाह हेमाद्रौ विश्वामित्रः सं
पूज्य मधुपर्केणर्त्विजः कर्म कारयेत् अन्यथा विफलं कर्म भवति हि न संशयः इति स्वाध्यायशाखया
कार्यः अर्घ्यशाखायां मधुपर्क इति तत्रैव स्मृतेः ततो दश हस्तमष्ट हस्तं वा मंडपं कृत्वा तत्कृतगात तन्म
ध्ये हस्तमात्रं कुंडं कुर्यात् ऐशान्ये कुंडमिति हेमाद्रिः तदीशान्यां वेदी हस्तविस्तारा वितस्त्युच्छ्राव
हृदयप्रमाणा [redacted] च तुरस्राकार्या आद्यवप्रो द्व्यंगुलोच्छ्रः द्वावपि द्व्यंगुलविस्तारौ ततः आचा
र्यो यजमानो भद्रं कर्णेभिरिति मंडपं प्रदक्षिणीकृत्य पश्चिमद्वारेण प्रविश्य कुंडपश्चिमे उपविश्य देश
कालौ संकीर्त्यामुककर्मणि मंडपपूजादिक करिष्ये इति संकल्प्य तदंगत्वेन गणेशपूजनं मंडपदे
वतास्थापनादि च करिष्ये इत्युक्त्वा तानि कृत्वा यदत्रेति सर्षपान् विकीर्य पंचगव्येन कुशोद
केन शुचीवो हव्येति आपो हिष्ठेति प्रोक्ष्य स्वस्त्ययनं तार्क्ष्यमिति मंत्रद्वयं जपेत् ततो नैर्ऋते वे
देरीशानादिकोणचतुष्के विपंत भूतले मा गा लोकपालाश्च सर्वतः अस्मिन्मंडपे तिष्ठन्तु आ
युर्बलकराः सदा इति शंकून्रोपयेत् अग्निभ्योप्यप्सर्पेभ्यो ये चान्ये तत्समाश्रिताः तेभ्यो ९

वलिंप्रयच्छामिपूर्णमोदनमुत्तमंमिति माषभक्तवलिंदत्त्वासुवर्णादिशलाकया यंतायशो
वतीकांताविशालप्राणवाहिनी सतीचसुमनानंदासुभद्रानवमीमनेतिप्रागायतारेखाः कृत्वा
हिरण्यासुव्रतालक्ष्मीर्विभूतिर्विमलाप्रिया जयाज्वालाविशोकाचइडाचदशमीमनेसुदगाय
ताः कृत्वामध्येकोष्टचतुष्टयमेकीकृत्यकोणेषुरेखादद्यात् मध्यमपदचतुष्केब्रह्मा
पूर्वपदद्वयेदक्षिणस्तनेअर्यमादक्षिणपदद्वये जठरेदक्षिणेविवस्वान् पश्चिमपदद्वयेजठ
रेवामेमित्रः उदकपदद्वयेवामस्तनेपृथ्वीधरः आग्नेयपदार्धयोर्दक्षिणहस्तेसावित्रसवितारौ नैरृ
तपदार्धयोर्दक्षिणमेढ्रयोर्विबुधाधिपजयौ वायव्यपदार्धयोर्वामहस्तेराजयक्ष्मरुद्रौ ईशानपदा
र्धयोरुद्रौमुखयोरापापवत्सौ ईशानेपद्दक्षिणार्धेशिरसिशिखिदिवने तद्दक्षिणसार्धपेददक्षिण
नेत्रेपर्जन्यं तद्दक्षिणपदद्वयेदक्षिणश्रोत्रेजयंतं तद्दक्षिणपदद्वयेदक्षिणांसेकुलिशायुधं
तद्दक्षिणपदद्वयेदक्षिणबाहौसूर्यं तद्दक्षिणपदद्वयेदक्षिणबाहोवेवसत्यं तद्दक्षिणसार्धपदेद
क्षिणकूर्परेभृशं तद्दक्षिणग्रीवापदर्धेदक्षिणप्रबाहौआकाशं तत्पश्चिमार्धेदक्षिणप्रबाहावेव
सत्यं तद्दक्षिणसार्धपदेदक्षिणकूर्परेभृशं तद्दक्षिणग्रीवापदार्धेदक्षिणप्रबाहौआकाशं त

शा॰ क॰
३८
१८

तत्पश्चिमार्धे दक्षिणप्रवाहावेव वायुं तत्पश्चिमद्वये दक्षिणोरौ यमं तत्पश्चिमद्वये दक्षिणजानौ गं
धर्वं तत्पश्चिमसार्धपदे दक्षिणजंघायां भृंगराजं तत्पश्चिमनैरृत्यपदार्धे दक्षिणस्फिचि मृगं तदुत्त
रार्धे पादयोः पितॄन् तदुत्तरसार्धपदे वामस्फिचि दौवारिकं तदुत्तरपदद्वये वामजंघायां सुग्रीवं
तदुत्तरपदद्वये वामजानौ पुष्पदंतं तदुत्तरपदद्वये वामोरौ वरुणं तदुत्तरपदद्वये वामपार्श्वे असु
रं तदुत्तरसार्धपदे वामपार्श्वे शोषं तदुत्तरवायव्यपदार्धे वाममणिवंधे पापं तत्प्राक्पदार्धे
वामबाहौ रोगं तत्प्राक्सार्धपदे वामबाहौ भल्लाटं तत्प्राक्पदद्वये वामबाहावेव सोमं तत्प्राक्
पदद्वये वामांसे सर्पं तत्प्राक्सार्धपदे वामश्रोत्रे अदितिं तत्प्रागर्धपदे वामनेत्रे दितिं उक्तं वै
वास्तोष्पत इति वास्तुं विदिक्षु चरकी विदारी पूतना पापराक्षसी दिक्षु स्कंदं अर्यमणं
जंभुकं पिलिपिंछं ततः संपूज्य मंडलादीशाने वरुणं संपूज्य पायसवलीन्द्वामंडपपत्रमाने
नरज्जोत्रेन च त्रिसूत्र्यावेष्टयेत् ततः पूर्वस्यामग्निमीळे पुरोहितमिति सद्ध्फतोरणमावाह्य
सद्ध्फतोरणाय नमः इति संपूज्य तत्र शक्रबृहस्पती संपूज्य कलशं संस्थाप्य अं वं पूजयेत् द
क्षिणे इषे त्वेति सभद्रतोरणं संपूज्य ततस्तत्र यमांगारकौ संपूज्य कलशं संस्थाप्य धर्मं पूजयेत् प
३२

ष्ट्रिमे मम आयाहीति स्वकर्मतोरणमावाह्य तत्र शुक्रवर्धान्यस्य कलशं संस्थाप्य तत्र रूपतिं पूजयेत् । उत्तरे शान्तोदे
वीरिति स्तुहोत्र तोरणमावाह्य सोमकेतुशातीन्यस्य कलशं संस्थाप्य विघ्नेशं पूजयेत् । ततः पूर्वद्वारे कल
शद्वयं संस्थाप्य तत्रैरावतं संपूज्य ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः अत्रिगोत्रस्तु विप्रेन्द्र ऋत्वि
क्कर्मसु मम भवेति वाह्यग्वेदिनो ऋत्विजौ हत्वाग्निमील इति संपूज्यपूर्वं इन्द्रं ध्यात्वा ॐ एह्येहि सर्वामरसिद्ध
साध्यैरभिष्टुतो वज्रधरामरेशः संवीज्यमानोप्सरसां गणेन रक्षाध्वरं नो भगवन्नमस्ते भो इन्द्र इहागच्छ इहा
तिष्ठेतीन्द्रं कालयोरावाह्य आशुः शिशान इति पीतां पताकां पीतं च ध्वजं मुक्तिस्यज्ञानादश्मितीन्द्रं सं
पूज्य इन्द्रं सुरपतिः श्रेष्ठो वज्रहस्तो महाबलः शतयज्ञाधिपो देवस्तस्मै नित्यं नमो नमः इति नत्वा इ
न्द्राय सांगाय सपरिवाराय इमं माषभक्तबलिं समर्पयामीति बलिं समर्प्याचामेत् । ततश्चाग्नेये कलशं सं
स्थाप्य पुण्डरीकमसृतं च तत्र पूजयित्वा अग्निं ध्यात्वा ॐ एह्येहि सर्वामर हव्यवाह मुनिप्रवीरैरभितोभि
जुष्ट तेजस्वता लोकगणेन सार्धं मम माध्वरं पाहि कवे नमस्ते आवाह्याग्निं हूतमिति रक्तां पताकां ध्व
जं चोच्छ्रित्याग्निं संपूज्य आग्नेयः पुरुषो रक्तः सर्वदेवमयोऽव्ययः धूमकेतुः षडुत्सुन्नसौ इति बा
लिं समर्प्याचामेत् ततो दक्षिणे कलशं संस्थाप्य वामनं दिग्गजं संपूज्य यजुर्वेदिनौ हविजो का

ग्रा॰क
१९

19

तराज्ञो यजुर्वेदः स्वेष्टभोविलसदैवतः काश्यपेयस्त्वा विप्रेन्द्र ऋत्विक् त्वं मे मखे भवेति हुत्वा इषे त्वेति सं
पूज्य यमं ध्यात्वा ॐ एह्येहि वैवस्वत धर्मराज सर्वदेवैरर्चित धर्ममूर्ते शुभाशुभानन्दशुचामधीश शिवाय
नः पाहि मखं च नमस्ते इत्यावाह्य आयङ्गौरिति कृष्णां पताकां ध्वजं चोच्छ्रित्य यमाय सोममिति संपूज्य म
हामहिषमारूढं दण्डहस्तं महाबलं आवाहयामि यज्ञेऽस्मिन् पूजेयं प्रतिगृह्यतामिति बलिं दत्वा चामेतन्
ततो नैर्ऋत्यां कलशं संस्थाप्य तत्र कुम्भदेवजं[?] यं च संपूज्य नैर्ऋतिं ध्यात्वा ॐ एह्येहि रक्षोगणनाय
क स्वं विशालवेतालपिशाचसंघैः ममाध्वरं पाहि पिशाचनाथ लोकेश्वरस्त्वं भगवन्नमस्ते इत्या
वाह्य मोषुणा इति नीलां पताकां ध्वजं चोच्छ्रित्य संपूज्य निर्ऋतिं खड्गहस्तं च सर्वलोकैकपावनं आ
वाहयामि यज्ञेऽस्मिन् पूजेयं प्रतिगृह्यतामिति बलिं समर्प्य चामेतन् ततः पश्चिमे कलशं संस्थाप्य ज
नदिग्गजं संपूज्य सामवेदिनाहाविजो[?] सामवेदस्त्व पिङ्गाक्षो जागतः शाक्रदैवतः भारद्वाज
स्त्व विप्रेन्द्र ऋत्विक् त्वं मे मखे भवेति हुत्वा अग्न आयाहीति संपूज्य वरुणं ध्यात्वा ॐ एह्येहि यादोगण
वारिधीनां गणेन पर्जन्यसप्ताप्सरोभिः विद्याधरेन्द्रामरगीयमानः पाहि त्वमस्मान् भगव
न्नमस्ते इत्यावाह्य इमं मे वरुणेति श्वेतां पताकां ध्वजं चोच्छ्रित्य संपूज्य पाशहस्तं च वरुणमर्णसां[?] १९

पतिमीश्वरं आवाहयामि यज्ञेऽस्मिन् वरुणाय नमो नमः इति बलिं समर्प्याचामेत् ततो वायव्ये कलशं
निधाय तत्र पुष्पदन्तं गिरिजार्थमावाह्य वायुं ध्यात्वा ॐ पश्येहि यज्ञेऽस्मिन् मरुद्गणाय मृगाधिरूढः सप्तर्षिसिद्ध
संघैः प्राणाधिपः कालकवेः सहाय गृहाण पूजां भगवन्नमस्ते भो वायो इत्यादि । ॐ तत्र वायव्यस्य नैर
ऋतिगंधादिभिः पूजयित्वा वायोरावाहनमिति धूम्रां पताकां ध्वजं चोच्छ्रित्य संपूज्य वायुमाकाशगं चैव य
वने वेगवन्तं आवाहयामि यज्ञेऽस्मिन् पूजयं प्रतिगृह्यतां अनाकारो महातेजाः पश्चाद्दिग्गतिर्दिवि
नस्तस्मै पूज्याय जगतो वायवे हं नमामि चेति बलिं दत्वाचामेत् ततः उत्तरे कलशादयं संस्थाप्य सार्वभौ
मदिग्गजस्य अथर्ववेदाह्वानमोहश्चैवेदानुष्टुभो रुद्रदैवतः वैशंपायनविप्रेन्द्रक्षत्विक्को
मम एव भवेति हत्वा शंनोदेवीरिति संपूज्य कुबेरं ध्यात्वा ॐ पश्येहि यक्षेश्वर यक्षरक्षाविपक्षभक्षस्व
गणेन सार्धं सर्वौषधीभिः पितृभिः सहैव गृहाण पूजां भगवन्नमस्ते इत्यावाह्याप्यायस्वेति हरितां
पताकां ध्वजं चोच्छ्रित्य संपूज्य सर्वनक्षत्रमध्ये तु सोमो राजा व्यवस्थितः तस्मै सोमाय देवाय नक्षत्र
पतये नमः इति बलिं दत्वाचामेत् तत ईशान्यां कलशं निधाय सप्रतीकमंगलं च संपूज्य ईशानं ध्या
त्वा पश्येहि विश्वेश्वर नास्त्रिशूलकपालखट्वांगधरेण सार्धं लोकेन यज्ञेश्वर यज्ञसिद्ध्यै गृहाण · इत्या

शा॰क
२९

वायाभित्वादेवसचिनरितिषेतांयतोकांधजंचोछ्रित्यसंपूज्य वृषस्कंधसमारूढःशूलहस्तस्त्रिलोचनः
आवाहयामियज्ञेस्मिन्पूजेयंप्र॰ सर्वाधिपोमहादेवईशानःशुक्लईश्वरः शूलपाणिर्विरूपाक्षस्तस्मैनि
त्यं॰ इतिबलिंदत्वाचामेत् ततईशानपूर्वयोर्मध्येऽनंतंध्यात्वा पैहिपातालधरामेंद्रनागांगनार
क्तिनरगीयमान यत्तोरगेंद्रामरलोकसंघैरनंतनरहत्वाधरमस्मदीयमित्यावाह्यश्वेतांपताकांधजंचो
20
छ्रित्यायंगोरितिसंपूज्य योसावनंतरूपेणब्रह्मांडंसचराचरं पुष्पवद्धारयेन्मूर्ध्नितस्मै॰ इतिबलिंदत्वा
चामेत् ततःपश्चिमनिर्ऋतिमध्येब्रह्माणंध्यात्वापेहिसर्वाधिपतेस्वैरद्रलोकेनसार्धंपितृदेवताभिः
सर्वस्यधातास्यमितप्रभावोविशाध्वरेनः सततंशिवायेत्यावाह्य ब्रह्मजज्ञानमितिरक्तांपृ
ताकांधजंचोछ्रित्यसंपूज्य पद्मयोनिश्चतुर्मूर्तिर्वेदावासःपितामहः यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मै॰ इतिब
लिंदत्वाचामेत् ततोमंडपमध्येरुद्रस्यवृषस्यइतिमहाध्वजमुछ्रित्यनत्वब्रह्मजज्ञानमितिब्रह्माणंसंपू
ज्यमंडपस्तंभेषुसर्वेभ्योदेवेभ्योनमः वयोभ्युकिंनरेभ्योनमः एतेत्रगोभ्यो संपूज्यपूर्वस्यांकिंचिद्भूमि
मुपलिप्य॰ त्रैलोक्येयानिभूतानिस्थावराणिचराणिच ब्रह्मविष्णुशिवैःसार्धंरक्षांकुर्वंतुदानिताः २९
देवदानवगंधर्वायक्षराक्षसपन्नगाः ऋषयोमुनयोगावोदेवमातरएवच सर्वेममाध्वरेरक्षांप्रकु

वैतमुदान्विताः ब्रह्माविष्णुश्चरुद्रश्चक्षेत्रपालगणेशसह रुद्राश्वंसन्तमंसर्वे ब्रतरंतोषिसर्वतः त्रैलो
क्यस्थेभ्यः स्थावरेभ्यो भूते· त्रैलोक्यस्थेभ्यश्चरेभ्यो भूते· ब्रह्मणे· विष्णवे· शिवाय· देवेभ्यो· गंधर्वेभ्यो·
यक्षेभ्यो· राक्षसेभ्यो· पन्नगेभ्यो· ऋषिभ्यो· मनुष्येभ्यो· गोभ्यो· देवमातृभ्यो· संपूज्य बलिं दद्या
त् इति मंडपप्रतिष्ठा सा च मंडपाभावेन कार्या द्वारलोपात् कूटमंडपेन कार्यैवः विंशद्धस्तप्रमाणे
न मंडपं कूटमेव चेति लैंगे विकल्पात्स्याद्व्रीहियववत्समानविधानत्वादित्यन्यत्र विस्तरात् ततश्चा
चार्योमुकरुद्रहोमाग्निप्रतिष्ठां करिष्यन् तदंगतया कुंडाल्लेपनोल्लेखनादि अग्निप्रतिष्ठापनांतं कर्म
मेखलायोनिदेवतास्थापनं च करिष्ये कुंडे संमृज्य उपरिमेखलायां श्वेतायां इदं विष्णुं मध्यमेखलायां र
क्तायां ब्रह्मजज्ञानमिति ब्रह्माणं अधोमेखलायां कृष्णायां कद्रुद्रायेति रुद्रं योन्यां गौरीर्मिमायेति गौरी
च संपूज्याग्निं प्रतिष्ठाप्य ग्रहवेद्यां सर्वतोभद्रं कृत्वा तत्र देवताश्चावाहयेत् यथा मध्ये ब्रह्मजज्ञान
मिति ब्रह्माणं उत्तरादि आप्यायस्वेति सोमं अभित्वाजीगर्तिः शुनःशेप ईशानो गायत्री इदं वामसु
कं द्राक्षेण गायत्री अग्निहृतं काण्वो मेधातिथिरग्निर्गायत्री यमाय सोमं यमो यमो नुष्टुप् सोम्य
णोचारः काण्वो निर्ऋतिर्गायत्री नत्वायामि शुनःशेपो वरुणस्त्रिष्टुप् वायोशतं वामदेवो वा

शा॰क॰
३१

पुरनुष्टुप् वायुसोममध्यादिशुक्रमपाश्चत्रमैत्रावरुणो वसिष्ठो वसवस्त्रिष्टुप् आहुद्रासः सावाध्यपकाद
शाहुद्रा जगती त्वांनुसोमदोमन्त्रो द्वादशादित्या गायत्री अश्विनावर्निराङ्गिरसो गौतमोश्विनावुसि
क अभित्यं देवं वामदेवः सप्तपत्न्यः प्रकृतिः गणानांत्वागृत्स॰ आयंगौः सार्पराज्ञीसर्पा गायत्री अस
रसामेनशाङ्करषभ्रृंगो गंधर्वाप्सरसोनुष्टुप् ब्रह्मसोममध्ये कुमारंमाता कुमारः स्कंदः त्रिष्टुप् ऋषभ
मऋषभो वैराजो ऋषभोनुष्टुप् अदितिर्लौक्योबृहस्पतिः पूलमहाकालो गायत्री ब्रह्मेशानमध्ये अदि
तिर्लौक्यो बृहस्पतिर्देवोनुष्टुप् ब्रह्मेंद्रमध्ये तामग्निवर्णांमाभरिर्दुर्गा त्रिष्टुप् इदंविष्णुरितिविष्णु
ब्रह्माग्निमध्ये उदीरतां शंखः स्वधा त्रिष्टुप् ब्रह्मयममध्ये परंमृत्योसंकुसुकोमृत्युरोगाः प्रकृतिः ब्र
ह्मनिर्ऋतिमध्ये गणानांत्वा ब्रह्मवरुणमध्ये शंनोदेवीरंवरीषः सिंधुद्वीपआपो गायत्री ब्रह्मवायुम
ध्ये मरुतो यस्यहि गणो मरुतो गायत्री ब्रह्मणः पादमूले स्योनापृथिवीमेधातिथिर्भूमिर्गायत्री न
त्रैव इमंमेगंगे सिंधुक्षित्प्रियमेधो नद्यो जगती तत्रैव धाम्नोधाम्नो गौतमो वामदेवः सप्तसागरा अनु
ष्टुप् तदुपरिमेरुं वायुसोमादिसन्निधौ क्रमेण॰ गदा॰ त्रिशूलं॰ वज्रं॰ शक्तिः दंडः खड्गः पाशः अंकु
शाद्यायुधानि ॐ त्वराद्यि॰ गौतमः भरद्वाजः विश्वामित्रः कश्यपः जमदग्निः वसिष्ठः अत्रिः अरुंधती ३१

पूर्वादि· ऐंद्री· कौमारी· ब्राह्मी· वाराही· चामुंडा· वैष्णवी· माहेश्वरी· वैनायकी· नदस्त· पृष्ठावै इत्यावाह्य
संपूज्य ग्रहमंडले विलिखेद्ग्रहान्स्थापयेत् यथा ग्रहवेद्यां वस्वष्टदले पद्मं गंधादिना कृत्वा मध्ये कर्णिका
यां वर्तुले मूर्तौ तंडुलपुंजे वा आकृष्णेन हिरण्यस्तूपः सविता त्रिष्टुप् मंत्रोंते ॐ भूर्भुवः स्वः कलिंगदेशोद्भ
व काश्यपगोत्र रक्तवर्ण सूर्य इहागच्छेह तिष्ठेति अग्निं दूतमिति सूर्यस्थापनं इति मदनरत्ने· आह्वाति
भिरावाह्य मंत्रेण स्थापनमिति नैव एवमग्रेपि ततआग्नेयदले चतुरस्रे आप्यायस्व गौतमः सोमो
गायत्री अनेनाप्यवग्रेइति वा ॐ भूर्भुवः स्वर्यमुनातीरोद्भवात्रेयगोत्र शुक्लवर्ण सोमायेत्यादि दक्षि
णदले त्रिकोणे अग्निर्मूर्धा विरूपो गारका गायत्री अनेन स्योना पृथिवी वा भूर्भुवः स्वः अवंतीसमु
द्भव भारद्वाजगोत्र रक्तवर्ण भौमेत्यादि ऐशाने उद्बुध्यध्वं सोम्यो बुधो बुधस्त्रिष्टुप् अनेनेदं विष्णुरिति वा
ॐ भूर्भुवः स्वः मगधदेशोद्भवात्रेयगोत्र पीतवर्ण बुधेत्यादि· उत्तरे दीर्घचतुरस्रे बृहस्पते गृत्सम
दो बृहस्पतिस्त्रिष्टुप् अनेनेंद्र आसामिति वा ॐ भूर्भुवः स्वः सिंधुदेशोद्भवांगिरसगोत्र पीतवर्ण बृह
स्पते इहेत्यादि पूर्वदले पंचकोणे अन्नात्परिस्रुत इति वा शुक्रं ज्योतिरिति वा ॐ भूर्भुवः स्वः भोजकट
देशोद्भव भार्गवगोत्र शुक्लवर्ण शुक्रेहेत्यादि केचित् शुक्रः शुशुक्वान ऋचं शुक्रमंत्रमाहुस्त

ग्रा·क·
२२

त्रिंतं पश्चिमे धनुराकारे शनैश्चरो देवी: सिंधुद्वीपः ऋषिर्गायत्री: अनेन शन्नोदेवीरितिवा ॐ भूर्भुवः स्वः
सौराष्ट्रदेशोद्भव काश्यपगोत्र कृष्णवर्ण शनैश्चर इहेत्यादि नैर्ऋत्ये शूर्पाकारे कयानो वामदेवो राहुर्गा
यत्री अनेन कांडात्कांडादितिवा पैठीनसिगोत्र इति वां भूर्भुवः राठीनापुरोद्भव पैठीनसिगोत्र कृष्णवर्ण राहो इह
इहेत्यादि· वायव्यां ध्वजाकारे केतुं कृण्वन्न पुच्छः केतुर्गायत्री· अनेन ब्रह्मजज्ञानमिति वां भूर्भुवः
स्वः अंतर्वेदिसमुद्भव जैमिनिगोत्र चित्रवर्ण केतो इहेत्यादि· अथाधिदेवाः सूर्योत्तरे त्र्यंबकमिह द्रौ
सोमदक्षिणे श्रीश्च लेश्च मा भौमदक्षिणे यदक्रंदे तिस्कंदो बुधपूर्वे· विष्णोर्नुकमिति विष्णुर्गुरो
त्तरे आब्रह्मन्निति ब्रह्माणं· शुक्रपूर्वे सजोषा इंद्र तीद्रं शनेराग्नेये यमाय त्वेति यमं राहोरीशाने
कार्षिरसीति चित्रगुप्तं· अथ प्रत्यधिदेवताः ताश्च ग्रहदक्षिणोत्तरे वा अग्निं दूतं· अग्निं· अप्स्वग्ने अपः
स्योना पृथिवीति भूमिं· इदं विष्णुः विष्णुः इंद्रं आसामिति इंद्रं अदित्यै रास्नासि· इंद्राणीं प्रजापतेप्र
जापतिं नमोस्तु सर्पेभ्यः सर्पान्· ब्रह्मजज्ञानं ब्रह्माणं· स्थापयेत् ततो रवेरुत्तरे गणानां त्वेति
गणेशं ध्वनेरुत्तरे जातवेदसे इति दुर्गां सूर्योत्तरे· वायोयेते इति वायुं· राहोरीशाने· हुतं हुतपावा
न इत्याकाशं· केतोर्दक्षिणे· पावाकशोत्रो अश्विनौ स्थापयेत् ततोदिक्वाः त्रातारमिंद्रं· अग्निं दूतं· २२

यमाय सोमं · अस्त्वं तं · तत्वा यामि · वायो ये ते · वयं सोम · तमीशानं ब्रह्मजज्ञानं · नमोस्तु सर्पेभ्य इ
ति दशादिक्पालावाहयेत् लक्षहोमे तु · सुपर्णोसि गरुत्मानिति सामभिः शोषदेह त्वं वाहनं परमे
ष्टिनः विषपापहरो नित्यमतः शांतिं प्रयच्छ मे इति गरुडमावाह्य कोटिहोमे · एवं · ब्रह्मजज्ञानमि
ति ब्रह्माणं मध्ये इदं विष्णुरिति विष्णुं पश्चिमे त्र्यंबकमिति रुद्रं मुत्तरे: त्वमग्ने इति च · सूचना · आ
ग्नेय्यां मरुतो यस्येति मरुतश्चावाह्य संपूज्य प्रार्थयेत् आदित्या वसवो रुद्रा मरुतो लोकपास्तथा ब्र
ह्मा जनार्दनश्चैव शूलपाणिर्गणास्तथा अत्र संनिहिताः सर्वे भवंतु मम भागिनः पूजां गृह्णंतु सर्वे
त्र मया भक्त्योपपादितां कुर्वंतु च शुभं सर्वे यज्ञकर्त्तुः समाहिताः अत्र मंत्राणां वाचनिकत्वेपि स्वशा
खास्थैस्तत्तत्काण्डाकैरावाहनादि कार्यं संहितायां तत्तन्मंत्रास्तद्देवत्याः श्रुतोस्तनाः तैः पूजा लो
कपालानां कर्त्तव्या तु समंततः इति हेमाद्रौ गारुडस्योपलक्षणार्थत्वादिति केचिदाहुः ततो वेद्यां पे
शान्यां मही द्यौरिति भूमिं स्पृष्ट्वा ओषधयः समिति यवान्निक्षिप्य आकलशेष्विति कुंभं निधाय इमं मे गंगे
इति तीर्थजलेनापूर्य त्वां गंधद्वारामिति गंधं · या ओषधीरिति सर्वौषधीः दधिक्राव्ण इति दधि · ओ
षधयः समित्यक्षतान् कांडात्कांडादिति दूर्वाः अश्व · त्थे वो निषदनाश्वत्थवटोदुंबरस्य पंचपल्लवा

प्रा·क·
२३

नुस्योनात्पृथिवीत्यश्वगजस्थानवल्मीकसंगमह्रदगोकुलराजद्वारेभ्यः सप्तमृत्तिकाः याः फलिनीतिफ
लं· महिरत्नानीति पंचरत्नानि· हिरण्यरूपइति हिरण्यं चाहिनाप्रवासस्त्वामाइति वस्त्रयुग्मेनावेष्ट्यपू
र्णाद्दविति पूर्णपात्रं निधाते हे लोधकृणेनिवरुणमावाह्यः सर्वे समुद्राः सरितस्तीर्थानि जलदानदाः
आयांतु यजमानस्य दुरितक्षयकारकाः इति तीर्थान्यावाह्य सर्वेषां प्रणवादिनमोंतनामभिरुक्त्वान
मः अर्घ्यं वस्त्रं गंधपुष्पधूपदीपं तदीपोक्तनैवेद्यफलतांबूलदक्षिणानमस्कारैश्च पूजां कुर्यात् उपरिफ
लपुष्पधूपदीपं तदीपोक्तनैवेद्यफलतांबूलदक्षिणानमस्कारैश्च पूजां कुर्यात् उपरिफलपुष्पवितां-
वितानं च दद्यात् एवमाहोमसमाप्ति प्रतिदिनं कुर्यात् ततः कलशस्य समुद्रे देवदानवसंवादे इत्या
द्यैः कुंभसंप्रार्थ्य कुंडेन्वाधानादिप्रत्येकं निर्वापादि प्रोक्षणादिनासमोप्येकत्र भिन्नान्वा चरून्श्रपयि
त्वाज्यभागांते यजमानः द्रव्याणि तत्तद्देवताभ्यस्तर्प्यं ना उद्दिश्य न मम यथादैवतमस्तु इति त्यजेत्
ततो ग्रहाणामर्कसमिधः प्रादेशमात्रमधुघृतदध्यक्ताः तत्तन्मंत्रैः प्रत्येकमष्टोत्तरशतमष्टाविं
शतिं वा हुत्वाधिदेवाप्रत्यधिदेवाविनायकादिपंचलोभ्याश्चोक्तमंत्रैन्धनसंख्ययाष्टौ च तस्तोवाहुत्वा २३
तत्तन्मंत्रैरेकैकामाज्याहुतिं होपस्तरणादिना प्रत्येकं तन्मंत्रैः स्रुचा चरुं वाजुहुयात्

23

ततः चरोः स्विष्टकृतं कृत्वा व्रीहियवचरून् पुनरग्निमीले यथाकाममनुप्रकल्पितद्रव्येण ग्रहेभ्यः तन्मंत्रैर्दश
दशाहुतीः कृत्वा भूरादिव्याहृतिभिर्व्यस्ताभिस्तिस्रः समस्ताभिश्चैकेत्येवाममनुत संख्याहोमः कार्यः अयुतल
क्षहोमादिसमाप्तौ स्विष्टकृतान्तस्येव· प्रायश्चित्ताहुति पूर्णाहुत्यादेव कार्यमिति हेमाद्रि मदनरत्नाद
यः तत्र भूर्भुवस्वः स्वाहेत्येवं सर्वो होमः भूर्भुवः स्वस्तथा स्वाहा होमः सर्वो विधीयत इति हेमाद्रौ भवि
ष्योत्तरात्त· स्विष्टकृच्चांतेऽभिः अयुतहोमादावतिदेशप्राप्तस्य तस्य बाधेमानाभावात् एतच्चरोरथार्थ
त्वात्पुर्वोषितत्वापत्तेश्चोत्कांश्चन्येत्वं त्वदिन एव स्विष्टकृत् अन्यथा सत्योत्कर्षे सवनीयपशुयागादौ काग
तिः शेषस्थापनार्थं चानादेपादिकपायश्चास्येयतेति वदेतिवयंतु स्विष्टकृद्यागादयं कार्यः स्विष्टकृद्यागो
हि मा भूत् केवस्य प्रयोजक एव वा संस्कार्यत्वात् अन्यथा पशुपुरोडाशादावपि पृथक् स्विष्टकृद्दिनस्यात
हेमाद्र्यादिरालिखनादेवमाभाति एकवर्हिरिध्माज्यस्विष्टकृतः सुत्यकालादूत्याश्वलायनोक्तेः दिन
नूपकालैकैः एकः स्विष्टकृत् कालभेदेन नानेतिशुक्तेनुपपत्तमः ततः शुभमुहूर्ते होमं समाप्य स्विष्टकृ
द्वादिप्रायश्चित्तहोमांतं स्वशाखोक्तं प्रणीताविमोकान्तं प्राक्कृत्वा दिक्पालेभ्यो ग्रहेभ्यः विनायकादि
भ्यः क्षेत्रपालाय च बलीन्दत्वा सविद्याद्वसा शृहीतं शृहीतोर्ध्वं स्विष्टन् मूर्धानं भारद्वाजो वैश्वानरास्त्रि

ग्रा·क· ष्टपू ॥ अनेनः पुनस्त्वादित्या· पूर्णा दर्वि· सप्तते इति चतसृभिः पूर्णाहुतिं हुत्वा अग्नये वैश्वानराय इदं न ममेति त्या-
२४ गः ततः प्रणीताविमोकादि ब्रह्मविसर्जनान्तं कर्म समापयेत् ततः सर्वौषधैः सर्वगन्धैश्च प्रागुक्तैर्विलि-
प्तांगं यजमानं सपरिवारं चत्वारो विप्रा ग्रहकुंभोदकेन समुद्रज्येष्ठ्यादिभिरभिषिंचेयुः पौराणैश्च तैश्च म-
न्त्रैस्त्वामभिषिंचन्तु ब्रह्मविष्णुमहेश्वराः वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः प्रद्युम्नश्चानिरुद्-
श्च भवन्तु विजयाय ते आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा वरुणः पवनश्चैव धनाध्यक्षस्तथा
शिवः ब्रह्मणा सहिताः सर्वे दिक्पालाः पान्तु ते सदा कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः
बुद्धिर्लज्जा वपुः शान्तिः कान्तिस्तुष्टिश्च मातरः एतास्त्वामभिषिंचन्तु देवपत्न्यः समागताः आदित्यश्च-
न्द्रमा भौमो बुधजीवसितार्कजाः ग्रहास्त्वामभिषिंचन्तु (देवपत्न्यः समागताः आदित्यश्चन्द्रमा भौमो)
राहुः केतुश्च तर्पिताः देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ऋषयो मनवो गावो देवमातर एव च
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च औषधानि
च रत्नानि कालस्यावयवाश्च ये सरितः सागराः शैलास्तीर्थानि जलदा नदाः एते त्वामभिषिंचन्तु सर्व २४
कामार्थसिद्धये इति· ततः प्राङ्मुखावासं स्पृज्य देशकालौ संकीर्त्य कृतेन दशुन होमाख्यग्रहयज्ञप्र

तिष्ठार्थं सूर्यप्रीत्यर्थमिमां कपिलां रुद्रदैवत्याममुकगोत्रेभ्यो ग्रहविप्रेभ्यो दक्षिणामहं संप्रददे नम
मेमफलत्वा· कपिले सर्वदेवानां पूजनीयासि रोहिणी तीर्थदेवमयी यस्मादतः शां॰· एवमग्रेतेष्वमुपुण्य
स्त्वं शंख पुण्यानां मंगलानां च मंगलं विष्णुना विधृतो नित्यमतः इति सोमाय शंखं धर्मस्त्वं वृष
रूपेण जगदानंदकारकः अष्टमूर्तेरधिष्ठानमतः पाहि सनातन इति भौमाय वृषं· हिरण्यगर्भगर्भ
स्थमिति हिरण्यं बुधाय· पीतवस्त्रयुग्मं यस्माद्वासुदेवस्य वल्लभं प्रदानात्तस्य मे विष्णुरतः शां॰· इति
गुरवे पीतवस्त्रं विश्वस्त्वमश्वरूपेण यस्मादमृतसंभवः चंद्रार्कवाहनो नित्यमतः· इति शुक्रायाश्वं य
स्मात्त्वं पृथिवी कृत्स्ना धेनुः केशवसंनिभा सर्वपापहरा नित्यमतः· इति शनये कृष्णां गां यस्मादाय
सकर्माणि त्वदधीनानि सर्वदा लांगलाद्यायुधादीनि तस्माच्छांतिं· इति राहवे लोहं यस्मात्त्वं छाग
यज्ञानां मंगलत्वे व्यवस्थितः यानं विभावसोर्नित्यमतः· इति केतुभ्यश्छागं सर्वेषामेव गावः गवामंगे
षु तिष्ठंति भुवनानि चतुर्दश यस्माचस्माच्छिवं मे स्यादिह लोके परत्र चेति देयः सर्वेभ्यो वास्तव
र्णं सर्वपदेषु गण्यानि रत्नानि भूमिश्चाधिकानि· तन्मंत्रास्तु· यस्मादशून्यं शयनं केशवस्य शिवस्य
च शय्या ममाप्यशून्यास्तु दत्ता जन्मनि जन्मनि यथा रत्नेषु सर्वेषु सर्वे देवाः प्रतिष्ठिताः तथा शां

तिंप्रयच्छेत्तदर्त्वदानेनमेस्तराः यथाभूमिप्रदानस्यकलांनार्हंतिषोडशीं दानान्यन्यानिमेधांतिर्भूमिदा
नात्नवत्विहेति वस्त्रकोचनरत्नान्यपियथाश्रद्धांदद्यात् ततोग्रहाणामुत्तरपूजांकृत्वायांतुदेवगणा
इतिविसर्ज्याग्निंसंपूज्य विभूतिंप्रदत्वागच्छगच्छसुरश्रेष्ठेतिविसर्ज्योक्तसंख्ययाविप्रान्संभोज्यकर्मेश्व
रार्पणंकुर्यात् इतिकमलाकरभट्टकृतावयुतहोमः अथलक्षहोमः मात्स्ये कथितोयुतहोमोयंल
क्षहोममतःशृणु सर्वकामाप्तयेयस्माल्लक्षहोमंविदुर्बुधाः अस्माद्दशगुणः प्रोक्तोलक्षहोमःस्व
यंभुवा आहुतीभिःप्रयत्नेनदक्षिणाभिस्तथैवच अत्रेतरगुडौदनादिनैवेद्येन॰ द्विहस्तविस्तृतंतद
चतुर्हस्तायतंतथा लक्षहोमेभवेत्कुंडंयोनिवक्त्रंत्रिमेखलं चतुर्हस्तायतमितिपक्षांतरं॰ द्विरदा
ह्निपवादिविषयं अन्येतुद्वेत्र्यफलोक्तिरियंद्विहस्तकरणंपाहि चतुर्हस्तंक्षेत्रंभवति तेनैकप
वपक्षस्त्याज्यः अत्रऋत्विजोहहत्यराधारेणोक्ताः यस्मात्स्तत्रत्विजःकार्याब्राह्मणायेविप
श्चितः नित्यंजपपराश्चैवनियोज्यास्तेदशाद्विजाः कंदमूलफलाहारादधिक्षीराशिनोपिवा
मात्स्ये द्विरंगुलोछ्रिताकार्याप्रथमामेखलाबुधैः त्र्यंगुलोन्नतातत्रद्वितीयासमुदाहृता
उछ्रायविस्तराभ्यांचतुर्तीयाचतुरंगुला चतुरंगुलस्तुविस्तारःसर्वयोरपिशस्यते तस्यचो २५

तत्पूर्वेणावितस्तित्रयसंमितं प्रागुदक्प्रवणं तदर्धेन रत्नसंमेनेनतः विष्कंभार्धोच्छ्रितं प्रोक्तं स्थं
हिले विश्वकर्मणा अष्टादशांगुलोच्चमित्यर्थः संस्थापनाय देवानां वप्रत्रयसमाहितं द्विरंगुलोच्छ्रितो वप्रः
प्रथमः समन्तात्ततः अंगुलोच्छ्रायकं प्रोक्तं वप्रद्वयमथोपरि द्व्यंगुलस्तत्र विस्तारः सर्वेषां कथितो
बुधैः दशांगुलोच्छ्रिताभिर्भित्तिः स्थंडिले स्नानयोपरि तस्मिन्नवाहयेद्देवान्पूर्ववच्छुक्लतंडुलैः आदि
त्याभिमुखाः सर्वे साधिप्रत्यधिदेवताः स्थापनीयाः प्रयत्नेन नान्तरेण पराङ्मुखाः गृहमध्ये गरु
त्मदादिदेवानस्थाप्या इति हेमाद्रिः गरुत्मानधिकस्तत्र संस्थाप्यः श्रियमिच्छता स च सर्वोत्तरेषां
पूर्वभागे स्थाप्यः अतेनवादरायण इति न्यायात् तदावाहने मंत्रः सामभिः सोषदेहस्त्वं वाहनं पर
मेष्ठिनः विषपापहरो नित्यमतः विषापहरणा इति वा पाठः पूर्ववत्कुंभमामंत्र्य तद्धोमं समाचरेत्
सहस्राणं शतं कृत्वा समित्संख्याधिकं पुनः पूर्ववत्समिदाज्यचरून्कृत्वा स्वपर्णोक्तिगरुत्मानिति गरु
ड होमं कृत्वा तदंतमस्ताभिरेकैकेन वसमस्तव्याहृतिभिर्लक्षहोमं कुर्यादित्यर्थः हेमाद्रौ भविष्योक्त
शेपि भूर्भुवः स्वस्त्यास्वाहाहोमः सर्वो विधीयत इति इत कुंभवसोर्धारो पानपेदनलोपरि उडुं
बरीमयाईचक्रज्जीकोटरवर्जितां वाजमात्रांश्च वंश कृत्वा तन स्तंभद्वयोपरि वाकोमीत्रायस्याः

हस्तद्वयोंतरालदीत्यर्थः कुंभमलेयवमात्रंछिद्रंकार्यमितिहेमाद्रौ घृतधारांततः सम्यगग्नेरुपरिपा
तयेत् श्रावयेत्सूक्तमाग्नेयंवैसवंरौद्रमैंद्रवैः महावैश्वानरंसामज्येष्टसामचपाठयेत् अग्निमीळेनवा
नामधुछंदाअग्निर्गायत्री· विसार्वकेयणोदीर्घतमाविस्त्रस्त्रिष्टुप् आतेपितःपंचदशानांगृत्समदो
रुद्रस्त्रिष्टुप् स्वादिष्टयादशानामधुछंदाः सोमोगायत्री महावैश्वानरसाम्नः वैश्वानरऋषिर्देवता
चजगतीबृहतीचछंदः मूर्धानंदिवइतिजेपसाम्नोभरद्वाजोवैश्वानरस्त्रिष्टुप् स्वानंचयजमान
स्यएवंवस्त्वस्तिवाचनं दानंवायजमानेनएवंवद्दक्षिणाःएषक एवंवत्सरास्त्वित्यादिमंत्रपाठं
कुर्यादित्यर्थः नवग्रहमखेविप्राश्चत्वारोवेदवादिनः अथवाऋत्विजोशांतोद्वावेवश्रुतिवादिनौ
कार्यावयुतहोमेतनप्रसज्जेनविस्तरे नवद्वादशचाष्टौवालक्षहोमेपिऋत्विजः कर्त्तव्याःशक्ति
तस्तदश्चत्वारोवाविमत्सराः नवग्रहमखात्सर्वंलक्षहोमेदशोत्तरं कृत्वादद्यात्मनिश्रेष्टभूषणा
न्यपिशक्तितः आसनानिसवस्त्राणिहैमानिकटकानिच कर्णांगुलीपवित्राणिशक्तितः अ
न्नदानंयथाशक्त्याकर्त्तव्यंभूतिमिच्छता अन्नहीनःकृतोयस्मात् दुर्भिक्षभयदोभवेत् अन्नहीनो
दहेद्राष्ट्रंमन्त्रहीनस्तुऋत्विजः कर्त्तारंदक्षिणाहीनोनास्तियज्ञसमोरिपुः नचाप्यल्पधनःकु

योस्य लक्षहोमं नः कश्चित् तस्मात्पीडां करोति तं न भवति ग्रहः तमेव पूजयेद्भक्त्या होतारंचैव यथावि
धि पक्कमभ्यर्चयेद्भक्त्या ब्राह्मणं वेदपारगं दक्षिणाभिः प्रयत्नेन न बहूनल्पवित्तवान् । लक्षहोमा
त्मकं तत्वो यदा वित्तं भवेद्धोय ततः सर्वानवाप्नोति कुर्वन्कामान्विधानतः आहुतेरेकः शतेस
हस्रैवैकोटिशतस्यार्थः फलं तु पूज्यतेपि व लोके च वस्वादित्यमरुद्गणैः यावत्कल्पशतान्यष्टा
वधमोत्तमवाप्नुयात् सकामो यस्त्विमं कुर्याल्लक्षहोमं यथाविधि सर्वान्कामानवाप्नोति पदं वा
नत्यमश्नुते पुत्रार्थी लभते पुत्रं धनार्थी लभते धनं भार्यार्थी लभते भार्यां कुमारी च शुभं पतिं भ्रष्ट
राज्यस्तथा राज्यं श्रीकामः श्रियमाप्नुयात् यं यं प्रार्थयते कामं तं तं प्राप्नोति पुष्कलं निष्कामः कुरु
तेयस्तु परं ब्रह्माधिगच्छति इति लक्षहोमः अथ कोटिहोमः मात्स्ये अस्माच्छतगुणः प्रोक्तः को
टिहोमः स्वयंभुवा आहुतीभिः प्रयत्नेन दक्षिणाभिः फलेन च पूर्ववद्ग्रहदेवानामावाहनविसर्ज
ने होममंत्रास्त एवोक्ताः स्नाने दाने तथैव च कुंडमेरुपवेदीनां विशेषोयं निबोध मे कोटिहोमे
चतुर्हस्तं चतुरस्रं च यत्नतः योनिवक्त्रद्वयोपेतं तदप्याहुस्त्रिमेखलं एकं योनिवक्त्रं पाश्चिमेऽप
रे दक्षिणे इति हेमाद्रौ मदनरत्ने चोक्तं वेदिश्च कोटिहोमे स्याद्विहस्ता विस्तीर्णा च तथा चतुरस्रा सम

शां॰ क
२

तान्हित्रिभिर्वप्रैस्समावृता वप्रप्रमाणं पूर्वोक्तं वेदिकायास्तथोच्छ्रयः अपरार्के भविष्ये कुंडस्य पूर्व
भागे तु वेदिं कुर्याद्विचक्षणः चतुर्हस्तां समां चैव हस्तमात्रोच्छ्रितां पेति तन्त्रेषु फलप्रदं तथा षोड
श हस्तः स्यात्तोरणं पश्चिमं च तन्त्रशुभः पूर्वद्वारे च संस्थाप्य बह्वृचं वेदपारगं यजुर्वेदविदं याम्ये पश्चि
मे सामवेदिनं अथर्ववेदिनं तद्वदुत्तरे स्थापयेद्बुधः अष्टोत्तरहोमकाः कार्या वेदवेदांगवादिनः
एवं द्वादश तान् विप्रान् वस्त्रमाल्यानुलेपनैः पूर्ववत्पूजयेद्भक्त्या सर्वाभरणभूषणैः रात्रिसूक्तं
च रौद्रं च पावमानं सुमंगलं पूर्वतो बह्वृचः शांतिं पठन्नास्त उदङ्मुखः शाक्रं सौम्यं च रौद्रं च कू
ष्मांडं शांतिमेव च पाठयेद्दक्षिणद्वारि यजुर्वेदिनमुत्तमं सौपर्णमथ वैराजमाग्नेयं रुद्रसंहिताः
ज्येष्ठसाम तथा शांतिं छंदोगः पश्चिमे पठेत् शांतिसूक्तं च सौरं च तथा शाकुनिकं शुभं पौष्टिकं
च तथा राजन्नुत्तरेणाप्यथर्ववित् हेमाद्रौ भविष्योत्तरे पूजयित्वा प्रयत्नेन ब्राह्मणं वेदपारगं
वस्त्रैश्च भूषणैश्चैव गंधमाल्यानुलेपनैः प्रणम्य विधिवत्तस्मादात्मानं विनिवेदयेत् त्वं नोग
तिः पिता माता त्वं गतिस्त्वं परायणं त्वत्प्रसादेन विप्रेंद्र सर्वं मे स्यान्मनोगतं आपद्विमोक्ता २
य च मे कुरु यज्ञमनुत्तमं कोटिहोमाख्यमतुलं शांत्यर्थं सार्वकामिकं येषां देवानाहू ब्र

लाणां पूर्वभागे तु मध्ये देवं जनार्दनं पश्चिमे च तथा सूर्यं स्तूपमुत्तरतस्तथा स्कन्दं स्कन्दे वसुमि
त्रिवाप्यथ ईशानं च ग्रहांश्च सर्वान्नागान्मध्यामहस्तु लक्षणं वायुं सोमं तथेशानं लोकपालान् आदित्या
वसवो रुद्रा इति सार्धश्लोकद्वयमपि तु होमे उक्तं भविष्योत्तरे पूर्णां पूर्णां सहस्रान्तदशान्तं कोटिरूपां
स्तुभ्यां पूर्णाहुत्यः समाख्याताः कोटिहोमे नराधिप सहस्राणि तु पञ्च श्रेष्ठ दश शास्त्रविशारदैः पञ्चभिः स
मभिर्वापि होमः कार्यात्र पूर्ववत् चिन्तयेत्तत्र देवेशं पञ्चास्यं तु पपावकं स्ववोत्तिनस्य चत्वारि सप्त जिह्वा
नि पार्थिव एकजिह्वमथैकं तत्तत्स्मरेत् सार्वकामिकं पुण्याहं तत्पश्चाद्धोमेन होमकर्म समारभेत् तिलाः
कृत्स्नाहुताभ्यक्ताः किंचिद्यवसमन्विताः होमे व्याहृतिभिश्चैव सर्वं तत्र विधीयते । एवं द्वारेश्वराः इति जाप
का उक्ताः द्वारपालास्तु भिन्नाः इति हेमाद्रिः पञ्चभिः सप्तभिरिति वा दश होमकाः वा शाखोपप्रदाता
उक्ताः मात्स्ये एवं षोडशाप्युक्ताः तत्रापि ऋत्विजः कार्या रविनन्दन षोडश सर्वहोमेषु राजर्षे दया
वितेषु पावना इति हेमाद्रौ तु विंशतिश्च तद्विंशार्द्धास्त्रिंशच्चतुःषष्टिः शतं वा होतार इत्युक्तं भविष्यो
त्तरे तु नियं तु ये द्विजास्तत्र शान्तसंख्यान्पोजमं बलामेतु वहन्तो च यथालाभं निमन्त्रयेत् विद्या
वृद्धानवयो वृद्धान् गृहस्थान् धार्मिकान्शुचीन् तत्संख्या नियमश्चात्र ब्राह्मणानां न होमे न काले।

शा॰क॰ २८ नियमश्चात्रस्यैकपायज्ञउच्यते भविष्ये प्रणवादिभिश्चतन्मंत्रैः स्वाहाकारांतयोजितैः ज्ञत्रयात्सर्व
देवानांवैधायेचोपकल्पिताः स्नानेदानेचमंत्राःस्युस्तपवमुनिसत्तम वसोर्धाराविधानंचलक्षहोमव
दिष्यते अनेनविधिनायस्तुकोटिहोमंसमाचरेत् सर्वान्कामानवाप्नोतिततोविष्णुपदंव्रजेत् अश्व
28
मेधसहस्राणिदशचाष्टौचधर्मवित् कृत्वायत्फलमाप्नोतिकोटिहोमात्तदश्नुते ब्रह्महत्यासह
स्राणिदशचाष्टौचधर्मवित् कृत्वायत्फलमाप्नोतिकोटिहोमात्तदश्नुते ब्रह्महत्यासहस्राणिभ्रू
णहत्यार्बुदानिच नश्यंतिकोटिहोमेनयथावह्निविभाषितं इतिमात्स्येकोटिहोमः अथलक्षहोमा
दौहेमाद्रिमदनरत्नादयः नृसिंहपुराणेविशेषः दुःस्वप्नदर्शनेचोरग्रहपीडासुचात्मनः हसंतीप्र
तिमांचैवज्वलंतींचविशेषतः प्रस्वेदयुक्तांप्रतिमांदृष्ट्वाचनृपनंदन तथामहाज्वरग्रस्तेधाराद्रे
वस्यमूर्धनि सततंनरसिंहस्यकुर्याद्वाकारयेद्बुधैः अयनेविषुवेचैवचंद्रसूर्यग्रहेतथा नरसिं
हंसमाराध्यलक्षहोमंचकारयेत् अनावृष्टिमहामारीज्वररोगभयेतथा नरसिंहंसमाराध्यब्रा
ह्मणैर्वेदपारगैः कारयेल्लक्षहोमंतुग्रामयश्चनराधिपः दृष्ट्वोपसर्गमरणंप्रजानामात्मनस्तथाहि
समभ्यर्च्याराध्ययत्नेननरसिंहस्यमंदिरे शंकरायतनेवापिकोटिहोमंसमाचरेत् प्रमाणंवाहमा २८

त्रैतत्सर्वंतः कुंडलक्षणं ब्रह्मचारीव्रतेयुक्तस्त्विरात्रंचविशेषतः ग्रहोरात्रमुपोष्याथगायत्रीमयुतं।
जपेत् निराहारस्तुयुचयप्तेसर्वेसंयतेंद्रियाः प्रारंभेयुस्ततोयत्नं ततोहोममतंद्रिताः यवधान्यति
लैर्मिश्रैर्गायत्र्याप्रणवंमंत्रितं तत्पादेकचित्तेनस्वाहाकारान्वितेबुधः ततोव्याहृतिभिः पश्चाज्जुहुयात्तु
तिलादिकं यावत्सहस्रंतेसंख्यालक्षंवाकोटिरेवच समस्तव्याहृतिभिरेकाहुतिरित्यर्थः तावद्दिनेदिने
कुर्याद्द्विजार्चनपूर्वकं तावच्चभोजनंदद्याद्यावद्धोमंसमाचरेत् समाप्तेदक्षिणांदद्यात्ततःप्रोक्षोदके
नच एवंकृतेतुग्रामस्यराज्ञोजनपदस्यच सर्ववाधाप्रशमनीशांतिर्भवतिसर्वथा प्रणवगायत्र्या
युतहोमः हेमाद्रौमदनरत्नेचदेवीपुराणेषडस्रंलक्षणोपेतंवैदूर्यंकारयेत्कुंडं हेमपीतंचशो
भाढ्यंचेष्टाकैर्नवमातरः अरत्निकायाश्चकर्त्तव्याः पूर्वादिपरिकल्पिताः ग्रहाणांशाम्भवत्पूजाका
र्यालक्षहोमः प्रकर्त्तव्यः सर्वपीडानिवारणः गायत्र्याग्रहमंत्रैश्चकूष्मांडैर्जातवेदसे ऐंद्रावारुण
वाकैर्यैर्वायुयाम्यैः सवैस्सवीः होमः शतसहस्रस्ताग्रतोत्कृष्टोविधीयते श्रुतमंत्रविभावनहूहा।
त्पराशरोक्तंवक्ष्यामः सर्वपीडाविनाशायकोटिहोमःशुभावहः यवव्रीहिहुतक्षीरतिलाः क
गुप्रसारिकाः पंकजोशीरविल्वाम्रदलाहोमेप्रकीर्त्तिताः नत्रैव ब्रह्मोवाच लक्षहोमंप्रवक्ष्या

पु॰ क २५

29

मियथाप्रोक्तं तथाशंभुना भूमिकंपे दिग्दाहे यद्दुपस्थिते केतुसंदर्शने चैव आदित्यस्य च कंपने
कृष्णवर्णे अथवा सूर्ये तथा च्छिद्रसमन्विते रक्तवृष्टिस्तथा नद्यो विपरीता भवन्ति च निर्घातं गगनाद्भूमौ वा
दिमध्ये प्रितं स्थितिः यस्य राशौ ग्रहाः पंचषट्सप्त वसुराधिपा ग्रहणं चंद्रसूर्यस्य गृहे वाष्टमसंस्थितेः
सूर्यस्याभ्यर्चनं कार्यं पिवास्याशुभनाशनं लक्षहोमं महाहोमं कोटिहोमं पुरोहितं गोभूहिरण्य वा
स्त्रान्नतिलादानं शुभावहं पायसं दधि क्षीराज्यं देयं नैवेद्यमुत्तमं एकलिंगे प्रकर्त्तव्यमथोवि प्रगृहे
षुच वृषादिरहितमेकलिंगं वा गमात्रेन ततः कुंडे च मात्रेथवा पुनः होतव्यं स्वरराजेंद्रतान्यशुवि
धीरीदृशः शृणु देवि कथयिष्यामि लक्षहोमस्य यो विधिः चतुर्हस्तं तथा कुंडं विस्तारं हस्तसत्तम
षोडशांगुल विस्तार मन्त्राये षोडशांगुले चतुरंगुलं सवेदोष्ठं चतुर्हस्तस्य कीर्तितं द्वादशांगुल
विस्तारादैर्घ्याद्द्विगुणा विस्तरा योनिः कुंडे प्रकर्तव्या नाधिका पाद्यते क्वचित् एवं व्रीहियवं तं
दुलीर्तिलाः कंगुदलानि च हूतस्य सरराजेंद्र पालाशः समिधस्तथा हूर्वाः कुशाः शमी ज्येष्ठा श्रोत्रं वर्ध्यःशुभावहाः
गायत्रीं त्र्यंबकं चापि शंभावायेत्यथापिच जातवेदसमंत्रेण महारुद्रेण वै वह्निः सहस्रशीर्षा नमो हिरण्यनेत्यथा २५
पिहि हुतं मंत्रैस्तथा सौरैः पंचरात्रागमोदितैः होतव्यं शतमष्टोत्तसहस्रमथ संख्यया एकजोत्पलविल्वादि होमद्रव्यं शुभावहे कं

पर्नं स्वेदनं गात्रे अश्रुपातार्थजल्पनं देवतानां सुराध्यक्ष उत्पाताः इपकारकाः लक्षहोमं प्रकुर्वीत
कोटिहोमम् अथापि वा गोदोहे हट्टभवने महास्थाने शुभावहे अन्यथा नरको चौरो जायते राजविभ्रमः
ये देवास्ते ग्रहाः सर्वे ये ग्रहास्ते तु जातमाः तेषां संपूजनान्नित्यं दीर्घायुः पुरुषो भवेत् इति गायत्र्यादि
युतादिहोमः अत्र लक्षहोमे कोटिहोमे च बृहत्पराशरोक्तो विशेषः युग्माश्च ऋत्विजः कार्या ब्राह्मणा
ये विपश्चितः नियमव्रतसंपन्नाः संहिताः पाठिवेनत नित्यं जपपराश्चैव नियोज्यास्ते दश द्विजाः
कंदमूलफलाहारा दधिक्षीराशिनोऽपि वा अग्निं सोमं च सूर्यं च विश्वं चैव प्रजापतिं विश्वेदेवान् महेंद्रं
च भिन्नं स्विष्टकृतं तथा दधिमधुघृताक्ताश्च समिधश्चैव यज्ञियाः होमयेद्बहुतसाहस्रं मंत्रैश्चैव यथाक्र
मे चतुर्विंशतिगायत्र्या मानस्तोके तिपट्ट तथा त्रिंशद्ध्याहारमंत्रैश्च चत्वारि विश्वदैवतैः कूष्माण्डैर्जुहु
यात्यं च किरिकं पातु षोडश इन्द्रे दशसहस्राणि जातवेदस्तरत्यचा पंचैव तु सहस्राणि जुहुयादि
द्रदैवतैः तथा कोटिहोमे च तदूर्ध्वं च चतुरस्रायतं पुनः योनिवक्त्रद्वयोपेतं तद्वत्कुंडानि मेखले वे
दीच कोटिहोमे स्याद्धस्तानां हि चतुष्टयं चतुरस्रा समाता द्विभिर्वप्रैः समाहता वेदचतुष्टयस्था
नु चत्वारो द्वारपालास्तत्राह अष्टौ तु होमकाः कार्या वेदवेदांगवादिनः एवं द्वादश ते पूज्या गंधमा

ग्रा.क त्यानुलेपनैः अन्यत् प्राग्वत् कोटिहोमे विशेषो भविष्योत्तरे संवरण उवाच भगवन्सर्व उत्पातसं
३१ भवे भूप्रकंपने निर्घातपांसुवर्षे च गृहभंगे तथैव च जन्मनक्षत्रपीडासु ग्रहणादृष्टिभयेषु च क्रूरग्र
हग्रहपीडासु दुर्भिक्षे देशविप्लवे व्याधिनां संभवे जाते शरीरे चातिपीडिते क्लेशे महति चोत्पन्ने किं
30 कर्तव्यं नरोत्तमैः स्वर्गस्य साधनं यच्च कीर्तिदं धनदं तथा प्रब्रूहि मे द्विजश्रेष्ठ तथारोग्यप्रदं नृणां
सनत्कुमार उवाच शृणु राजन्प्रवक्ष्यामि शांतिकर्म तथोत्तमं कोटिहोमाख्यमतुलं सर्वकामफलप्र
दं ब्रह्महत्यादिपापानि येन नश्यन्ति तत्क्षणात् उत्पाताः प्रशमं यान्ति महत्स्वपघनेसर्वे विधानं त
स्य वक्ष्यामि शृणुष्वैकमना भव देवागारे च भवने तीर्थे वा शिवसन्निधौ पर्वते वाप्रक्विनयस्थले
त्ते मम आत्मनः शुभे नक्षत्रयोगे चा वारे सर्वगुणान्विते यजमानस्यात्र कुले कोटिहोमं समारभेत्
पूजयित्वा प्रयत्नेन ब्राह्मणं वेदपारगं वस्त्रैश्च भूषणैश्चैव गंधमाल्यानुलेपनैः प्रणम्य विधिव
त्तस्मै आत्मानं विनिवेदयेत् त्वं नो गतिः पिता माता त्वं गतिस्त्वं परायणं त्वत्प्रसादेन विप्रर्षे सर्वं
मे स्यान्मनोगतं आपद्विमोक्षाय च मे कुरु यज्ञमनुत्तमं कोटिहोमाख्यमतुलं शांत्यर्थं सार्वका
मिकं पुरोहितस्ततः सद्भिर्वरचरैः शुचिः ब्राह्मणैः सहितैः प्राज्ञैः संपन्नैः सुसमाहितैः भू ३१

मिभागेसमेशुद्धेप्रागुदक्प्रवणेतथा पुण्याहंवाचयेत्तूर्णंकृत्वाविप्रान्प्रपूजयेत् ततस्तुसहितोविप्रैःस
ज्ञयेन्मंडपंशुभं उत्तमंसप्तहस्तंतु तदर्धंतत्तुमध्यमं जघन्यंतत्तदर्धेनशक्तिकालाद्यपेक्षया मध्येतुमं
डपस्यापिकुंडंकुर्याद्विचक्षणः चतुर्हस्तप्रमाणेनआयामेनतथैवच मेखलात्रितयंतस्यदशांगुलवि
स्तृते तत्प्रमाणांमध्ययोनिंकुकृत्वातुसमाहितः कुंडस्यपूर्वभागेनवदिकुर्याद्विचक्षणः चतुर्हस्तांस
माचैवहस्तमात्रोच्छ्रितांनृप स्थापनंतत्रदेवानांकुर्यात्तेनबुद्धिमान् उपलिप्यततोभूमिंमंडपस्यसमं
ततः विन्यसेत्कलशांस्तत्रजलपूर्णांश्चतुर्दिशं अश्वत्थप्लक्षचूताद्यैः पल्लवैरुपशोभितान् वितान
मुपरिष्टाच्चमंडपस्यप्रकल्पयेत् स्थापयेद्विस्तमर्चास्तुतोरणानिविचक्षणः एवंसंभृतसंभारः पुरो
धाःसुसमाहितः पुण्याहजपघोषेणहोमकर्मसमारभेत् स्थापयित्वास्वशावेशांदेवमाणानविदम
ब्रह्माणंपूर्वभागेतुमध्येदेवंजनार्दनं पश्चिमेतुतथारुद्रंवसून्नुत्तरतस्तथा पैशान्यांचग्रहांस्तवाना
ग्नेय्यांमरुतस्तथा वायुंसोमंतथेशानंलोकपालान्क्रमेणतु एवंसंस्थाप्यविबुधानयथास्थानंनृपो
त्तम पूजयेद्विधिवद्वस्त्रगंधमाल्यानुलेपनैः वेदोक्तमंत्रैस्तल्लिंगैः पुराणोक्तैःपृथक्पृथक् श्रादि
आवसवोरुद्राश्चतिसार्धश्लोकद्वयमप्युतहोमेउक्तं एवंसंपूजयित्वातान्देवान्पत्नेनसुधीः नैवे

पा॰क॰ ३१ यैर्विविधैर्भक्ष्यैः फलादिपेयैस्तथैव च ततस्तैर्द्विजैः सार्धं कुण्डस्य विधिपूर्वकं कुर्यात्संस्कारकरणं यथो
क्तं वेदचिंतकैः ततः प्रज्वालयेद्वह्निं नाम्ना ख्यातं हुतार्चिषं नियोजयेद्द्विजांस्तत्र शतसंख्यान्नृपोत्तम
अलाभे तु वहूनां च यथालाभं नियोजयेत् विद्यावृद्धान्वयोवृद्धान् गृहस्थान्संयतेंद्रियान् चिंतये
त्तत्र देवेशं पंचास्यं नृपपावकं मखाग्नितस्य चत्वारि समज्जिकानि पार्थिव पक्वाजिक्रमथैकं तत
त्सर्वं सार्वकामिकं ऋग्भिः पूर्वमुखे होमो यजुर्भिश्चोत्तरामुखैः सामभिः पश्चिमैः कार्यो ह्यथर्वभिर्द
क्षिणामुखैः ऋग्भिः ऋग्वेदिभिः प्रणवादिभिश्च तल्लिंगैः स्वाहाकारांतयोजितैः जुहुयात्सर्वदेवा
नां वेधायेचोपकल्पिताः होमो व्याहृतिभिश्चैव सर्वस्तत्र विधीयते व्याहृतिभिरिति ऽपादेयगतस्माहि
त्यवज्ञत्वविवक्षया भूर्भुवः स्वः स्वाहेति समस्ताभिरेव होमो न व्यस्ताभिः पूर्णां पूर्णां स हस्तेन दद्यात्पू
र्णाहुतिं शुभां पूर्णाहुत्याः समाख्याताः कोटिहोमे नराधिप सहस्राणि नृपश्रेष्ठ दशशास्त्रविशारदैः
एवं प्रकल्पयेद्यज्ञं कोटिहोमाख्यमुत्तमं तिलाः कल्मायवा भक्ताः किंविद्व्रीहिसमन्विताः होमा
र्थाः कोटिहोमेन समिधस्तु पलाशजाः दक्षिणा च सहस्रं धेनवः सहस्रं स्वर्णवासस्त्यादि सर्वेषामे ३१
वगावश्चतिदेन वह्वर्तं गावः नव शतं स्वर्णं अथ कोटिहोमस्य यानमखादिमखविकल्पभेदाश्च्यंते

हेमाद्रौ भविष्योत्तरे संवरण उवाच ब्रह्मंस्त्वत्कर्मणो ब्रह्मकोटिहोमः सुदुष्करः कालेन महता चैव बहु
व्ययः श्रमं कथंचन नियमा ब्रह्मचर्याद्या दुष्कराः इति मे मतिः निरोधो ब्राह्मणानां च भूशय्यादिः सुदुष्करः
कार्यं गुरुलघीयेत पर्वकालाद्यपेक्षया कोटिहोमस्य संक्षेपं वद मे ब्रह्मसंभव सनत्कुमार उवाच
शतानन्तो दशसत्वो हि सत्वैकसत्वेक्षया चतुर्विधो महाराज कोटिहोमो विधीयते कार्यस्य गुरु
तां ज्ञात्वा नैकयमध्यवणाः पर्वः ग्रहणादिः यथासंक्षेपतः कार्यः कोटिहोमस्तथा शृणु कृत्वा कुं
डं शतं दिव्यं यथोक्तं हस्तसंमितं एकैकस्मिंस्तथा कुण्डे दश विप्रान्नियोजयेत् मध्यः पक्षेन विप्रा
णां सहस्रं परिकीर्तितं प्रतिलक्षे दशो त्यर्थः एकस्थानप्रणीतेग्नौ सर्वतः परिभाविते होमं कुर्यु
र्द्विजाः सर्वे कुण्डे कुण्डे यथोदितं यथा कुण्डं वह्नेस्त्वेपि राजसूयमहाक्रतौ स्यादेवाग्निवह्नित्वे च न च
यज्ञो विभिद्यते तथा कुण्डशतेष्वत्र हुताग्निषु नियोजिते एक एव भवेद्यज्ञः कोटिहोमो न संश
यः एवं यः क्रियते क्षिप्रं व्याकुलैः कार्यगौरवात् शतानन्तः सविज्ञेयः कोटिहोमो न संशयः
षट्कुण्डानां हस्तमात्रतादि यथा तिलयवादीन् यजेत् शतं शोलक्षार्थे त्रिकरं कुण्डं लक्षहोमे चतः

करं तथा॰ अयुतं तु होतव्ये कुंडं स्याद्धस्तवक्रं द्विगुणं लक्षहोमे च कोटिहोमे चतुर्गुणमिति तन्त्रांतरो
क्तेत्येवं अत्र अरत्निनाचार्यसहितं रत्नुक्तस्याचार्यस्य विशेषानुक्तेः सहस्रसंख्यात्वत्विज्ञामेव इतिश
तसंख्यैः स्वल्पैर्होमैः कार्यः स्याद्दर्शकालादिके यदा तदा दशसंख्यैः कार्यः कोटिहोमं महान्ते वि
प्राणां द्वे शते तत्र विभज्य वितियोजयेत् अत्र कोटिदशांशदशलक्षात्मकं कुंडं इति कुंडं पंचकरं
प्रोक्तं दशलक्षात्मतो क्रमादिति उक्तं पंचकुंडानि प्रतिकुंडं च अरत्निना विंशतिः सिद्ध्यन्ति मंडप
स्तु पंचाशत्करः पंचविंशतिकरो वा इति दशसंख्यैः यत्र कुंडद्वयं कृत्वा विभज्य च विभावसुं होमकु
र्युर्द्विजा भूयः संस्कृत्य विधिपूर्वकं शतं तत्र नियोज्ये च विप्राणां प्रविभज्य वै मसेष्यवार्षमासं वाक
मकालेषु पास्थिते तदा नवद्विसंख्यैः कार्यः होमो विचक्षणैः यदा तु स्वक्ष्यापयत्तं यजमानः समाप
येत् कालेन वक्रेनाराजस्तदा चैकसंख्यो भवेत् एककुंडस्थितो वह्निरेकचित्तैः समाहितैः न सं
ख्यानियमस्तत्र ब्राह्मणानां नरोत्तमः न कालनियमश्चैव स्वक्ष्यापयत्त उच्यते आहत्याकर्तका ३२
मस्य चान्नमांस्यादिकमेव तत् सदा प्रसक्तः कर्मतत्व्यायत्तोपे सार्वकालिकः प्रथमे कसंख्येरा जातुका

लेनवज्रता भवेत् यतो हि वित्तमायुश्च चित्तं चैवास्थिरं सदा अतः संक्षेपतः कार्यं धर्मकार्यं प्रशस्यते त
तः समाप्ये यज्ञेन कारयेत्सम होतारं शांतिकृत्यं तिनादेन ब्राह्मणैश्चोद्धरवेणाच ततस्तद्दत्तयेद्विशान्त्विजः
श्रद्धयान्वितः निष्कैश्च कंकणैश्च वस्त्रैः कुंडलैर्विविधैर्नृप गोशतं चैव दातव्यमश्वानां च शतं तथा सहस्रं
च सुवर्णानां सर्वेषामपि दापयेत् ग्रामैर्गजैरथैरश्वैः हृजयेच्च पुरोहितं ततस्त्ववभृथस्नानं यानैश्चैदेः प्र
वकल्पितैः लक्षहोमात्कमंत्रेण सदा विजयकारिणा एवं समापयेद्यस्तु कोटिहोमममविश्रुभं तस्या
रोगोप्रियाः पुत्राश्चायुर्वृद्धिस्तथैव च अनावृष्टिभयं नैव उत्पातभयमेव च दुर्भिक्षं ग्रहपीडा च प्र
शामं यांति भूतले एतत्पुण्यं पापहरं सर्वकामफलप्रदं सनकाद्यैर्मुनिभिः पार्थिवाय निवेदितं स
र्वोपसर्गशमनं भवेद्भवाय ये कारयंति मनुजास्त्वकोटिहोमं भोगाननवाप्य मनसोभिमतान् प्रका
मं ते यांति शाक्रसदनं सविशुद्धसत्वाः केचिद्ग्रामगजादेः पुरोहितस्य चान्यत्रासंभवाद्यजमानतोपि प्र
काराजाधिकारिकानाह पितृचरणास्तत्फलवाक्यमनन्तो क्षेत्रस्यापि वक्रपतत्वे राजदत्त
ग्रामादिदाने चाधिकारः पुरोहितपदस्तु गुरुवेग्रामरत्नानीति वदाचार्ये पुरुपपन्नस्याहः यत्र
उत्तमं शतहस्तहस्तैः ततदर्धेन मध्यमं जघन्यं तु तदर्धेन देशकालाद्यपेक्षयेति भविष्योत्त

शा॰क
३३

93

रोक्तोमंडपोज्ञेयः तत्रषोडशहस्तेवहिः पंचहस्तान्मध्येस्तंभचतुष्कमष्टहस्तेदशहस्तेवादत्वामध्येद
शादशहस्तोपरिमध्यस्तंभसमान्स्तंभात् दत्वोपरिनिर्यत्काष्टानिदत्वासर्वमध्यचतुष्कोपर्युच्चैकुर्या
त् असक्काविपत्नेपिसौकर्यापत्वात् ततःप्रागुदक्सूत्रेदशधाविभज्यदध्यदंशप्रागपरएवंद
चिचतुस्त्रांगणिदद्यात् तेनदशहस्ताःषतंकोष्ठकाभवंति तेषांमध्यंप्रत्साध्याद्विहस्तकरणीकानिचतु
रस्राणिपद्यानिसंभिन्नानिवाशतंकुंडानिकुर्यात् तेनदशकुंडादशवीथ्योभवंति अत्रैकादशा
न्यायेषाभेदाद्दक्षिणप्राच्यामितिकदाद्दिणोत्तरवित्तिहारवत्तद्देशस्यान्येवांगानितद्देशस्यप्रधाना
स्योपकुर्वंतीतिभ संस्काराद्याज्यभागांतमत्रिमध्यावर्हिस्वकुण्डेवप्रणीताचरुश्रपणादिभेदेनए
षकुर्यात् एकस्मान्प्रणीतेषाचिस्त्वेकेराघपंक्त्वावाघकुंडेगृह्यलौकिकंवाग्निंनिधायान्येषु
प्रणयेत् स्विष्टकृत्स्रणाकृतिवसोर्धाराद्यपिष्टपयेवसर्वतोमखवयज्ञवत् तत्राधर्द्धभेदात्
कर्तृभेदः अत्रतत्वदेवतामितिविशेषः इतिकमलाकरभट्टकृतेभाविष्योत्तरेशातसुखवादि
कोटिहोमः अथप्रयोगपारिजातेहरिहरचपतिपिष्टोक्तग्रहयज्ञप्रयोगः सतित्र्यानैमित्तिकः ३३
काम्यश्च अयनोपरागादावावश्यकर्मारंभोद्विनीयः फलार्थकाम्यः काम्येमंडपादिनियतं ति

त्यं नैमित्तिकं हित्वा सर्वमन्यत्समंडपमिति मात्स्योक्तेः तदभावे कूटमंडपः मंडपं कूटमेव वेति
लैंगोक्तेः आश्वलायनः नूपवर्णाग्रुधस्यानमंडलासनवाहनान् समित्कुंडोपहाराश्च पृथक्त्वा
कृतीरपि· गायत्रीमूलमंत्रांश्च नाममंत्रांश्च केवलान् आधिपत्यदेवतानां मंत्रांश्च षष्ठ्यादिसंयुतान्
तत्तन्मूर्तिस्वजातीयाङ्गोऽप्यत्र चैव वशग्रहात् कृत्वैवं प्रमानिष्ठानत्फलं नैव विंदति यद्यपि नि
त्यं नैमित्तिकं होमं स्थंडिले वा समाचरेदिति पारदोक्तेः काम्ये कुंडनियमेन तथापि कुंडे वा स्थंडि
लेपि वा त्वाचार्योक्तेः स्थंडिलेपि कर्त्ता देशकालौ संकीर्त्य मम ककामो ग्रहानकृत्य सिद्ध्यर्थं वा
श्रीपरमेश्वरप्रीत्यर्थं ग्रहयज्ञं करिष्य इति संकल्प्य गणेशपूजापुण्याहवाचनं नांदीश्राद्धानि कृ
त्वाचार्यं षोडशपात्रैश्च तत्र रोषविज्ञो हत्वा वृणुयात् ततश्चाचार्यश्चाचम्य संकल्प्य हस्तमात्रायां चतस्रिं
शादेशलायां हृद्धशुल्तत्रिवप्रायां वेष्टानेडुलैः सकर्णिकमष्टदलं कृत्वा ग्रहवर्णानुसारेण मंडला
नि कृत्वोदीच्यां पृथगेनं पंचकृत्वा तत्र महीधौरितिभिः सिंस्थाप्य पयः समितिपवानाकलशोषि ति
कुंभान्निधाय मम गोत्रसिंप्रसिद्ध्यमेधानतयाजगती इति जलेन एवं वस्त्रयुग्मेन रूद्वेष्टयेत्वाव
ष्टाश्वगजवल्मीकह्रदगोष्ठराजद्वारचतुष्पथमृदः अहतासि विशाहेमकुसेनशतवाङ्न

शा·क
२५

34

मत्तिके हरमे पापं यन्मया दुष्कृतं कृतमिति तिस्रः · हवतिभीमो रेणुः सोमो जगती · इति वटाश्वत्थ
प्लक्षजं ब्रह्मततवचः प्रवो यत्नेषधीनि वसिष्ठो विश्वेदेवास्त्रिष्टुप् इतिनत्वल्लवान् आप्यायस्वगोतमः सो
मो गायत्री · इति क्षीरं · दधिक्राव्णो वामदेवो दधिक्रावाऽनुष्टुप् दधिः शुक्रमसिज्योतिरसीति घृतं
गंधद्वारामानेद श्रीरनुष्टुप् · इति गोमयं गायत्र्या विश्वामित्रः सविता गायत्री इति गोमूत्रं सहिर
ण्यानि धयावाश्वः सविता गायत्री इति नवरत्नानि याओषधीरथर्वणोभिषगोषधयोऽनुष्टुप् इति स
र्वौषधानि दशमूलानि हेम च · गंधद्वारामिति गंधं च तिस्रः सर्वे समुद्राः गंगे च यमुने चैव · इमं मे
गंगे इति आपो हि ष्ठेति नवानां सिंधुद्वीप आपो गा सप्तमी प्रतिष्ठा ज्येष्ठेऽनुष्टुभौ नहि ते क्षत्रमित्य
कविंशाचस्पयुतः शैपो वरुणो दशावित्रष्टुभौ त्यागायत्र्याः स्वादिष्ठयेति दशानां मधुच्छंदाः पवमान
सोमो गायत्री इति कुंभमभिमंत्र्य स्वास्तिवाच्य ग्रहानावाहयेत् · यथाव्यस्तसमस्तव्याहृतीनामत्रि
भृगुभरद्वाजप्रजापतय ऋषयोऽग्निर्वायुः सूर्यः प्रजापतयो देवताः गायत्र्यायुष्णिगनुष्टुब्बृहत्य
श्छंदांसि · ग्रहावाहने वि· ॐ भूः आदित्यमावाहयामि ॐ भुवः आ· मि ॐ स्वः आ· मि भूर्भुवः स्वः आ· २५
मि · आकृष्णेन हिरण्यस्तूपः सविता त्रिष्टुप् · मंत्रांते भगवन्नादित्य ग्रहाधिपते काश्यपगोत्रक

लिंगदेशेश्वरजपापुष्पोपमांगद्युतेतेजोनिधेत्रिलोकप्रकाशकत्रिदेवतामयमूर्त्तेनमस्तेसत्वद्वाह
णध्वजपताकोपशोभितेनसप्ताश्वरथवाहनेनमेहंप्रदत्तिणीकुर्वंश्चागच्छाग्निरुद्राभ्यांसहपद्मक
र्णिकायांतान्नप्रतिमायांऽस्मिन्नावाहितपीठेधितिष्ठपूजार्थंत्वामावाहयामि तद्दक्षि ॐ भूरादित्याधि
देवमग्निमावाहयामि ॐ भुवरा॰मि ॐ स्वरा॰मि ॐ भूर्भुवः स्वरा॰मि अग्निंदूतंकाण्वोमेधातिथिर
ग्निर्गायत्री मंत्रांते पिंगभ्रूश्मश्रुकेशपिंगाक्षत्रितनयनमरुणवर्णंछागस्थंसाक्षसूत्रंसप्तार्चिंश
क्तिधरंवरदहस्तद्वयमादित्याधिदेवमग्निमावाह यामि तद्वामे॰ ॐ भूरादित्यप्रत्यधिदेवंरुद्रमावा
हयामि ॐ भुवरा॰मि ॐ स्वरा॰मि ॐ भूर्भुवः स्वरा॰मि त्र्यंबकंवसिष्ठोरुद्रोनुष्टुप् मंत्रांते त्रिलोचनं
पंचवक्त्रंहस्तोहस्तेकपालशूल खट्वांगधारिणंचंद्रमौलिंसदाशिवमादित्यादिप्रत्यधिदेवंरुद्रमा॰
ततआग्नेये ॐ भूः सोममित्यादि आप्यायस्वगौतमः सोमोगायत्री॰ मंत्रांते भगवन्सोमद्विजाधि
पतेसुधामयशरीरशिरोगोक्षयमनादेशेश्वरगोक्षीरधवलांगकांतेद्विभुजगदावरदानांकित
करप्रस्कंधवरमाल्यानुलेपनसर्वांगामुक्तमौक्तिकाभरणरमणीयसमस्तलोकाप्यायकदेव
तात्मकमूर्त्तेनमस्तेसत्वद्धवलध्वजपताकोपशोभितेनदशाश्वेताश्वरथवाहनेनमेहंप्रदत्ति

णीकुर्वन्नागच्छाग्निकोणमयाद्वसहपद्माग्नेयदलमध्ये स्फटिकप्रतिमां प्रत्यङ्मुखीं चतुरस्रपीठे धिनिष्टपूजार्थं
त्वामावाहयामि तद्दक्षिणे प्रागवस्थानत्यनंतरं ब्रह्मेसिद्धदीपस्यायो गायत्री मंत्रांते स्त्रीरूपधारि
णीः श्वेतवर्णा मकरवाहनाः पाशाकलशधारिणी मुक्ताभरणभूषिताः सोमाधिदेवताश्चपाश्चावाह
यामि· वामे व्यावृत्यनंतरं· गौरीर्मिमाय दीर्घतमा उमा जगती मंत्रांते ऽक्षसूत्रकमलदर्पणकमं
डलुधारिणी त्रिदशपूजिता सोमप्रत्यधिदेवतां गौरीमावा· दक्षिणे व्यावृत्यनंतरं अग्निर्मूर्धा वि
रूपोंगारको गायत्री मंत्रांते भगवन्नंगारकाख्याकृते भारद्वाजगोत्रावंतिदेशोद्भवरक्तालांबुजोपमो
गधुते चतुर्भुज शक्तिशूलगदाखड्गधारिन् रक्तांबरमाल्यानुलेपनप्रवालाभरणभूषित सर्वो
गज्ञालोकदीप्तेन मस्तेसमुद्र उरक्तध्वजः तेनरक्तमेषस्थवाहनेन मे हं प्रदक्षिणीकुर्वन्नागच्छ भू
मिस्कंदाभ्यां सहपद्मदक्षिणदलमध्ये रक्तचंदनप्रतिमा दक्षिणाभिमुखीं त्रिकोणपीठे धिनि
ष्टपूजार्थं त्वा· तद्दक्षिणे व्यावृत्यनंतरं स्योनामेधानिर्णिभूमिर्गाय· मंत्रांते शुक्लवर्णा दिव्या
भरणभूषितां चतुर्भुजां सौम्यवपुषां चंडांशु सदृष्टां वरां रत्नपात्र सस्यपात्रौषधिपात्रपद्मोप
तकरां चतुर्दिंगं गेष्टं गता मंगारकाधिदेवतां भूमिमा· वामे व्यावृत्यनंतरं कुमारश्चित्पि ३५

तदंगृत्समदः स्कंदस्त्रिष्टुप् मंत्रोतेषण्मुखशिखिवाहनकविभूषणारक्तांवरधरंमयूरवाहनंकुक्कुटध्वज
पताकाशक्त्युपेतंचतुर्भुजमंगारकप्रत्यधिदेवतांस्कंदमा० ततऐशान्यांव्याहृत्यनंतरं उद्बुध्य
धंबुधः सौम्योबुधस्त्रिष्टुप् मंत्रोते भगवन्सौम्यसौम्याकृतेसर्वज्ञानमयात्रिगोत्रमगधदेशोद्भ
रकुंकुमवर्णांगद्युतेचतुर्भुजखड्गखेटगदावरदानांकितकरपीतांवरमाल्यानुलेपनमरकता
भरणालंकृतसर्वांगविबुधपतेनमस्तेसत्वज्ञपीतध्वजपताकोपशोभितेनचतुः सिंहरथवा
हनेनमेरूपः प्रागच्छविष्णुप्रियबुधाभ्यांसहपद्मेशानदलमध्येस्वर्णप्रतिमामदङ्गुंलीवाणार
कारपीठेथितिनिष्टप्तजाथवा० तद्यामेतरयोरम्विष्णुमा० एवंमूःपुरुषमा० मीत्यावाऐंद्रेविष्णुमे
धातिथ्येविष्णुगीयः सहस्रशीर्षानारायणः पुरुषोनुष्टुप् मंत्रठयांतेकौमोदकी पद्मशावेचा
क्रोपेतचतुर्भुजोसौम्याधिदेवतांविष्णुप्रत्यधिदेवतांपुरुषंचावा० उत्तरदलेव्याहृत्यनंतर बृह
स्पतेगृत्समदोबृहस्पतिस्त्रिष्टुप् मंत्रोतोभगवन् बृहस्पतेसमस्पतिस्त्रिष्टुप् मंत्राते भगवन्बृ
हस्पतेसमस्तदेवताचार्यांगिरसगोत्रसिंधुदेशोद्भवदीप्तस्वर्णसदृशांगदीप्तिचतुर्भुजदंड
कमंडलुत्तमसूत्रवरदानांकितपीतांवरमाल्यानुलेपनपुष्परागमयाभरणारमणीयतम

स्तविद्याधिपतेनमस्तेसत्तउपीतध्वजेनपीताम्बरथेनमेरुः॰ आगच्छेंदब्रह्मभ्यांसहपद्मोत्तरदलम
ध्येस्वर्णप्रतिमायांमदग्रेवेदीदीर्घचतुरस्रपीठेधि॰ त्वामावाहयामि दक्षिणेबाहूत्यनंतरं इंद्रश्रेष्ठा
निशृत्समदइंद्रस्त्रिष्टुप्॰ मंत्रांते चतुर्दंतगजारूढंवज्रांकुशधरंशचीपतिंनानाभरणभूषितं बृहस्पत्य
धिदेवतामिंद्रमा॰ वामेबाहूत्यनंतरं ब्रह्मणातेब्रह्मयुजाविश्वामित्रोब्रह्मात्रिष्टुप् मंत्रांते॰ पद्मास
नस्थंजटिलंचतुर्भुजमक्षमालास्रुवपुस्तककमंडलुधारिणं कृष्णाजिनवाससंपार्श्वस्थितंहं
सबृहस्पतिप्रत्यधिदेवतांब्रह्माणमा॰ पूर्वदलेशुक्रंतेअन्यद्भरद्वाजःशुक्रस्त्रिष्टुप् मंत्रांते भार्गव
न् भार्गवसमस्तदैत्यगुरोभार्गवगोत्रभोजकटदेशोद्भवश्वरजतोज्वलांगकांतेचतुर्भुजदंडकम
डलुहस्तवरदांनाकिनशुक्लांबरमाल्यानुलेपनवस्त्राभरणभूषितसर्वागमसमस्तनीतिशास्त्र
निपुणमतेनमस्तेसत्तशुक्लध्वज॰ तेनशुक्लध्वजतेनशुक्लाश्वसहितेनरथेनमेहंप्रदः॰ आगच्छे
द्राणीद्राभ्यांसहपद्मपूर्वदलमध्येरजतप्रतिमायांमदग्रेवेदीपंचकोणपीठेधितिष्ठामि तदक्षिणे
बाहूत्यनंतरं इंद्राणीवृषाकपिरिंद्राणीपंक्तिः मंत्रांतेसंतानमंजरी वरदानयनंदिभुजां।
शुक्राधिदेवतामिंद्राणीमा॰ वामेबाहूत्यनंतरं इंद्रमिदेवतातयेमेधातिथिरिंद्रःप्रत्यधिदेवा। ३९

बृहती मंत्रान्ते चतुर्दंतगजारूढं वज्रांकुशधरं शचीपतिं नानाभरणभूषितं भार्गवप्रत्यधिदेवता
मिंद्रमाः पश्चिमदले· व्याहृत्यंते· शमग्निरिरिंविद्धिः शान्तिकल्लिकृ मंत्रान्ते भगवन् शनैश्चर भास्क
रतनय काश्यपगोत्र सौराष्ट्रदेशोद्भव कज्जलनीलांगकान्ते चतुर्भुज चापतूणीर कृपाणाभयांकित
नीलांबरमाल्यानुलेपन नीलरत्नभूषणालंकृत सर्वांग समस्तभुवनभीषणमर्षमूर्ते सन्नद्ध नील
ध्वजपताकोपशोभितेन नीलगृध्ररथवाहनेन मेरुं आगच्छ प्रजापतियमाभ्यां सह पश्चिमद
लमध्ये कालायसप्रतिमाप्रत्यग्रुंवीचापाकारपीठे तिष्ठ· स्मि दक्षिणे व्याहृत्यंते प्रजापते हिरण्य
गर्भः प्रजापतिस्त्रिष्टुप् मंत्रान्ते· यज्ञोपवीतिनं हंसस्थमेकवक्त्रमक्षमालास्रुवपुस्तककमंडलुस
हितचतुर्भुजं शनैश्चराधिदेवतां प्रजापतिम्मा· वामे व्याहृत्यंते· यमाय सोमं यमो २नुष्टुप् मंत्रा
न्तेर्ध्वपन्यीतं दंडहस्तं रक्तदृष्टिं पाशधरं कृष्णवर्णं महिषारूढं सर्वाभरणभूषितं शनैश्चरप्रत्य
धिदेवतायममा· नैर्ऋत्यदले व्याहृत्यंते· कयानो वामदेवो गाय· मंत्रान्ते भगवन् राहो रविसोमम
र्दनसिंहिकानंदन पैठीनसिगोत्र बर्बरदेशोद्भव कालमेघद्युते व्याघ्रवदन चतुर्भुज खड्गचर्मशूल
वरदांकित कृष्णांबरमाल्यानुलेपन गोमेदिकाभरणभूषित सर्वांगशोभितनिधेनमस्ते सन्नद्धक

पा·क·
३२
37

स्मधुजन्हुसमासि हरय· आगच्छ सर्पकालाभ्यां सह पश्चिमे नैर्ऋतदलमध्ये सीसकप्रतिमां दक्षिणामि
मां विशुर्पाकारपीठे धि· मिति हृक्षिणे· व्याप्तं त्वंते आयं गोः सार्पराज्ञी सर्पागा· मंत्रांते॥ ह्रस्वधरा
नकुण्डलिकाकारफुच्छफुत्कानेकभोगांगाश्रिभोगात्मीषणानूपाकपिदेवनाः सर्पाय· वामेव्याप्
त्यंते· परम स्पौस कुम्भ कोमरत्का त्रिष्टुप्· मंत्रांते करालवदनं नीलांगं भीषणं एक प्रत्यधिदे
वतां कालमा· वायव्यदले· व्याप्त्यंते· केनमधुच्छंदाः केनवा· मंत्रांते· भगवन् केतोका
मरूपजे मितिगोत्रमध्यदेशोद्भवस्य मवर्णाध्वजाकृते द्विभुजगदाधरवरदानांकित चित्रांबर
माल्यानुलेपन वैदूर्यमयाभरणभूषित सर्वांगा चित्रशक्ते नमस्ते स्वत्रद्ध चित्रध्वज· नेनचित्र
कपोतरथवाहनेन नमे रु· आगच्छ ब्रह्म चित्रगुप्ताभ्यां सह पश्चिमवायव्यदलमध्ये कांस्यप्रति
मां दक्षिणमुर्वी ध्वजाकारपीठे धि· मिह दक्षिणव्याप्त्यंते· ब्रह्मजस्तानेनकुलो ब्रह्मा त्रिष्ट
प्· मंत्रांते· पद्मासनस्थं जटिलं वक्त्रमुखमक्षमालास्रुवपुस्तककमंडलुधरं कुला
जिनवाससं पार्श्वस्थितं हंसकेतु धिदेवतां ब्रह्माणामा· वामेव्याप्त्यंते· सचित्रचित्रे भैरहा
नाश्विगुप्ता त्रिष्टुप् मंत्रांते उदीच्यवेषसौम्यदर्शनं लेखनीपत्रोपेतं द्विभुजे केतु प्रत्यधि ३२

देवतां चित्रगुप्तं स्मा· ततः ईशाने वामे व्याहृत्यंते· आतूनइंद्रक एवः कुसीदो विनायको गा· मंत्रांते
चतुर्भुजं त्रिनेत्रं गजाननं नागयज्ञोपवीतिनं चंद्रधरं दंडाक्षमालापरशुमोदकोपेतं विनायकं
स्मा· तद्दक्षिणे व्याहृत्यंते जातवेदसे कश्यपो दुर्गा त्रिष्टुप् मंत्रांते शक्तिबाणशूलखड्गचक्र
चंद्रबिंबखेटकपालपाशपरशुकंटकोपेतं दशभुजां सिंहारूढां दुर्गां रक्तदैत्यापहारिणीं दु
र्गां स्मा· तद्दक्षिणे· व्याहृत्यंते क्षेत्रस्य वामदेवः क्षेत्रपालोऽनुष्टुप् मंत्रांते धूम्रवर्णं त्रिलोच
नमूर्ध्वकेशं नग्नं दंष्ट्राभ्रुकुटीकुटिलाननं नूपुरालंकृतांघ्रिं सर्पमेखलया युक्तं सर्वांगमतिक्रु
द्धं दंष्ट्रं घंटावद्धगुल्फावलीं किंकिणीदाममालाधारिणं भुजगकौपीनं चंद्रमौलिं दक्षिणहस्ते
शूलवेतालखड्गडमरुडिंडिमान् दधानं वामहस्तैः कपालघंटाचर्मचापान् दधानं भीमं दिग्वाससं
ममितद्युतिं क्षेत्रपालं स्मा· तद्दक्षिणे व्याहृत्यंते काण्णशिष्टं सुक्षितो वायुहस्मिकं धावद्धरिणं
दृष्टगतं ध्वजे वरदानधारिणं धूम्रवर्णं वायुं स्मा· तद्दक्षिणे व्याहृत्यंते· आदिष्ठं स्तोनरीत्ता गाः।
नीलोत्पलाभं नीलांबरधारिणं चंद्राकोपेतं दिग्भुजं षष्ठमाकाशं स्मा· तद्दक्षिणे व्याहृत्यंते·
अश्विनावर्तिर्गीतमेमाश्विनावालिक प्रत्येकमोषधीपुस्तकोपेतं दक्षिणवामहस्ताभ्यां न्यसं

ग्रा॰क
२८

38

युक्तदेहावेकस्य दक्षिणपार्श्वे परस्य वामपार्श्वे रत्नभाण्डकरशुक्लाम्बरधारिनारीयुग्मोपेतौ देवभिषजा
वश्विनौ वा॰ ततो दलाग्रेषु इन्द्रादीन्· इन्द्रं वो मघवच्छन्दा इन्द्रो गाः स्वर्णवर्णं सहस्राक्षं वज्रपाणिं शचीप्रि
यमिन्द्रमा व्याहृत्या· अग्निमीले मधुच्छन्दा अग्निर्गा· स्वर्णवर्णं सप्तार्चिषं सप्तहस्तं शक्तिपात्रस्रुक्स्रुवा
तोमरव्यजनहस्तं पात्राणि दधानं स्वाहाप्रियं मेषवाहनमग्निमा· व्याहृ· यमाय सोमं यमोऽनुष्टुप्
रक्तवर्णं दण्डधरं महिषवाहनमिलाप्रियं यममा· व्याहृ· मोषुणो घोरः कण्वो निर्ऋतिर्गायत्री नी
लवर्णं खड्गचर्मधरं मूर्धकेशं नरवाहनं कालिकाप्रियं निर्ऋतिमा· व्याहृ· उदुत्तमं शुनःशेपः
शेपो वरुणो गा· रक्तभूषणं नागपाशधरं मकरवाहनं पद्मिनीप्रियं वरुणमा· व्याहृ· तव वायो व्य
श्वो वायुर्गा· धूम्रवर्णं हेमदण्डधरं कृष्णमृगवाहनं जगत्प्राणरूपं मोहिनीप्रियं वायुमा· व्याहृ·
सोम विश्वतो गोतमः सोमो गायत्री· स्वर्णवर्णं निधीश्वरं कुन्तपाणिं मनुष्यवाहनं चित्रिणीप्रियं कुबेर
मा· व्या· कद्रुद्राय कण्वो रुद्रो गायत्री· शुद्धस्फटिकवर्णं वरदाभयशूलाक्षसूत्रधरं वृषवाहनं
गौरीप्रियमीशानमा· कुम्भे वरुणं सर्वदेवतावाह्य ग्रहवर्णवस्त्रगन्धाद्यैः पुष्पान्तैः सम्पूज्याग्निप्रति
ष्ठादि चरुश्रपणान्ते स्रुग्यमग्निरुद्धं चाप्तकसंख्याकं समिद्वरीज्यैः सोममग्ने गौरीं च पलाशसमिद्भि २८

वाज्यैः अंगारकं भूमिं हंकं दक्षादिरसमिद्भिर्वाज्यैः बुधं विलंसुकरं पामार्गसमिद्भिर्वाज्यैः बृहस्पतेर्ब्रह्मा
णं मिं हूं चाश्वत्थसमिद्भिर्वाज्यैः शुक्रमिंद्राणीमिं दुमोडुंबरसमिद्भिर्वाज्यैः शनिं प्रजापतिं यमं शमीस
मिद्भिर्वाज्यैः राहुं सर्पान् कालं दूर्वासमिद्भिर्वाज्यैः केतुं ब्रह्माणं चित्रगुप्तं कुशैश्च वाज्यैः विनायकं दु
र्गां क्षेत्रपालं वायुमाकाशमश्विनौ इंद्रादींश्च प्रधानविधानेन पलाशसमिद्भिर्वाज्यैः अग्निं वायुं सूर्यं प्र
जापतिममकसंख्यया तिलव्रीहिभिः सूर्यं त्रयोदशवारमाज्येनाग्निं चतस्रिंशद्वारं रुद्रं द्वात्रिंशद्वा
रं शेषपादिष्टकृतमित्यादि निर्वापादिना चरुं कृत्वा वक्ष्यमाणे होमः गृहसिद्ध एव चरुरिति तं देव
नदाग्नावधिश्रित्याभिचार्योद्गृह्यासवर्हिषासाद्य प्रत्यभिचारणसंस्कारः सूर्यादिभ्यः प्रागुक्तमंत्रै
र्होमः मध्यमानामिकांगुष्ठैः मधाज्यैर्दधिक्षीरान्यतराक्तसमिद्धोमः हस्तेन ग्रासमात्रचरुहोमः
आज्यं स्रुवेणाश्वत्थपर्णेन वा व्यस्तसमस्तव्याहृतिभिस्तिलव्रीहिहोमः ततो मंत्रैराज्यहोमः प
ण्णः सूर्यो नक्षत्रिपंचानां वत्सः सूर्यो गायत्री उदुत्यं प्रस्कण्वः सूर्यो गायत्री नमो मित्रस्याभितपाः
सूर्यो जगती चित्रं देवानां कुत्सः सूर्यस्त्रिष्टुप् उद्धेति सभगः पंचानां वसिष्ठः सूर्यस्त्रिष्टुप् त्वमग्ने प्र
थमस्त्वष्टादशाचां हिरण्यस्तूपोऽग्निर्जगती अंत्याष्टमीषोलशीत्रिष्टुभः त्वमग्ने द्युभिरिति षोडश्या

शा॰क
३५

३५

नां गृत्समदो ऽग्निर्जगती कद्रुद्रायेषचो रः कण्वो रुद्रो गा॰ इमा रुद्राय तवसे इत्येकादशानां कुत्सा
रुद्रो जगत्यंत्यास्त्रिष्टुभौ आ ते पितर्मरुतामिति पंचदशानां गृत्समदो रुद्रस्त्रिष्टुप् ततो ग्रहादीनां धूपदीप
नैवेद्यादि पूजां कृत्वा स्विष्टकृदादि प्रायश्चित्तहोमांते समुद्रादूर्मिरित्यादिभिः पूर्णाहुतिं हुत्वा पूर्ण
पात्रविमोकादि समाप्य ईशान्यां पंचरंगस्वस्तिके पीठे कुशोपरि यजमानं सहेमकुशोदकं वरीशा
खपात्रे कुंभोदकैरभिषिंचेयुः आपो हि ष्ठेति नवभिः प्र सम्राजे इत्यष्टानामत्रिर्वरुणस्त्रिष्टुप् स्वा
दिष्ठयादशर्चानां मधुच्छंदाः पवमानसोमो गाः शं न इंद्राग्नी पंचदशानां वसिष्ठो विश्वेदेवास्त्रिष्टु
प् स्वादिष्ठयादशर्चानां मधुच्छंदाः पवमानसोमो गाः) पवित्रं ते विततं पंचानां पवित्रः पवमानो
सोमो जगती ग्रहाणामादिरादित्यो लोकरक्षणकारकः विषमस्थानसंभूतां पीडां दहतु ते
रविः १ रोहिणीशः सुधामूर्त्तिः सुधागात्रः सुधाशनः विषमस्थानसंभूतां पीडां दहतु ते वि
धुः २ भूमिपुत्रो महातेजा जगतां भयकृत्सदा वृष्टिकृद्दृष्टिहर्ता च पीडां दहतु ते कुजः ३
उत्पातरूपो जगतां चंद्रपुत्रो महाद्युतिः सूर्यप्रियकरो विद्वान् पीडां दहतु ते बुधः ४ देवमंत्री वि
शालाक्षः सदा लोकहिते रतः अनेकशिष्यसंपूर्णः पीडां दहतु ते गुरुः ५ दैत्यमंत्री गुरुस्तेषां प्रा ३५

णां दक्षमहामतिः प्रभुस्ताराग्रहाणां च पीडां दहतु ते भृगुः ६ सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रि-
यः मंदचारः प्रसन्नात्मा पीडां दहतु ते शनिः ७ महाशिरा महावक्त्रो दीर्घदंष्ट्रो महाबलः अतनुश्चोर्ध्वके-
शश्च पीडां दहतु ते तमः ८ अनेकरूपवर्णैश्च शतशोऽथ सहस्रशः उत्पातरूपो जगतः पीडां दहतु ते
शिखी ९ ततो हिरण्यवर्णामिति श्रीसूक्तेन मार्ज्याप इति त्रिभिर्देवस्य त्वेत्यनेन भूर्भुवः स्वरिति चाभि-
षिञ्चेद्यजमानो दिक्पालग्रहादिभ्यो माषभक्तबलीन्दत्वा गृहाणामुत्तरपूर्जाते व्याहृतिभिरु-
द्वास्याचार्यादिभ्यो जपहोमफलं गृहीत्वा धेनुं शंखं रक्तवृषं हेमपीनवस्त्रं छत्रं ताम्रकुंभं गां लोहं गजं
छागं वा सर्वाभावे हिरण्यं वा दद्यात्तां दत्वा कांस्यपात्रे आज्ये स्वरूपं रूपमिति प्रतिबिंबं विलोक्य : आज्यं
तेजः समुद्दिष्टमाज्यं पापहरं स्मृतं आज्यं सुराणामाहार आज्ये देवाः प्रतिष्ठिता इति सदक्षिणं
दत्वा एकाञ्शते शते सहस्रं वैकं यथाशक्ति वा विप्रान् संभोज्याशिषो गृहीत्वा पूर्णतां वाचयित्वा पर-
मेश्वरार्पणं कृत्वा संभुंजीत अयं वक्ष्यपरिशिष्टोक्तो वाह्नचात्रानियतः एवमन्यैः स्वशाखोक्ता-
स्वस्त एव वा कार्यः अन्यैः शाखान्तरस्थाः स्मार्तौ वा ३ अपस्तम्बो वक्तव्यात्तु लौकिकाग्नौ कार्यो न गृ-
ह्ये यद्यो गृह्योक्तस्तदभावे वा सर्वोपि गृह्योऽन्यनिरुक्तैः कातीयापि गृह्ये एवेति दिक् इति श्रीम

शां॰क
४॰

न्नारायणभट्टसूनुमहोपाध्यायरामकृष्णभट्टात्मजकमलाकरभट्टकृते शान्तिरत्ने नवग्रहयज्ञः ॥ अथ
प्रसवशान्तयः तत्र वज्ञप्रसवेषु तच्छान्तिर्भुचोक्ता त्वाज्ञोमृतप्रसवः उच्यते गर्गः प्राणिप्रसवर्विव
देप्रायश्चित्तमनुस्मरन् सर्वारिष्टविनाशाय यज्ञं ज्योतिर्णवे पितृरिष्टे स्तनारिष्टे मातृरिष्टे तथैव
च यत्र जातो यतो पित्रारिष्टे तत्रैव कुर्यादित्यर्थः प्रायश्चित्ते न कुर्यात्तत्र दोषस्य शान्तये भूयाश्विनोर्ध्व
दोसर्पमथाश्विन्ये इमूलभे पञ्चकर्मस्वेषु जातस्य कुर्याज्ञोजननं तथा तथाशक्तःसमस्तयार्थः तेन पि
तृरिष्टादौ तत्र ज्वरादि शान्तिं कृत्वा एतच्च कुर्यादित्यर्थः पितृरिष्टोक्त्यैनैवं मूलादावपि प्राप्तेः पुन
र्मूलादिग्रहणं यत्र मूलादेश्चतुर्थपादादौ तदभावस्तत्रापि प्राप्त्यर्थं जन्मादेवा त्रिजन्मदेशुभ
वारशुभे दिने कृत्वाभ्यंगादिकं सर्वं गृहालंकारपूर्वकं गोमयेनोपलिप्याथ गृहस्येशानभाग
के पंकजं कर्णिकायुक्तं रजोभिः सुतवर्णकैः व्रीहिस्तत्र विनिक्षिप्य पत्राचित्तानसारतः न
वसूर्पं च तन्मध्ये रक्तवस्त्रं प्रसारयेत् स्थापयित्वा शिशुं तत्र पुमः सूत्रेणावेष्टयेत् प्राङ्मुखमवाङ्मु
खं तिलगर्भगतं शिशुं गोमुखं वर्णयित्वा पुत्रं जातं तु गोमुखात् विसृज्यौनि मिस्रुक्तेन
गवेन स्नापयेच्छिशुं गवां मंगलसंस्पर्शात् विसर्गः देवमंत्रेण गोपस्थं तत्र बालकं आ ४॰

चार्यस्तस्समादायपञ्चन्मात्रेदद्देत्तदा मातानजचन्यभागस्याशिशुमानीपतं स्रवेत् ततः पित्रेनदाद
यात्ततोमात्रेप्रदापयेत् वृद्धसंस्थाप्यतत्पिता पुत्रस्य मुखमीक्षयेत् गोमूत्रेण मयेन्नीरंदधिसर्पिस्तु
संस्कृतं आपोहिष्ठादिभिर्मन्त्रैरभिषिंचेत्ततः शिशोः मूर्ध्नि चाघ्राय तत्पुत्रं तन्मन्त्रेणेन दापिता अङ्गादङ्गात्सं
भवसि हृदयादधिजायसे आत्मा वै पुत्रनामासि स जीव शरदः शतं मूर्धनि विरवध्रापनं शिशुस्या
पयेत्ततः पुण्याहं वाचयेत्पश्चाद्ब्राह्मणैर्वेदपारगैः दरिद्रायाथ विप्राय तांगामभ्यर्च्य दापयेत् गो
वस्त्रस्वर्णधान्यानि दद्यादर्कादितः क्रमात् यथाशक्तिधनं दद्याद्ब्राह्मणेभ्यस्तदा पिता ततो हो
मं प्रकुर्वीत स्वस्वशाखोक्तमार्गतः उल्लेखनादिकं कृत्वा चाज्यभागान्तमाचरेत् होमस्य ईशानदि
ग्भागे धान्योपरि शुभं घटं पंचगव्यं घटे स्थाप्य तिलांस्तत्र विनिक्षिपेत् क्षीरिद्रुमकषायांश्च पंच
रत्नानि निक्षिपेत् कषायान्तिर्यामः वस्त्रयुग्मेन संवेष्ट्य गंधादिभिरथार्चयेत् विघ्नेश्वरं गणमभ्य
र्च्य प्रतिमां स्वविधानतः यत इन्द्रादिभिर्मन्त्रैः कुम्भस्थं णाभिमन्त्रयेत् यतरंदेति षड्भिश्च सूक्तशो
षः दधिमधाज्ययुक्तेन होमं कुर्यात्प्रयत्नतः युक्तेनेति भावेक्तः योगेनेत्यर्थः आपोहिष्ठेति ति
सृभिरस्य मे सोमरत्यर्थ नाधिसोः परमं पदमस्तीभ्यां नेतिसूक्ततः अग्राभिराभिः प्रत्यं च चाष्टा

ग्रा॰क॰ विंशतिसंख्यया अशक्तावष्टसंख्येवा दधिमध्वाज्यसंयुतं आदित्यादिग्रहाणां च होमं कुर्यात्समंत्रकं
४१ ग्रहाणां च दध्यादियुतं होमं कुर्यादित्यर्थः अन्यथा पुनर्दध्यादिग्रहणस्य वैयर्थ्यापत्तेः अथ प्रयोगः
कर्तास्य बालकस्यामुकनक्षत्रोत्पत्तिसूचिता रिष्टशांत्यर्थं गोमुखप्रसवं करिष्य इति संकल्प्य गणे
शं संपूज्याचार्यं वृणुयात् आचार्यः श्वेतद्रौणैः पद्मं कृत्वा तत्र व्रीहीन् शूर्पे रक्तवस्त्रे तिलान् विकीर्य
शूर्पे प्राङ्मुखं शिशुं निधाय सूत्रेण शूर्पं वेष्टयित्वा शिशुसमीपे गोमुखमानीय प्रसवं विभाव्य वि
सृयोनिमिति सूक्तेन पंचगव्येन शिशुं स्नपयित्वा गयामं गोष्ठिति मंत्रेण गां स्पर्शयेत् ततो विप्राः
श्रेष्ठेनतिशिशुमादाय मावेदद्यात् मातापित्रे ततः पिता मात्रे दत्वा पुत्रमुखमीक्षेत ततः आचार्यः
शिशुं पंचगव्येनापोहिष्ठेति तिसृभिरभिषिंचेत् ततः पिता अंगादंगादिति शिशुमूर्धनि त्रिरवघ्रा
यस्य गोमुखप्रसवस्य पुण्याहं भवंतो ब्रुवंत एवं ऋद्धिः श्रीः कल्याणमिति त्रिस्त्रिर्वाचयित्वाचार्या
यतां गां दत्वा ग्रहप्रीत्यर्थं गोवस्त्रसुवर्णधान्यानि यथाशक्ति भूयसीं च दद्यात् ततः आचार्योऽग्निं प्रति
ष्ठाप्याचाधानेन च चक्षुषी आज्येनेत्यंतमुक्त्वा अत्र प्रधानं अप्सुत्ववीरं दधिमध्वाज्येन विसृस ४१
कृतयत्महणं अग्नी भ्यामिति सूक्तेन प्रत्यृचमष्टाविंशतिसंख्यया अष्टसंख्यया वा ग्रहानेके

कृपाज्ञत्याशेषेण स्विष्टकृतमित्यादि आज्यभागांते अग्नेरीशान्यां कुंभं संस्थाप्य तत्र पंचगव्यं तिलान्
ह्रीरिङ्गमकषायांश्च निक्षिप्य वस्त्रयुग्मेनावेष्ट्य पूर्णपात्रेण ह्रींसोरिति विसंतत्वायामीति वरुणं चावा
ह्यसंपूज्य कुंभस्थं ह्रीं जपेत् यत इंद्रेति षट्कण्वपुत्रः प्रगाथं इंद्रो वा हंतं प्रगाथं छंद एतानज्ञा
यजमानेनेत्याशेहृते मिलिते दधिमधाज्यैः प्रत्यच महाविंशति संख्यया पाद संख्यया वाज्ञऊपा
त् आपोहिष्ठेति तिसृणां सिंधुद्वीप आपो गा॰ अस्य मेमेधातिथिनापोनष्टुप् नद्विसोमे धाति
थिर्विसृगाग्रदीभ्यामिति षट्विहृहा यज्ञहानुष्टुप्॰ एतैर्गृहमेधैस्रुद् दधिमधाज्यं हत्वा स्वि
ष्टकृदादिशेषं समाप्य ब्राह्मणान्भोजयेत् इति गोमुखप्रसवप्रयोगः अथातिथिनक्षत्रयोग
क्रमेण प्रसवयोनयः उच्यन्ते तत्रादौ गंडांतः स त्रिविधः तिथिलग्ननक्षत्रभेदात् गंडांतो नाम
संधिघटिकाः स चोक्तो ज्योतिर्निबंधे॰ पूर्णानंदाख्ययोस्तिथ्योः संधिर्नाडीद्वयं तथा गंडांतं मृत्यु
दं जन्मयात्रोद्वाहव्रतादिषु कुलीरसिंहयोः कीटचापयोर्मीनमेषयोः गंडांतमंतरं मृत्युदं जन्मयात्रोद्वा
हव्रतादिषु कुलीरसिंहयोः कीटचापयोर्मीनमेषयोः गंडांतमंतरालं स्याद्घटिकार्धं मृतिप्रदं
सार्पेंद्रपौष्णभेष्वंत्यषोडशांशा भसंधयः तदग्रभेष्वाद्यपादा भानां गंडांतसंज्ञकाः रत्नमालायां

शा॰क॰ ततस्तेषु यथोक्तं पौष्णाश्विन्योः सर्पपित्र्यर्क्षयोश्च यच्च ज्येष्ठामूलयोरंतरालं तद्गंडांतं स्यात्त्रितयं तदूडिके
४२ ह्यायाज्जन्मोद्वाहकालेष्वनिष्टं अत्र दोषतारतम्यं ज्ञेयं रत्नसंग्रहे सर्वेषां गंडजातानां परित्यागो वि
धीयते वर्जयेद्दर्शनं यावत्तच्च षाण्मासिकं भवेत् तिथ्यृक्षलग्नगंडे पितृमातृनाशोऽल्पे तु संधौ तनय
स्य नाशः सर्वेषु नो जीवति हंति वा स्वजीवन् पुनस्तादृक्षवारणाद्यः प्रयोगपारिजाते गर्गः अ
श्विनीमघमूलादौ त्रिघटीनवनाडिकाः रेवतीसार्पशाक्रांते मासाश्च कर्कसायकाः अश्विनीमघमूलादौ
नाडिकाद्वितयं तथा रेवतीसार्पपाक्रांते नाडिकाद्वयमेव हि अश्विनीमघमूलानां एवार्धे वाध्यते पि
ता पूषाहिशाक्रपश्चार्द्धे जननी वाध्यते शिशोः पितृवच्च दिवा जातो रात्रिजातस्तु मातृहा दिवसं
गंडांतजातस्यार्थः प्रातस्संध्योकसध्ययोर्जातो नास्ति गंडे निरामयः सर्वेषां गंडजातानां परित्यागो वि
धीयते वर्जयेद्दर्शनं यावत्तच्च षाण्मासिकं भवेत् तस्य शांतिं प्रवक्ष्यामि सोममंत्रेण भक्तिमान्
कांस्यपात्रे प्रकुर्वीत पलैः षोडशभिर्नवं अष्टाभिश्च चतुर्भिर्वा द्वाभ्यां वा शोभनं तथा तन्मध्ये पायसे
पात्रे नवनीतेन पूरिते राजतं चंद्रमं चैव सितपुष्पसहस्रकैः देवतः सोमवासालंकृतं माल्यवा ४२
राचितः सोमोऽहमिति संचिंत्य पूजां कुर्याद्दिने दिनेः जपेत्साहस्रकं मंत्रं श्रद्धयानः समाहितः प्रा

प्यायस्वेतिमंत्रेण पूजां कुर्यात्समाहितः दद्याद्देदक्षिणां मिष्टां गंडदोषप्रशांतये शुक्लं वा गोवृषं वै
वत्सं स्वपात्रसमन्वितं गंडदोषोपशांत्यर्थं दद्याद्वेदविदे शुचिः ज्योतिर्विदे विधेयः पतद्दैनेपि क्रमेण
कैः कुंकुमं चंदनं कुष्ठं गोरोचनमथापि वा हुतशेषं शुक्लं भेषु च तदुष्प्रदद्याद्गोत्क्रमात् सहस्रा
क्षेण मंत्रेण बालकं स्नापयेत्ततः पितृमुक्ते दिवा जातं मातृमुक्ते तु रात्रिजे स्नापयेत्पितृमातृभ्यां
संध्ययोरुभयोरपि कांस्यपात्रे हुतशेषं गंडदोषोपशांतये सक्षीरमौक्तिकं प्रक्षिप्य तत्र वस्त्रयुगं सु
मं यजुर्वेदविदे दद्यात् गंडदोषापनुत्तये दद्याद्धेनुं हिरण्यं च ग्रहांश्चापि प्रपूजयेत् आयुर्वृद्धिकरं
जप्यं कुर्याद्ब्राह्मणतर्पणं गर्गोक्तनक्षत्रेश्वरेति अत्र गोमुखप्रसवो ग्रहशांतिश्च कार्या अन्यत्स्पष्टमिति॥
प्रयोगो नोच्यते इति गर्गोक्तनक्षत्रगंडांतशांतिः अथ तिथिलग्नगंडांतशांतिः शांतिरत्ने गार्ग्यः अ
भुक्ते तज्जातस्य सूतकांत्यदिने अथवा शांतिं शुभेह्नि वा कुर्यात्तावत्पुत्रं न लोकयेत् तिथिगंडे त्वनडुहा
हं तत्र तत्र धेनुरुच्यते कांचनं लग्नगंडे तु गंडदोषा विनश्यति अथ भागोपि तु गंडस्य ब्राह्मणानभिष
चनं मातापितृशिशूनामिति सर्वाः उत्पन्नानि च विज्ञाय पूर्वाषाढाभवस्य च कुर्याच्छांतिं प्रयत्नेन न
क्षत्राकरंजांत्रयः तामेवाहास्वर्णेन नदर्पेणपथाविनावसारेनः नक्षत्राधिपतेरूपं कृत्वा वा वस्त्रद्वया

शा॰क॰ ५३ त्विंत वरुणस्यार्चनं कार्यं स्वस्तिवाचनपूर्वकं कुंभे वरुणं नक्षत्राधिपतिं च पूजयेदित्यर्थः शांतो
षधानि रत्नानि मृत्तिकापल्लवसंयुतो पूजांते समिदाज्यैर्होमं तिलयवैस्तथा ततः पूर्णाहुतिं कृ
त्वा वेदाध्यायिकुटुंबिने उत्तराषाढप्रथमे पादे तिलपात्रं तथैव च निष्कत्रयं सवत्सां च सुशीलां च पय
स्विनीं ब्रह्मणाय द्वितीयास्तवै दद्यात् सुवर्णं षोडशकांचनं पंचाशद्व्रीहिमाषांश्च तिलमष्टान्नं प्रदापये
त् यथाविभवानुसारेण कुर्याद्ब्राह्मणभोजनं पितरापुष्पवृद्धार्थं शांतिरत्र विधीयते एवं यः कु
रुते सम्यक् शांतिकर्म समाहितः आयुरारोग्यमैश्वर्यं संप्राप्नोति दिने दिने इति तिथिलग्नगंड
त शांतिः अथ दिनक्षयादिशांतिः उत्तरगार्ग्यः अथातः संप्रवक्ष्यामि जन्मकाले विशेषतः गं
डांतानां च नामानि महादोषकराणि च दिनक्षये व्यतीपाते व्याघाते विष्टिवैधृते शूले गंडे अति
गंडे च परिघे यमघंटके कालगंडे मृत्युयोगे दग्धे दारुणे तस्मिन्नाडदिने शुभः प्रसूतिर्यदि जाय
ते अतिदोषकरी प्रोक्ता तत्र पापयुते सति दिनक्षयादौ गंडांते शाक्षाद्गोगणः यजनं देवतानां च ग्र
हाणां चैव पूजनं दीपं शिवालये भक्त्या घृतेन परिदापयेत् अभिषेकं शंकराय पञ्चाक्षरस्य प्र
दक्षिणं आयुर्वृद्धिकरं जप्यं सर्वारिष्टविनाशनं मृत्युंजयमंत्रस्य प्राशुः शिवपूजनतस्तथा देवज ५३

यमित्यर्थः गुरुदैवतविप्राणां पूजनं गोत्रवर्धनं सर्वारिष्टहरार्थाय प्रग्रहयत्नं समाचरेत् पि
वायविधिवद्भक्त्यादीपदानं करोति यः ध्रुवं दुर्गो हते नैव स वै मृत्युंजये नरः विस्मृतिमहाप
एपमष्टत्यश्रीकरं सदा प्रदक्षिणं नरो भक्त्या यः करोति नरोत्तमः अकालमृत्युंजित्यदी " वाय
ते नरः गाणपत्यं पुरुषसूक्तं सौरं मृत्युंजयं शुभं शांतिजाप्यं रुद्रजाप्यं कृत्वा मृत्युंजयी भवेत् मू
ले वा सार्पगंडे वा कुर्यादेतानि यत्नतः आयुर्वृद्धिकरार्थाय गंडदोषप्रशान्तये एषां मूलादिशां
त्या समस्तु यः इतिगंडांतशांतिः अथ विषघटीशांतिः तास्त्वाह ज्योतिर्निबंधे बृहद्गर्गः निधीषुनागा
द्रिगिरीणवारिधिगजाद्रिदिक्पावकदिक्कुमासस्कराः मता ९ ५ ८ ७ ७ ११ ४ ८ ७ १० १२ ७८
ष्टसंख्याः प्रथमातिथेः क्रमात्स्यरे विषाख्यं घटिकाचतुष्टयं विशाखतर्क्षादशादिक्पौलावाणाश्चतत्त्वा
नि यथाक्रमेण २० ४ १२ १० ७ ५ २५ सूर्यादिवारेषु भवंत्यनंतरं नाडो विषाख्ये घटिकाचतुष्ट
यं नक्षत्रेष्वाह नारदः स्वमार्गिणा ५० वेदपक्षा २४ स्वरामा ३० माव्योमसागराः ४० वार्धिचंद्रा १४ रू
पदस्रा २१ स्वरामा ३७ व्योमवाहवः २० द्विरामा ३२ स्वाग्नयः ३० शून्यदस्रा २० कुंजरभूमयः १८
रूपपक्षा २१ व्योमदस्रा २० वेदचंद्रा १४ श्रुतदश १४ शून्यचंद्राः १० वेदचंद्रा १४ षट्पक्षा ५६ वेदबाहु

शा॰क॰ ५५

वः २४ शून्यदस्राः २० शून्यचंद्राः १० शशिचंद्राः ११ नागेंदवः १८ तर्कचंद्राः १६ वेदपक्षाः २४ स्वरामाः ३७ अश्वा
श्विभात् क्रमात् आभ्यः परास्फटिकाश्च नक्षत्रविषसंस्थिताः शांतिमाहुर्बृहद्गर्गाः दिवनाडीषु संजा
तस्सर्वारिष्टभयप्रदा पितृमातृलमात्मानं वा तयेच्चात्र संशयः मानुषश्चविषशस्त्राद्यैः क्रूरैलग्नेऽथवा गो
पि वा तद्दोषपरिहाराय शांतिकर्म समाचरेत् रुद्रोऽपमोऽग्निर्रसाश्च देवताः परिकीर्तिताः सुवर्णेन य
थाशक्त्या तेनाश्वचरणलक्षिताः प्रतिमाः कारयित्वा तु आढकव्रीहिभिः स्थले स्थंडिलं परिकल्प्याथ कुं
भमोषधिसंयुतं जलैः संपूर्य संस्थाप्य मृदादिप्रलिप्ततः वस्त्रद्वयेन संवेष्ट्य पंचरत्नानि निक्षिपेत्
कुंभोपरि तु संस्थाप्य चतस्रः प्रतिमास्तथा संस्थाप्य तत्तन्मंत्रैश्च गंधपुष्पोपहारकैः कद्रु
द्रायेति मंत्रेण यमाय सोमममित्यथ अग्निर्मूर्द्धेति मंत्रेण परं मृत्यो भवत्विति पतैश्च तु अभिमंत्रा
श्च क्रमाद्वैडूनेन तथा समिद्भिश्च तद्वयोः प्रत्येकं च यथाक्रमात् अष्टाभिश्च सदाचार्योऽजनेदष्टसहस्र
कं अष्टोत्तरशतं वाथ अष्टाविंशतिमेव वा ततस्तिलेऽजनेद्देवास्तन्मंत्रैश्च सहस्रवित्
ततो अभिषिंचयेद्देवं मंत्रैः पौराणिकैः क्रमात् श्रीयतां भगवानीशः पिनाकी सर्वतो
भवः तवप्रतिप्रदानेन मम पापं विनाशय पिंगभ्रूः यमश्च केशांतः मा... सूत्रकमंडलुः ५५

सप्तार्चिः शक्तिधरीच मम पापं व्यपोहतु दंष्ट्राकरालवदनो नीलांजनसमाकृतिः रक्ताक्षोसितदा
णिर्मृत्युर्मायान्तु सर्वदा दानमेवं विधैर्मन्त्रैर्यथाविधिसमाहितः गोभूहिरण्यवस्त्रैश्च आचार्यं पूज
येत्सुधीः एवं कुर्याद्विधानेन विघ्नदोषः प्रशाम्यति इति विघ्नचटीशान्तिः अथ तिथिप्रसवशा
न्तयः तत्र कृष्णचतुर्दशीजातशान्तिः प्रयोगपारिजाते उत्तरगर्गः कृष्णपक्षे चतुर्दश्यां प्रसूतेः षड्विधं
फलं चतुर्दशीं च षड्भागां कुर्यादादौ शुभं स्मृतं द्वितीये पितरं हन्ति तृतीये मातरं तथा चतुर्थे मातु
लं हन्ति पंचमे वंशनाशनं षष्ठे च धनहानिः स्यादात्मनो वंशनाशनं तस्मात्सर्वप्रयत्नेन शान्तिं कुर्या
द्विधानतः आचार्यमृत्विजो हुत्वा स्वस्तिवाचनपूर्वकं रुद्राधिदेवतातस्याः कर्षमात्रसुवर्णतः तद
र्धार्धेन वा कुर्याद्वित्तशाठ्यविवर्जितः प्रतिमां कारयेच्छंभोः सर्वलक्षणसंयुतां वृषभे च समासीनं
वरदाभयपाणिनं शुद्धस्फटिकसंकाशं श्वेतमाल्यांबरान्वितां त्र्यंबकेनमंत्रेण पूजां विधानतः स्था
पयेद्वरुणं कुंभं आप्तदिक्षु यथाविधि आग्नेयीमारभ्यादिक्ष्वितरयोः आग्नेयकुंभमारभ्येत्यग्रे दर्श
पारेण कुर्याद्विधानेरुद्राणां यज्ञवैनसंमितमित्युक्ते अणवहत्परापारोक्तः कानीयानां विशेषः ३
षेवादिषु लिवव्रतानितेषु याः क्रियाः दशप्रणवयुक्तास्ताभूर्भुवःस्वरितीतिच दशप्रणवा· द्वेधा आदौप्र
णवमुच्चार्य व्याहृतीः प्रणवान्विताः मंत्रादौ प्रणवः कार्यो मंत्रान्ते प्रणवः पुनः ततो व्याहृतिसंयुक्ते
तेनेच प्रणवः सदैवैकः पदः अन्यस्तु आदौ प्रणवमुच्चार्य सर्वा व्याहृतयस्ततः मंत्रादौ प्रणवः कार्यमिशंते ९८

प्रणवः पुनरिति तथा मनोज्योतिरवोध्याग्निर्मूर्धानं च मर्माणि ते मानस्तोक इति यितत्त्वमं पंचकं स्म
रेत् नमो घाने रुद्रेत्याद्यैरपर्यन्न्यासं दशाक्षरस्य वर्णान् हिमोयं ज्ञातारमित्याद्यैः संपुटं वौधायनवज्रत्वा हृ
सद्ग्रामादि दिशां पालान् प्राच्यादिषु स्मरेद्यथा रौद्रीकरणमेतद्देहकृत्वा पापात् प्रमुच्यते इत्याद्युक्त्वा पं
चास्यं सौम्यमात्मानं सर्वाभरणभूषितं मंगलाक्षतमर्द्धानं भुजस्फटिकसन्निभं फणामहस्त्वविस्फूर्जद्
रेगेंद्रोपवीतिनं समार्चिवज्वलज्वालजटाजूटकिरीटिनं सहस्रकरविभ्रामनन्तखड्गादिविभूषितं
देदीप्यमानं चंद्रार्कज्वलदग्नित्रिनेत्रिणं जगद्धार्थियकृत्तारदंचंचडमरुधारिणं केयूरवहनागेन्द्रमर्द्धार
त्नविराजितं मेखलाकिंकिनीमालामुक्ताहारविराजितं चवैराव्यक्तनिर्गीछक्षंभीरारावनूपुरं सहेम
पट्टीताम्रव्याघ्रचर्मोत्तरीयकं दिव्यदेवतासमायुक्तं सरासुरनमस्कृतं द्विजोध्यायेवमात्मानं सम्यक्
हृद्ग्रस्वरूपिणं संप्रयस्त्वात्तरायः सत्ततनोयजनमारभेत् अग्नालिमेसृण मेचदेशेगोचर्ममात्रके स्थं
डिलेभुजमालिप्यमंत्रामालिप्यंतप्रनः दधात्तरमित्यर्थ्यैः तत्रपूजादिकं कुर्यात्तमः शंभवेयेति च य
त्नेतेनैकादशकलशस्थापनमस्त्वा तत्र पूजनं रुद्रैश्चाभिमंत्रणमुक्तं तत्काम्यप्रयोगात तत्र हृद्गा
गतत्त्ववक्ष्यामः मानोमहान्तमिति चातिहमंत्रं स्मरेद्विजः दशान्तरेणमंत्रेण दद्यात्त्र्यापाद्यं केशिजः

ग्रं·क·
१७७

न्यासमंत्रैश्चसोंकारैर्मानस्तोकइतिवापि गंभवायेतिमंत्रेणदद्याद्गंधोदकादिकं एवमेवधूपदीपादीन्
यथालाभंनिवेदयेत् दद्यान्नरेणतेनैवनमस्कुर्यात्ततोद्विजः शिवानस्यनहृद्देशेनरनारायणोस्मता
शिरः प्रभृषस्तेंकचापीवसंकल्पकंचरेत् कवचंचाप्रतिरथंनेत्रंविभ्राड्बृहत्स्मृतं शांतरुद्रियमस्त्रं
चदेवस्यास्त्रंप्रकल्पयेत् शांतरुद्रियंरुद्राध्यायं अथातः शांतरुद्रियंजुहोतीतितस्यैवशांतरुद्रियश
ब्देनाभिधानात् एवंतैत्तिरीयाणामपि महार्णवस्तुनमस्तेरुद्रइतिशांतरुद्रियंवदन् ध्यानएवच
पंचांगानिस्मरेद्दशप्रणवंचजपेद्विजः पंचांगानिसद्योजातादीनि हेमाद्रौचैवं उक्तन्यासप्रणवेनशांतिकि
रेणविसर्जयेत् एवंपूजांकृत्वाजपंकुर्यात् तत्रैकादशिन्यांचमकंविशेषवद्रुद्राध्यायमात्रमेकादश
धावृत्तिः एकादशगुणान्जपित्वाहृदंजांव्रजेदिति बृहत्पराशरोक्तेः रुद्रमात्रजपोक्तेः चमकानांचरु
दशावृत्त्याचत्वाभावादितिकेचित् तन्न अस्यप्रयोगांतरत्वाद्बृहदेकादशिनीमहारुद्रादिप्रकारान्
क्तेः नपमाशेत्क्वाहोममंतदप्रसंगात्सर्वोपसंहारेणप्रमेबाधकाभावाच्च अन्येतुसर्वचमकानांएकस्यावृत्तिजप
माकः ततनिर्मूले नेनवोधायनहेमाद्र्यादिसंवादात्त्वाएवानांकातीयानामष्टावनुवाकानुवाकानेकाद
शधाकृत्वाअन्यहस्येकभागेयाजपेदित्येवसाधु एवंहोमेपि चमकविभागस्तुआदौचत्वारोनुवाकाः १७७

नेष्वावाश्चश्च मे इति चतस्रः सत्यं च म इति चतस्रः ऋतं च मे इति चतस्रः अश्मा च म इति । तिस्रः इति प्र
थमः अग्निश्च म इन्द्रश्च मे इति तिस्रः कण्डिकाः इति द्वितीयः अंशुश्च मे इति तिस्रः इति तृतीयः अग्निश्च
मे घर्मश्च मे इति चतस्रः एका च मे तिस्रश्च मे इत्येका इति पंचमः चतस्रश्च मे ऽष्टौ च म इत्येका इति षष्ठः
अविश्च मे ऽवी च मे इति द्वे इति सप्तमः वाजाय स्वाहेत्येका इति अष्टमः आयुर्यज्ञेन कल्पतामिति
द्वे अयं ते नव इति नवमः अथ वसोर्धारां जुहोति सप्तकमिदं च मे इति चमकानुवाका इति दशमः
स्तोमश्च यजुश्चेत्येकादश अत्र समाप्तं अथार्धेन्द्राणि जुहोति अथ ग्रहान् जुहोति अथैनानि यज्ञक्रतू
न् जुहोति अथैतानयुक्स्तोमान् जुहोति अथायुजः स्तोमान् जुहोति अथ युग्मतो जुहोति अथ व
योसि जुहोति अथ नामग्राहं जुहोति अथाहे पेतराट् अथ कल्पान् जुहोति अथाह स्तोमश्च यजुश्चे
त्यादयः ऋतपोऽजाश्चतीति दिक् अयं हि ऋमाव कोदशाधा विभाग एतद्विषय एव विषयान्त
राभावात् न त्वेतभागेषु वाकत्वाभावात् चमकानुवाकेषु कमेके याजयेदिति वोधायनसूत्रे हे ।
मास्यादावनुवाकानवधेरेण भागहारयोगात् अष्टमानुवाकस्यैव प्रयाजे कादशानवकपालं मंत्रसं
त्यस्य नवकपाल इवाभ्यासः अतएव दशमेध्याये एकविंशात्मातिरात्रेणेत्यादि स्तोमविहृतौ चपटेन्यो ।

यां·क
१७८

सन्नादावायेनसंख्यापूरणामुक्तं यत्तत्त्वत्राप्रसिद्धं तत्र प्रयाजादिनाम्नाभ्यासेनैवपूरणामुक्तं आपस्तं
बस्तुवेष्यंतालोपोविहाद्विर्वैस्तुक्तं यत्तस्यैववमकानुवाकस्यत्रिरभ्यासोयुक्तः अष्टाकपालमंत्रस्यैंद्रा
ग्नेरव सामिधेनीहड्डोस्तोमहड्डोवपकविंशति तत्तद्भूयादितिवदन्यत्रमकाप्रसिध्यागमवायेप्रयाजे।
काद्शतवदभ्यासस्यैवप्रामेरंतालोपोविहाद्विर्यैन्यापस्तवोक्तेश्च यत्तकातीयाः काण्वास्तुपरभ्राता
मीयपदेति सांगमायंजपेऽइदं वेवलानिववानवे सांगसपीथिकंचोत्पत्तिरंगमिमिकेचनेतिकेचि
नू. श्रस्येत्तसंपुटेमानामावात्मणमाहुतिवदादावंगालितत्तोहुदहन्याज्ञ तदवचनामावात्रिर्मूल
मधपरंपरामात्रस्तुपेदं तथा शिवसंकल्पंहृदयंसूक्तंस्यान्योकधुपशिवः प्राज्ञतोरायणीयंहि
णिवांतस्योत्तराधिपं अत्र्यः संभूतश्रुतनरनारायणमित्यर्थः आशुः शिशानः कवचंनेत्रंविधाद्व
हस्तं यातरुद्रीयमसंस्यात् षडंगक्रमईरितः हृच्छिरस्त्वशिखाकर्मनेत्रंचास्त्रमसमते प्राज्ञ
विधित्वाहृदस्यषडंगानिपाशसूत्रतः अत्रमूलेहृदयरामारोक्तंप्रागुक्तंपद्यामषिदेवतछंदा
सितेनैवोक्तानिहृदयरामाणः अतात्वानिलावाणिपयवान्यासमिचोविवा भभवायैतिजगया
सर्वस्तान्याज्यसिक्तवात् पंचपंचाणघडापा अष्टावात्येवशाथिवा दपादशेका: दपावाजक

यात्माथकोद्विजः जपतर्पणहोमाद्यैरुच्चैर्योयोवत्सरंजपेत् अथप्रयोगान्तराण्याह अथातःसि
द्धिकामःसन्कंदमूलफलाशनः गोमूत्रपावकक्षीरदधिशाकाज्यभोजनः हविष्यभोजनोवासो
विप्रोमूत्रयत्रभोजनः जपहोमादिकुर्वाणोयथोक्तफलभाग्भवेत् शिरसासहरुद्राणांजप्तैकाद
शिनीध्रुवं सर्वेमंत्राभवंत्यस्यब्राह्मणस्योक्तकारिणः एकादशाग्रभानुक्तंभानू आलभ्यविधिव
त्तान् सहिरण्यांस्तवस्त्राश्रुफलपुष्पोपशोभितान् गंधोदकादिनैर्युक्तान्पूजयेद्रुद्रभक्तितः अ
थैकादशाभीष्टदैरेकैकमभिमंत्रयेत् एवंसंपूज्यतान्कुंभान्नमस्कृत्याभिमंत्र्यच एकादशाहमात्मा
नमभ्यंचाहितकाम्यया विनायकोपसृष्टोवास्नापयेत्कामकपड्तं मनवस्त्राकाकवंध्यांस्नापयेच्च
तथाहवं अनड्वाहंचवस्त्रंचदद्याद्धेनुंचदक्षिणां भोजयेद्विजमुख्यांविप्रान्समाप्तेकर्मणोद्विजः नमोग
णाभ्यश्चत्यस्यमंत्रस्यब्राह्मणोयुतं जप्त्वाचश्रीफलैर्हुत्वासर्वाकार्येषुसिद्धिभाक् नमोअस्तुनीलग्रीवा
येत्येतन्मंत्रेणसप्तवा आवर्त्योदकमामंत्र्यविषार्तेश्रवणेजपेत् विषेणमुच्यतेसद्यःकालदष्टोपि
जीवति शाहयस्तिनथाप्रेतरक्षःकाषाकिनिदर्षितेभ्रमेचधत्वनरतिभस्मनासर्षपैस्तथा ताड
येन्नंचमंत्रेचेतिपीडाप्रेमेवविमंचति ॐनमःशंभवेत्यस्यमंत्रास्त्ववाप्नुनेद्विज जप्त्वावेदिरसमिधां

गां·क
१७५

179

कृत्वा विप्रः सहस्रकं कटुतैलं स्वनाः सम्यक मंत्रांते चाष्टकं हुतः फट्कारेणैव जुहुयात्तत्त्वयोरेरचिरा
द्भवेत् जलमध्ये स्नानाद्वत्सरस्य योहृष्टि निगद्यते नाभिमात्रे जले विप्रः प्रविश्य जुहुयाज्जलं कुर्यादेका
ग्निवायुपृथ्वी मंत्रमाहात्म्यतोऽस्य शा इत्यादि ज्ञेयं अथ प्रयोगः कर्ता देशकालौ स्मृत्वाऽमुककामनयामु
करुद्रजपं होममभिषेकं वा स्वयं ब्राह्मणद्वारा वा करिष्य इति संकल्प्य गणेशपूजां पुण्याहवाचनमातृ
पूजां नांदीश्राद्धानि कृत्वाचार्यं ब्राह्मणमृत्विजश्च वृणुयात् ततोऽस्त्विजो देशकालौ स्मृत्वाऽमुककरुद्र
जपं करिष्य इत्युक्त्वा न्यासान्कुर्युः तत्र बौधायनोक्ताः पंचन्यासाः सर्वेषां समानाः कात्यायनपरिशि
ष्टत्वेन न्यासा उक्ताः अत्र पञ्चन्यासे यथाविधि स्नात्वाचम्य वेदः पुरुषशरीरे न्यसेदित्युक्त्वानि यथविलम्बमस
ऊर्ध्वब्रह्मस्य चक्षुषी गोतमभरद्वाजौ श्रोत्रे विश्वामित्रजमदग्नी नासिके वसिष्ठकश्यपौ वागत्रि
गायत्रीछंदोऽग्निर्देवता शिरसि विन्यसेदुष्णिहं सवितारश्रीवास्वक्के बृहतिं बृहस्पति वाचो हि हृद्यंतरे
द्यावापृथिवी मध्ये त्रिष्टुभमिंद्रं श्रोण्यां जगतीमादित्यं मेढ्रे अतिछंदसं प्रजापतिं पायौ यज्ञायज्ञियं वा
स्थानरमूर्वोरनुष्टुभं विश्वेदेवानष्ठीवतोः पंक्तिं मरुतः पादयोर्द्विपदा विराट् पाण्योर्भविद्धंदसं वाक्षं
स्मनातिरिक्तेष्वंगेषु स्मृतानात्वरछंदश्चापो देवतं तत्स्वं सर्वांगेषु याजयित्वा वेदमयः संपद्यते श्यामात्प्रा

१७५

ऋङ्मयो भवति वा ऋत्विजः प्रवर्धयेन्नकृतश्चिद्धृदयं विंदते कण्ठमयो यजुर्मयः साममयो भवति तस्मादेतद्ब्रा
ह्मचारिणो न तपस्विने नासंवत्सरोषिताय नाप्रवक्त्रे न ब्रूयादित्यादि तदेतद्ब्राह्मण्य रुद्रजपेषु चोक्त
मुक्तक्रमेण ग्रसरुद्रजपमात्रांगत्वे किंमाननमिति न विस्मयः तथा जातवेदस इति शिरश्चरणं चतुःस
क्तिरित्यासनं मनोज्योतिरिति हृदयं प्रबोध्याग्निः शिरसि मूर्धानं दिव इति शिखायां मर्माणि त इति
कवचं विश्वतश्चक्षुरिति नेत्र मा नस्तोक इत्यस्त्रं अथ न्यासाः तत्र पंचांगन्यासेषु शिखाद्यस्त्रांतमे
कत्रिंशदंगन्यासः प्रथमः मूर्धादिपादांतं दशांगन्यासो द्वितीयः पादादिमूर्धांतं पंचांगन्यासस्तृती
यः गुह्यादिमस्तकांतं पंचांगश्चतुर्थः हृदयाद्यस्त्रांतं पंचांगः पंचमः षडंगन्यासपक्षे प्रजननादि
षोडशांगन्यासः सप्तमः हेमाद्रौ महार्णवे च बौधायनः अथातः पंचांगरुद्राणां न्यासपूर्वकं जपहोमार्च
नविधिं व्याख्यास्यामो या ते रुद्र शिवा तनूरिति शिखायामस्मिन्महत्यर्णव इति शिरसि सहस्राणीति ला
लाटे हंसः शुचिषत् कंठे हृदिति स्वेवो मध्ये त्र्यंबकमिति नेत्रयोः अवकालीयानामग्निर्ज्योति
रिति नेत्रे नमः स्रुत्याय च पथ्याय चेति कर्णयोः मानस्तोक इति नासिकायामवतत्येति मुखे नील
ग्रीवा इति कंठे नमस्ते अस्त्वायुधायेति बाह्वोः या ते हेतिरिति उपबाह्वोः ये तीर्थानीति हस्तयोः सद्योजा

रु०क
१८.
180

नमित्तिपंचानुवाकान् पंचस्वंगुलीषु नमो वः किरिकेभ्य इति हृदये ये षन्तेषु उदरे नमः शंभव इति कक्ष्योः
नमो गणेभ्य इति पृष्ठे नमो हिरण्यबाहव इति पार्श्वयोर्विज्यं धनुरिति जठरे हिरण्यगर्भ इति नाभौ नमो मी
ढुष्टमेति कक्ष्यां ये भूतानामधिपतय इति गुह्ये सपीराजानवेदा इत्यपाने मा नो महान्तमित्यूर्वोरेष त इति
जान्वोः संसृष्टदिति जंघयोः विश्वं भूतमिति गुल्फयोः यं पथामिति पादयोः अध्यवोचदिति कवचं नमो
बिल्मिने इत्युपकवचं नमो अस्तु नीलग्रीवायेति तृतीयनेत्रे प्रमुंच धन्वन इत्यस्त्रे य एतावन्त इति दिग्बंधः
इति प्रथमो न्यासः ॐ नमो भगवते रुद्रायेति नमस्कारं न्यसेत् ॐकारं मूर्ध्नि विन्यस्य नकारं नासिकाग्रतः
मोकारं तु ललाटे वै भकारं मुखमध्यतः गकारं कंठदेशे तु वकारं हृदि विन्यसेत् तेकारं दक्षिणे हस्ते
रुकारं वामतो न्यसेत् द्राकारं नाभिदेशे तु यकारं पादयोर्न्यसेत् इति द्वितीयः अथ कातीयात्तृतीय
न्यासांतरमाहः यथाशीर्षन्तु विन्यसेदुरु ललाटे चंद्रशेखरं नेत्रे त्रिलोचनं देवं भैरवं श्रोत्रयोर्न्यसेत्
घ्राणे तु शंकरं देवं मुखे पशुपतिं तथा नीलकंठं कंठदेशे हृदये व्यापकं न्यसेत् सर्वांते विन्यसेत्पादेशि
वं सर्वं च विन्यसेत् इति नन्दिमते बौधायनः सद्यं च पादयोर्न्यस्य वामं न्यस्योरुमध्यतः अघोरं हृदि वि
न्यस्य वक्त्रे तत्पुरुषं न्यसेत् ईशानं मूर्ध्नि विन्यस्य हंसो नाम सदाशिवः हंसहंसेति यो ब्रूयाद्धंसो नाम स १८.

दाशिवः एवं न्यासविधिं कृत्वा ततः संपुटमारभेत् इति तृतीयः त्रातारमिंद्रं त्वं नो अग्ने स्वगं तुः पंथा आ
स्वंतं तत्वायाम्यानोतिघुष्टिं वंयं सोमं तमीशानं शुस्से रुद्रा स्योनापृथिवीत्येतत्संपुटमिंद्रादीदिक्ष्वि
न्यसैवमात्मनिरोद्धीकरणं कृत्वा त्वगास्थितैः पापैः प्रमुच्यते सर्वभूतेषु पराजितो भवति यक्षगंधर्व
भूतप्रेतपिशाचब्रह्मराक्षसयमदूतशाकिनीडाकिनीसर्पश्वापदतस्कराद्युपद्रवाः उपघाताः सर्वे
ज्वलेतं पश्यंत मारक्षंतु मनो ज्योतिरवोध्यग्निर्मूर्धानं मर्माणि ते जातवेदा इति गुह्योदरहृदयमश्विशि
रः स्वभिमंत्र्यात्मरक्षां कृत्वा इति चतुर्थः शिवसंकल्पं हृदयं पुरुषसूक्तं शिरः उत्तरनारायणं शिखा अप्र
प्रतिरथं कवचं यत्कृदियमस्त्रं पंचांगं सकृज्जपेदष्टांगप्रणम्य हिरण्यगर्भीयः प्राणानो मत्यं नाज्ञ
चोजपेत् ब्रह्मजज्ञानं महीयोः उपश्वासयरमं यमप्रस्तरमाहिंसीदः यानेअग्ने पत्तियातनूः सत्वय
पहीत्येन यथावः स्वाहाग्नयेदाशोमः निपाहीत्येतः अथात्मानं रुद्ररूपं ध्यायेत् अत्र कश्चिदर्थं उच्यते
सर्वत्र नेति रीयः पाठः उपवाजः प्रकोष्टः सद्योजातादीन् पंच स्वंगुलीषु विन्यस्त जेत्यादिषु नमोदः कि
रिकेभ्य इत्यादौ देवान् ॐ हृदयेभ्य इत्यस्यान्तरेषु न्तेषु गः नमोहिरण्यपेत्यादौ नमेतं तयजुः स शिरा
जातवेदा रक्षपाने इति अस्यार्थः जातवेदसे सुनवामेत्यस्या ऋक् कृता वह्निवर्णाः अग्ने त्वं पारया वि

घातिनोऽनुगोहा· पृतनाजितं सहमानमुग्रमिति ऋक्चतुष्टयं शिरस्याभ्यते येनजातवेदइत्याद्याः
पंचर्चः अपानेन्यसेदिति द्वितीयन्यासे ॐनमइत्यादिनानमस्कारान्तेनॐमूर्ध्नेनमः नेत्रासिकाद्यैः मौलललाटा
यनमइत्यादिन्यसेत् तृतीये सद्योजातंप्रपद्यामिइत्यादिपंचमंत्रान्पंचस्थानेषुन्यसेत् तत्रईशानःसर्ववि
द्यानामित्येतेन सदाशिवोहंस्वरन्तिमूर्ध्निन्यसेत् शुक्लकान्तीयः हेमाद्युक्तैः सद्योजातादिपंचभिः पंचवक्त्रन्या
से प्रालेयामलबिन्दुकुन्दधवलमित्यादिपंचश्लोकैस्तज्ज्ञानं तु ध्यायषट्त्रिंशत्कलान्यासंवाकृत्वातस्यतिष्ठा
यामवैक अवृतयजमानप्रजाःवामाद्वेतिमूलंवेष्टयेत्स्वं चतुर्थंद्वारमित्यादिदशमंत्रैः इंद्रायनमइत्याद्यैश्च
पूर्वादिदिक्षु इन्द्रादिभ्योजलिंकुर्यात् संपुटांजलिः पुनःसंपुटंकृत्वापुनरेवैरावत्यानमस्कुर्यादितिमहा
र्णवः मनोज्योतिः हुतेनगुह्येरतिगुह्यं अवाध्यग्निः उदरं मूर्धानंदिवःहृदये मर्माणिते दत्तदेवाः इतिश
िव जातवेदायदिवापावकोसिददभ्यावहत्स्वेतिशिरसिरवमेवात्वरत्तोसुच्यते पंचमन्यासेतथा
ज्ञापतिपदुऋचः पठित्वाहृदयायनमः सहस्रशीर्षेत्यष्टादशर्चंसूक्तंपठित्वाशिरसेस्वाहेति
शिरसि तत्रचतणालोकांश्चकल्पयन्तिस्यतेवेदाहमेतंपुरुषंमहान्तं धातापुरुषंमहान्तं धाताषु
रस्तायमुदाजहारेतिऋग्द्वयंसमस्तपापक्षयमथिकं ततः अस्याःसंमन्तःएषिवीरसाद्वेत्यादि ॥८॥ १८१

सर्वभतिक्षाणेत्यनेनमन्त्रेनारायणीं पठित्वा शिखायै वषट् आशुक्लिशिखान् इति पंचदशार्चं विद्या महापाशु
पद्धविन्त्यनेनमन्त्रेणकवचायहुं इति कवचं कातीयास्तुविद्याडिनिसप्तदशभिर्नेत्रमन्त्राः ततःत्व
मग्रेरुद्रस्य वक्त्रकेनपातहृद्विपणाभूर्भुवःस्वःस्वाहेत्यनेनास्त्रायफट् इत्यास्त्रमिति महार्णवः तत्र चय
नेशानहृदियंजुहोतीत्यादेशानहृदियशाहेनहृद्रसैवाक्तेः यत्तसाविभेचयनेष्कनोवम नेहृद्रइतिशत
हृदयस्यरूपमित्युक्तंनरूपमित्युक्तेगौणं नचात्रगौणग्रहणेमानमस्तिनेहृद्राध्यायेनैवास्त्वपुक्तं म
हार्णवस्त्वप्रोतएव अत्रन्यासांगमन्त्राणामृषिदेवतछंदांसिपादभेदश्चमहार्णवज्ञेयः विस्तराभ्रोच्य
नेकातीयास्तु नमस्तेरुद्रेतिषोडशर्चः शान्तहृदयमाहुः ततोहिरण्यगर्भरन्यायैरङ्गांगप्रणम्यध्यानं
यथा शुद्धस्फटिकसंकाशंत्रिनेत्रंपंचवक्त्रकं गंगाधरंदशभुजंसर्वाभरणभूषितं नीलग्रीवंशशांकां
कंनागयज्ञोपवीतिनं व्याघ्रचर्मोत्तरीयंचवरेण्यमभयप्रदं कमंडल्वक्षसूत्राभ्यामन्वितंशूलपाणि
नं ज्वलंतंपिंगलजटाशिखामुद्योतकारिणं वृषस्कंधसमारूढमुमादेहार्धधारिणं दिव्यसिंहासनासी
नंदिव्यभोगसमन्वितं दिग्देवतासमायुक्तंसुरासुरनमस्कृतं नित्यंचशाश्वतंशुद्धंध्रुवमक्षरमव्ययं
सर्वव्यापिनमीशानंरुद्रंवैविश्वरूपिणं एवंध्यात्वाद्विजःसम्यक्ततोयजनमारभेत् ॥ इतिपंचा॥

गन्यासाः प्राणानपमते षडंगन्यासाः तत्र पंचोक्ताः पृष्ठस्तु पूजनेनेब्रह्मातिष्ठतु पितिष्ठन्तांतिष्ठंतितिप
र्यार्थ्यं सर्वत्र पठेत् पादयोर्विष्णुः हस्तयोर्हरिः जठरेऽग्निः हृदये शिवः कण्ठे वसवः वक्त्रे सरस्वती नासिक
योर्वायुः नयनयोः सूर्याचंद्रमसौ कर्णयोरश्विने ललाटे रुद्राः मूर्ध्नि आदित्याः शिरसि शिवः पृष्ठे पिनाकी
पुरतः शूली पार्श्वयोः शिवशंकरौ सर्वत्र वायुः वहिः सर्वतोऽग्निर्ज्वालामालापरिवृतास्तिष्ठतु सर्वेष्वंगे
षु सर्वा देवता यथास्थानं तिष्ठन्तु मां रक्षन्तु ततः अग्निर्मे वाचि श्रित इत्यादिर्यथालिंगमंगानि संस्पृशेत् यथा
अग्निर्मे वाचि श्रितः वाक् हृदये हृदयं मयि अहममृते अमृतं ब्रह्मणि इति जिह्वां वायुर्मे प्राणे श्रितः ना
सिकयोः सूर्यो मे चक्षुषि श्रितः चक्षुर्हृदय इत्यादि इति चक्षुषी चंद्रमा मे मनसि श्रितः मनो हृदये इ
ति वक्षः दिशो मे श्रोत्रे श्रिताः श्रोत्रं हृदये इति श्रोत्रे आपो मे रेतसि श्रिताः इति गुह्ये पृथिवी मे
शरीरे श्रिता शरीरं हृदये इति शरीरं ओषधिवनस्पतयो मे लोमसु श्रिताः लोमानि हृदये इ
ति हृदयं इंद्रो मे बले श्रितः बलं हृदये इति बाहू पर्जन्यो मे मूर्ध्नि श्रितः मूर्धा हृदये इति
र्ध्नि ईशानो मे मन्यौ श्रितः मन्युर्हृदये आत्मा म आत्मनि श्रितः आत्मा हृदये तदेव पुनर्मे आ
त्मायुर्नराप्युरागात् पुनः प्राणः पुनराकूतमगात् वैश्वानरो रश्मिभिर्वावृधानः अंतस्तिष्ठ १८२

त्वमनस्यगोपाः इति सर्वांगं इति षडंगाः हेमाद्रौ कौशिकस्तु संकल्पजपहोमादिषु न्यासद्वयमाह तद्य
था अन्यासभवादिभिः कुर्यात्र मंत्रैः प्रणवान्वितैः मंत्रं च पादयोर्न्यस्य मुखे चोर्ध्वेतु विन्यसेत् श्रीमंल्ललाटप
ट्टे च महोर्त्तं शर्गिणि विन्यसेत् नयेवांत्यानुवाकस्य मंत्रे द्वादशभिः शुचिः न्यासं कृत्वानुलोम्येन वर्जयित्वा
भिचारकं आद्यं तु पादयोर्न्यस्य द्वितीयं जानुदेशतः ऊर्वोस्तु तृतीयं विन्यस्य चतुर्थं गुह्यदेशतः पंचमं ना
भिदेशे तु षष्ठं च हृदये न्यसेत् सप्तमं कंठदेशे तु मुखे चाष्टमं तथा नवमं नासिकायां तु दशमं मंत्रयोर्द्व
योः एकादशं ललाटे तु द्वादशं शीर्षि विन्यसेत् त्रयोदशं तु कवचं हृत्वा स्त्रेणं तु फट् इत्तत इति अथ सा
मान्यतो रुद्रस्याध्यादि तत्र सर्वेषामग्निभगवान् ऋषिः रुद्रः पंश्वरी देवता महाविराट्छन्दः चमका
नुवाकानामग्निः कांड ऋषिः आद्यागायत्र्याग्नावैश्रवी शिष्टं यजुः वाजादयो ज्ञानादिविशेषादेवताः जपे
विनियोगः अथ विशेष्यते यथा आम्नायाः कश्यपस्तु तमाद्येयस्तु ततः कश्यपस्तु तमाद्येयस्तु ततः कश्य
पस्तु तो द्वयोः कश्यपयोर्महत्वात् ततो भगवांस्तु तात्तिस्तृणां भगवान् द्वितीयानुवाके मंडूकस्तृती
ये भगवान् चतुर्थे जर्वासाः पंचमषष्ठयोर्भगवांस्तु सप्तमानुवाके हेमकाष्टमे नवमे च तमोर्वः किरि
कांतेभगवानवशिष्टस्याग्निर्दष्टमानुवाके द्वाये इति द्वयोः प्रलहृरमाहृद्वाये त्रिदयोर्मीड्व्यः त

शां०क०
१८३

183

तोदेवराट्मानस्तोक इति भगवानाराते इत्यृषिः स्तुहि श्रुतमिति वैयाघ्रः परि णो रुद्रस्येति भगवान् ततो वैरा
जस्ततः पुलहस्ततो नारदः ततश्चतर्णाद्रुर्वासास्ततश्चासमाभेदेवलः इत्यृषयः असौ यस्ताम्रो अरुण इति द
योरादित्यात्मा याते रुद्रेति स्कंदात्मा मा नो महान्तमिति नैरीश्वरात्मा यात इषुरित्यध्यवोचन्नमोऽस्तु नीलग्रीवा
येत्यासां चतुर्थपंचमषष्ठानुवाकानामाराते मीढुष्टमेति हयोऽश्वशंभुर्यौ नेहेति तिस्ताष्टमानुवाके नवमे
च नमोवः किरिकेति मानस्तोके परिणः इत्येतेषां च भगवानवपीष्टानां रुद्र इति देवता अथ छंदांसि असौ
यस्ताम्र अवतत्येत्यनयोरास्तारपंक्तिः सोऽधीवसर्पतीति षट्पदा जगती इमा रुद्रायेति चतस्रो जगत्य आ
राते इति तिस्रस्त्रिष्टुभो मीढुष्टमेति पंचपदा त्रिष्टुप् पिशिष्टा अनुष्टुभः याते रुद्रेति सराउनुष्टुप् यामिषुंति
बृहत्यनुष्टुप् अध्यवोचदित्यनुष्टुप् द्वितीयानुवाके महागायत्री तृतीये बृहती चतुर्थे उष्णिक् पंचमषष्ठयो
र्महापंक्तिः अष्टमनवमयोर्महात्रिष्टुप् शिष्टा नियज्जुषीति छंदांसि जपे विनियोगः अथाभिषेके तत्र प
चांगरुद्राणां जपहोमार्चनादिविधिमिति बौधायनोक्तैः प्रागुक्ताः पंचन्यासा भवंत्येव अथातो रुद्रस्नाना
र्चनविधिं व्याख्यास्याम इति तेनैवोक्ताग्रजनाने ब्रह्मात्मिष्ठत्वित्यादि षष्ठन्यासोक्तैः षष्ठोऽपि भवति तत
श्चसंभत्रयः ततोऽग्निर्मे वाचीत्यादि यथालिंगानि मरपोत्यंत प्रागुक्तन्यासषष्ठं कृत्वा आराधितो मनश्चे १८३

स्त्वंसिद्धैर्देवासुरादिभिः आराधयाम्यहंभक्त्यात्वांमागृहाणमहेश्वरेतिममसावायगंधाद्यैः पंचोपचारैः
संपूज्यत्र्यंवकंपूजामहत्त्वशैनमाराधयेत् आवाहनभिन्नान्पंचषट्त्र्यंवकमित्यनेनकुर्यादित्यर्थः आवा
वाहनहरयः सचेनमः ष्वेतेरश्वैः सहकेतुमद्भिः वाताजवैर्वलवद्भिर्मनोजवैरायाहिशीघ्रंममहव्यायशर्वा
मितिदक्षिणनासयापुष्पेणपीठस्यलिंगेसंयोज्यावाह्यसद्योजातंप्रपद्यामीत्यावाहनंदद्यातित्र्यंवकंस
द्योजातायवैनमोनमइत्यासनंत्र्यंवकं भवेभवेनातिभवेभवस्वमामितिपाद्यं त्र्यंवकं भवोद्भवायन
मइत्यर्घ्यलिंगाभिषेकस्नानं आपोहिष्ठायाभिः अथाद्भिस्तर्पयति भवंदेवंतर्पयामि शर्वंदेवंतः ईशा
नंदेवंतः पशुपतिंदेवंतः रुद्रंदेवंतः उग्रंदेवंतः भीमंदेवंतः त्र्यंवकंज्येष्ठायनमइत्याचमनीयं त्र्यंवकंज्ये
ष्ठायनमइतिमधुपर्कं त्र्यंवकं कालायनमइतिगंधं कलविकरणायनमइतिपुष्पं सर्वभूतदमनायन
मइतिधूपं मनोन्मनायनमइतिदीपं भवोद्भवायनमइतिनैवेद्यं अथैताउष्पाणि भवायदेवायनमः शा
र्वाय ईशानाय पशुपतये रुद्राय उग्राय भीमाय महतेदेवायनमः इतिअथाघोरेभ्यइतित्रिभिः
सदाशिवोनित्यनैरघोरतन्नरूपतिष्ठते अथैनंस्वहिरण्येनमूर्भिकलशेनसंतनधारांनिषिंचेत्सपु
नासर्पिषापयसावेक्षुरसेननारिकेरणवाम्ररसेनवातदलाभेउदकेनवानमस्तेरुद्रमन्यवइत्येका

ग्रं·क दशानामनुवाकानामेकंजपेत्सर्वैर्षोपाहैश्चाराधयेत्तु तमाराधनेनतदेतत्तुविधानेषुप्रयुक्तं यच्चरुद्रा
१८४ भिषेकउक्तस्तच्चैतद्विधानंज्ञेयमित्यर्थः तेनाभिषिक्तेनोदकेनाच्छीभ्यामित्यनुवाकेनाग्निंगामभिष्वा
पादान्तंसंस्नाप्यात्मापहत्यार्होव्याधिविमोचनार्थीजीवनार्थीश्रीकामः शांतिकामः पुष्टिकामोमोक्षा
र्थीचकुर्यादेवंकुर्वन्सिद्धिमाप्नोत्याचार्यायदक्षिणांददातिदशगाः सवत्साः सुवर्णभूषितावृषभैका
दशास्तदशास्तदलाभएकांगांदद्यादित्याहभगवान्बौधायनः अथमहास्नानं हेमाद्रौलैंगे स्नानं
पलशतंज्ञेयमभ्यंगः पंचविंशतिः पलानांतुसहस्रेणमहास्नानंप्रकीर्तितं स्नाप्यलिंगमदीपंचगव्यैर्नै
वद्यतेनच विशोध्यसर्वद्रव्यैस्नवराद्भिरभिषिंचति महास्नानेषुसक्तेनस्नानमष्टगुणंस्मृतं मूलेनके
वलेनैवगंधतोयेनशाक्तिनः अनुलेपनंतत्सर्वंपंचविंशत्पलेनवै शमीपत्रंचविधिनाबिल्वपत्रंच
पंकजं दशद्रोणैस्तुनैवेद्यमष्टद्रोणैरथापिवा दशद्रोणसमंप्रोक्तमाढकेनादिदीयते वित्तमा
त्रविहीनस्यनात्रकार्याविचारणा जागरंकारयेत्तत्रप्रार्थयेत्तुयथाक्रमं भक्त्याप्रदक्षिणांसार्धंप्रा
र्थयेल्लिंगमहेश्वरं द्रव्यहीनंमंत्रहीनंश्रद्धाहीनंसुरेश्वरः कृतंचाप्यकृतंचापिक्षन्तव्यमिह
सिंहाकर विशेषाव्रतकमलाकरेज्ञेयः इतिमहास्नानं ॥ अथरुद्रहोमः ॥ १८४

184

सहैव समग्रहोमः प्रधानभूतो जपांगभूतश्चेति तत्राद्ये मूले जपहोमार्चनविधिं व्याख्यास्यामः रुद्रा
होमः परः शान्तिः पायसेन हुतेन वेत्यादि बौधायन विष्णुधर्मादिवचनैः प्रागुक्तं श्रेयगम्भ तत्तद्दशांश होम
प्रत्याहाश्च सच तिलाद्यैः कार्य इति महार्णवः अत्र यद्यपि तेन मूले नैवोक्तं यथापि श्रुत्येन मंत्रजपसामा
न्येन तेनोक्तं भवत्यपि आज्ये द्रव्यमनादेशे जुहोतीति विधिर्विधीयत इति यत इति समान्यवचनादाज्ये
नस्यात्तत्तिलद्रव्यके मानमस्ति अत एव हेमाद्रिणा रुद्रजपांगहोमो वाचनिक एवोक्तो न तु दशांश
दिः यथाह तत्रैव बौधायनः ततो होमं प्रकुर्वीत नमः शंभव मंत्रतः रुद्रैकादशिनी जप्त्वा त्रयस्त्रिंशद
आहुतीः रुद्रेशानत्रयं प्रोक्तं षष्ठ्याधिकपापघ्ने रुद्रे लघुरुद्रे चत्वारिंशन्महारुद्रे सहस्रास्समवर्जिताः
चत्वारिंशत्सहस्राश्च कर्तव्याश्चातिरुद्रगाः कृताश्च समसमन्याय इति रुद्रे विनिश्चयः सच होमो नमः शंभ
वेति मंत्रेण कार्य इति हेमाद्रिः सच पूर्वोक्तविष्णुधर्मोक्तेः पायसेन हुतेन कार्य इति युक्तं प्रतिभाति
तेन हेमाद्रिमते मंत्रविभाग एव नास्ति अयं च यागहोम एव ज्ञाप्य इति समसंख्या मृहेंद्रेपापणि
पायामिति वदन्तं मंद इत्यावगतेः प्रधानभूत समग्रहोमे न त्वशक्यस्याः संभवात् महार्णवोक्तः प्रति
कल्पसूत्रादिष्वचपनप्रकारेणोक्त एवमंत्रविभागो ग्राह्यः महार्णवे नं तु प्रधाने समग्रहोमे मंत्रवि

भागस्यावयवकत्वाज्जप्येगेयमेवशाख्यः त्रुमत्वाबपेदितत्वाच्चेत्युक्तं पिष्टेस्यायमेवाहुतः सद्रुदानी
मुच्यते तत्रमंत्रविभागः पंचधा त्रेधा षोढा षोडशधा अष्टाचत्वारिंशद्धा तत्तः एकोनसमस्तन्तरश
नपदे पञ्चति श्रेत्यः प्रतिमंत्रपदस्मुच्यते तत्रायजुरमायामिष्टकायां जुहोतीत्युक्तात्रेधाविभक्तं जुहो
तित्रय इमे लोका इति श्रुत्योक्तः बौधायनोपि नमस्ते रुद्र मन्यव इत्येतानुवाकास्त्रेधा विभज्येति मंत्र
द्वेपचौ आद्यानुवाकचतुष्कमेको भागः अपरं चतुष्कं द्वितीयो भागः श्रेत्यानुवाकत्रयं तृतीयो भाग
इत्येकः पक्षः यद्वा नमस्ते रुद्रेत्यारभ्य सभापतिभ्यश्चवो नम इत्यंतमेको भागः नमो अश्वेभ्य इत्यादिद्वि
वार्यापचेभ्यंतो द्वितीयः नमः प्रतरणाय चेदिसमाप्तेस्तृतीयः षोढाभागस्तु तिस्र उत्तरा आहुतीर्जु
होति षट् संपद्यंते षड्वा ऋतव इति श्रुत्योक्तः शतपथे सर्वाशीत्या चाशीत्या च स्वाहा करोतीत्यादिना
षोढाविभाग उक्तः यथा विवाप्रथमाउपक्रम्य नमस्तेभ्य इति जानुदघ्ने जुहोति रथकारेभ्यश्चव
इत्युपक्रम्य नमः स्वायुधाय चेति नाभिदघ्ने शोषेण प्रागवतानेभ्य आस्यदघ्ने ऽन्तातः समस्त्राणि सहस्रश
इति दशानुवाकातानाहुत्यात्वा रोहान्जुहोति नमो रुद्रेभ्यो ये पृथिव्यामिति जानुदघ्ने धारयमाणो नमो रु
द्रेभ्यो येन्तरिक्ष इति नाभिदघ्ने नमो रुद्रेभ्यो ये दिवीत्यास्यदघ्ने ऽन्तेति एते त्रयः पक्षा न प्रचरंति अ

ष्याष्टाचत्वारिंशत्यन्तः तत्राद्येऽनुवाके पंचदश मंत्रा ततोऽष्टावनुवाका अग्रेष्टौ यजूंषीति काशकृत्स्नोनोक्तेन
नवमांतं त्रयोविंशतिः दशमे द्वादशेति पंचत्रिंशत् एकादशे दश अकचस्थीणि यजूंषीति त्रयोदशोऽष्टाच
त्वारिंशत् येमे शरः आद्ये पंचदश प्रोक्ता दशमे द्वादश स्मरताः एकादशोऽग्निर्भूम्यः स्वरष्टौ शिष्टयजूंषि
च प्रतिमंत्रपदे ते त्वेकोनसप्तसप्ततिर्मंत्राः तत्रानुवाके पंचदश मंत्राः द्वितीये त्रयोदश तृतीयचतुर्थयोः
प्रत्येकं सप्तदश एते द्वितीयादिचतुर्थांऽभ्यतो नमस्कारा मंत्राः पंचमषष्ठयोः प्रत्येकं पंचदश मंत्राः स
प्तमे षोडश अष्टमे सप्तदश नवमे एकोनविंशतिः एषु पंचमादिनवमांतेषु पुरस्तान्नमस्कारा मंत्राः
तत्र देवानां हृदयेभ्य इत्यस्यांत्ये मंत्रे चतुष्टयेन्वयः अयं च होमादावेव विभज्य प्रयोगः प्रजपाभिषे
कादौ तु विभागाभावाय यथाध्ययनेन पाठः एवमन्यत्राप्यनुसंधेयं दशमे द्वादश मंत्राः एकादशे त्रयो
दशेति चतुर्दशाकपूर्णाः द्वितीयादिनवमांतानुवाकेषु नमस्कारादिनमस्कारांतमेकं पदमित्याह तत्राभ
यतो नमस्कारेषु स्पष्टो विभागः यत्र त्वेको नमः शब्दः यथा नमो भवाय च रुद्राय च नमः शर्वाय चेत्यादौ तत्रा
द्याद्वितीयो नमः शब्दः पूर्वस्यांतत्वेन द्वितीयस्यादित्वेन च काकाक्षिवदुभयत्र संबध्यते यद्वा द्वितीयतृती
यचतुर्थानुवाकपरं यद्यपास्कः नमस्काराद्येकं पदमिति तत्पंचमादिनवमांतपरमिति महार्णवः

शां·क·
१८९

नदयं संग्रहः वामदेवो ५ वह्निभवो ६ स्वयम्भुवो ७ नरोंदवः ९ पंचदशो ५ शुम्भमयः ५ न्तपा १९ ब्र
ह्मस्फ ७ कूश्मवो १५ एवभास्कराः १२ विश्वे १२ समस्ताग्रहभमयाः स्मृताः १९५ एते विभागा नमके षेव चम
केष्वन्ताहवौधायनः अस्माविल्लसजोषसे इति चमकृहीते ऊत्वे का वाजश्च मे प्रसवश्च मे इति संततं वसो
र्धारां जुहोत्यामेत्रकमापनादिति मेत्रः सर्वेस्वमकाश्यायोनुवाकोवा तेनाष्यर्वाऊत्वा सर्वैश्च मसेरेका
ऊतिः एत्यनुवाकांतमेकादशाऊतयोवा तेनद्वेश्चाऊती द्वादशवा इदं वसोर्धारोक्तमप्ययोदितनाडो
पिलेयं यद्वाएकादशानामनुवाकेनामेकमेकं नयेदिति बौधायनोक्तेः यथा जपे एकैकस्य चमक
स्याहुतिस्तथा होमेपि तेनाप्य चमकेन सर्वेणाऊत्वान्यैः एत्यैकस्मिन्नेकादशाऊतय इति पक्षत्रयं महार्ण
वेउक्तं अथ त्रेधाविभागादिनाशतांशेन च होमस्य प्रकाराभावा दशांशहोमेन समग्रहोमेन समग्रहोमं
चाष्टाचत्वारिंशात्य तेषु प्रतिमंत्रपक्षे वाऊतिसंख्योच्यते तत्रैकरूपे दशांशहोमोनाशंक्य एव एकादशा
न्यावेकेन रूपेण होमः शिष्टेकरूपे विभागयोगान्न दशांशहोम एव एवं महारुद्रादावपीति म
हार्णवः अस्मन्मते वस्वष्टाचत्वारिंशान्यत्वे पंचाऊतयः प्रतिमंत्रपक्षे च समा
दशाऊतयः आधेर्मंत्रैः कार्याः श्रेताञ्जोपोहादि र्वैन्यापसंतवोक्तेरित्याऊः ॥ १८९

तत्रयत्रत्रिकपालोनवकपालइतिसंख्योक्तातेनतत्रैवअत्रतदभावान्नतथुक्तं अतएवसमविभागाभावा
न्नलाभावाच्चहेमाद्युक्तोवाचनिकएवनमः शंभवेतिचमूलमंत्रेणहोमानंतदशांशेनेतिवयं महार्ण
वमंगीकृत्यतत्रत्वाने अत्रमामकाःश्लोकाः रुद्राद्दशांशःस्याच्चत्वारिंशत्युत्तैकवेदका ४१९ समग्रहोमैः त
त्रैवत्रिवेदशरसंख्यकाः ५४· प्रतिमंत्रेदशांशेनत्रिद्विचशक्रनीहितेन ७० प्रतिमंत्रेसर्वहोमेशशरादि
वह्निचंद्रकाः १८०५ इतिरुद्रैकादशिन्यासंख्यालघुरुद्रेदशांशेनत्रिशेत्रांकवाणक्रनीतेन ५१९
समग्रहोमेनतत्रैववाग्निकरवशराःस्मृताः प्रतिमंत्रेदशांशेनतल्लघुरुद्रेप्रकीर्तिताः चंद्रवेदाब्धिवाणसंमा
२०४१ सर्वहोमेवदाम्यहं वेदाग्निद्विशरत्रिवाणमता २०५३१ लघुरुद्रेत्विदंस्मृतं इतिलघुरुद्रे महारुद्रेष्टचत्वा
रिंशात्युत्तेत्वाक्षतीकृतेन षट्सहस्त्रीशरमतीचत्वारिंशद्दशांशके ६०५५ तत्रैवसर्वहोमेत्रिवेदाग्निश
रनिवः ६५३४ प्रतिमंत्रेमहारुद्रेदशांशेत्वाक्षतीकृतेन द्वाविंशतिसहस्त्राणिषट्शतानिदशोवच २२६१०
प्रतिमंत्रेमहारुद्रेसर्वहोमेवदाम्यहं लक्षद्वयंसहस्त्राणिषट्विंशतितथैवच द्विशतेसमतिश्चैकाधि
कासंख्येयमीरिता २२६२२१ इतिमहारुद्रेहोमसंख्या अथातिरुद्रेष्टाचत्वारिंशत्युत्तेदशांशके एकस
मतिसाहस्त्रमपीत्यंताष्टशत्यपि १७६८० प्रतिमंत्रेदशांशेनसार्धलक्षद्वयंस्मृतं सहस्त्रोनंसर्वहोमे

ग्रं.क.
१८७

त्वतिः रुद्रेव दाम्यहं अष्टचत्वारिंशत्सहस्राणि सप्तलक्षाणि चैव हि सहस्राणि तथा सप्तदशाः साधं च ततः शा
न्तीप्रतिमंत्रं सर्वहोमे ११७४५ पंचविंशतिलक्षकाः एकादश सहस्रोनास्त्विति हडेः समीरिताः क्वचिद
ल्यान्तरं तत्र नएं पसरिभिर्मम इदं नेतिरीयशाखायोक्तं वाजसनेयिकाप्यवाहिशाखायां तु प्रतिमंत्रं पदे
पत्युत्तरशतविभागात्स्तन संख्या होमं तत्कुंभवसोर्धारां पातयेदनलोपरि श्रीकंठ वरी मेधा द्वौ च क्रज्वी
कोटर वर्जितां बाहुमात्रां स्रुचं कृत्वा ताम्र समं तयोपरि हृतधारां तया चाज्यमग्नेरुपरि पातयेत् श्रावये
त्सूर्यमाग्नेयं वैष्णवं च रौद्रं मंदवं महावैश्वानरं संसाम ज्येष्ठसाम च पाठयेदिति मात्स्योक्तेः आग्नेय सूक्ता
दि प्रागुक्तं बौधायनोक्तेः सर्वं च मत्कोनेत्येयं इयं च वसोर्धारा यद्यपि मात्स्ये लक्षहोमपरो क्ता तथापि वय
नेष्टत्वात्फलहेतुत्वाच्च रुद्रे कार्येति महार्णवः सा च पूर्णाहुत्यनंतरं कार्या दोषो न कोपि अयाश्वेत्यादिभि
र्हुत्वा समुद्रादूर्मिरिति सूक्तेः संततामाज्यधारां तां पूर्णाहुतिमथाचरेत् अत्र पूर्णाहुते पूर्वमाज्यधारां तू
ष्णीं दद्यादिति केचित् वसोर्धारा परमिति तत्प्रयुक्तं अन एव हेमाद्रौ मदनरत्ने च शांतिकांडे देविपुराणे
वसोर्धारोत्पत्ति सूक्ता सर्वत्र सोक्ता अत्र होमसंख्या वशात्कुंडं कार्यं तत्र कुंभ विघ्ने रत्निमात्रं शतार्धे
तु शतेचारत्निमात्रकं सहस्रे तत्प्रहोतव्यं कुर्यात्कुंडं करात्मकं द्विहस्तमयुते तद्वल्लक्षहोमे चतुःक १८७

187
187

रं दशलक्षमिते होमे षट्करं संप्रचक्षते यत्तु मात्स्ये द्विहस्तविस्तृतं तत्तु दशलक्षहोमस्थाप्यते पुनः लक्षहोमे
भवेत्कुंडं योनिवक्त्रं त्रिमेखलं तत्तु शीघ्रदादिहस्तमात्रं द्विहस्तं लक्षहोमे तत्पं चवीदो चतुर्हस्तं स्तिंधात
कोटिहोमे लक्षार्धे त्रिकरं कुंडं लक्षहोमे चतुष्करं कुंडं पंचकरं प्रोक्तं दशलक्षात्मकैकमात् षड्हस्तं लक्षविंश
त्या कोटिरर्ध्यहस्तसमकमिति अत्र च मत्स्य संख्योदितं कुंडे पिंडिकाहोमो विधीयते इति कुंडं वृत्ताकरोक्तं नरा
लिकाहोमो मत्स्यसंख्योक्ते कुंडे कार्यः तच्च कुंडं मैशान्यां मंडपमध्ये च वेदी तत्र काव्येदिकाकार्या यत्र मं
डपमध्यतः मध्यस्तंभान्तरं यावत्तावन्मात्रा कर्तव्येति परशुरामोक्ते रिति केचित् प्रागुत्तरं समासाद्य
प्रदेशं मंडपस्य तु शोभनं कारयेत्कुंडं यथावल्लक्षणान्वितमिति मत्स्यपुराणहोमे मात्स्योक्ते ईशाद्यादिलिख
नात्सैवमाभाति अस्मद्गुरवस्तु परशुरामोक्ते लक्षणात्मध्ये तु मंडपस्यापि कुंडं कार्यं हि च दक्षिणः इति
वृद्धवसिष्ठोक्ते मात्स्ये च प्रागुक्तं पूर्वं मंडपस्योत्तरं सुत्कृष्टं मध्यमं प्रदेशं प्राप्य तन्मध्ये कुंडं अत्रयागतं
स्योत्तरपूर्वेणावितस्य छायासंमिता एवोत्तरहस्तमिति जाप्यवेदी ग्रहादिदेवस्थापनजापनमिति मात्स्य
वाधापत्ते अलक्षहोमे वन्मध्ये कुंडं नाद्विकांतिवादिन्याः मध्ये वेदिस्थदीक्षात्नलात्तदावेन नात्र उपयोगा
भावात् रुद्रवेदिश्चैशाने ग्रहवेदेर्भिन्नाचारप्रमाणांतं त्रिकीवास्तहद्रस्यकाम्यतेपि ग्रहमखविकृतिं तेभ

शां॰ क॰ इति यत्नपरशुरामः मंडपो द्विगुणः कुंडलकंडदोमात्र सारतरस्ति सुवर्णहस्ते कुंडे द्वात्रिंशदङ्गुलस्य
१८८ मंडपस्य कार्यमन्ये निर्मलो मूर्तिविश्वेतस्य पेट्टः अत्र केचित्तु स्थाहुर्दर्पीठमथाहुः यथा केयूरकारे प्र
एम्य जगतामीशानमादेहार्धधारिणं यंत्रोद्धारम् इहेव स्थौकद्रकल्पवेसारतः मध्ये वृत्तं समालि
ख्य तत्रैतथैव चदशात्तरे वाहिरष्टदलपद्मं ततः षोडशपत्रके चतुर्विंशतिपत्राब्जे द्वात्रिंशत्पत्रकं तथा चत्वा
रिंशत्पत्रकं तत्र वृत्तं सूर्यसमप्रभं पंचपद्मात्मकं वृत्ते चतुरस्रं वभरद्वं सत्वरजस्तमश्चेति त्रिगुणैः परितो वृ
तं चतुर्द्वारे द्वारदेशे वहिर्नागसमावृतं चत्वारि शक्तं तेचैकं देवतानां नाविन्यसेत् कर्णिकामध्यदेशे
तु रुद्रं पंचास्यमालिखेत् नमो भगवते रुद्राय चेति तारादिकं न्यसेत् सोयं दशाक्षरो मंत्रः सर्वकामार्थसि
द्धिदः प्रणवादिनमोन्तानि पंचास्यानि ततः परं सद्योजातं वामदेवमघोरं तदनंतरं ततः स्तत्पुरुषं प्रो
क्तमीशानं पंचमं क्रमात् दलेष्वष्टसु नेत्रादीन् पूर्वादिक्रमतो न्यसेत् एकपत्रक पोर्मध्ये प्राविस्थाय तत्र लेखवेत्
अष्टौ नंदी महाकालगणेशं वृषभं क्रमात् अनंतरं भृंगिरीटिं स्कंदो मांचंडसंज्ञकाः षोडशारे ततः पत्रे
द्वितीयावृत्तपूजेत् अनंतं च तथा सूक्ष्मं शिवं चैकपदं तथा एकरुद्रं त्रिमूर्तिं च श्रीकंठं वामदेवा
कं ज्येष्ठं श्रेष्ठं तथा रुद्रं कालं कलविकरणं बलं बलविकरणं च बलप्रमथनं तथा ॥ १८८

तृतीयावरणे यजेच्चैव त्रिंशद्दले तथा अणिमा महिमा चेति लघिमा गरिमा तथा प्राप्तिः प्राकाम्यमीशित्वं
वशित्वं चाष्टसिद्धयः ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा वाराही चैन्द्री च चामुण्डा चण्डिका चेति ताः क्रमात्
असितांगो रुरुश्चण्डः क्रोधश्चोन्मत्तभैरवः कालभीषणसंहारा भैरवाश्चाष्टकीर्त्तिताः द्वात्रिंशत्पत्रके पूर्वम
वाष्टकमष्टाहते भवः शर्वेशानपशुपतिरुद्रोग्रभीमकाः महादेवश्चेति विद्यो नामवायष्टौ प्रकीर्त्तिताः
ततोनन्तो वासुकिश्च तक्षकश्च कुलीरकः कर्कोटकः शंखपालः कम्बलोश्वतरस्तथा ततोष्टस्वन्यसे
द्वैन्यष्टसु हैहयमर्जुनं पाकृतलेयं भरतं नलं राममिति क्रमात् ततः कुलाचलानष्टौ दलेष्वष्ट
स्वविन्यसेत् हिमवान्निषधो विंध्यो माल्यवान्पारियात्रकः मलयो हेमकूटश्च गंधमादनसंज्ञकः च
त्वारिंशद्दले पूज्ये पंचमावरणे न्यसेत् इन्द्राद्यष्टौ लोकपालानष्टस्वक्रमशो लिखेत् इंद्रमग्निं यमं चैव
निरृतिं वरुणं तथा वायुं कुबेरमीशानं दलेष्वष्टसु विन्यसेत् इंद्रादिलोकपालानामष्टौ शक्तीस्ततो न्य
सेत् शची स्वाहा च वाराही खड्गिनी वारुणी तथा मृगवाहा च कौबेरी शूलिनी च तथाष्टमी वज्रं शक्तिं
दण्डं खड्गं पाशांकुशं गदामपि त्रिशूलं लोकपालानामालिखेत् ततोष्टौ वाहनान्येषामष्टस्वक्रमशो लि
खेत् ऐरावतं तथा मेषं महिषं प्रेतसंस्थितं मकरं च मृगं चैव नरं च वृषभं तथा ऐरावतादयोप्यष्टौ

ग्रां०क दिग्गजास्तदनंतरं ऐरावतः पुंडरीको वामनः कुमुदोञ्जनः पुष्पदंतः सार्वभौमः सुप्रतीकश्च दिग्गजाः
१८९ इंद्राद्यष्टौ दिक्पालाः पंचपञ्चाशिकाद्बहिः विष्णुपादं हतद्विन्यसेदाग्नेय्यामग्नियोगतः नैर्ऋत्या
त्यां विश्वरूपं चवाचव्यां पशुपतिं तथा ईशान्यां मूर्धलिंगं चन्यसेदीशानयोगतः प्रागादिक्रमतो
लेख्याः शेषाद्यामगृहाद्बहिः शेषं विन्यसेत्पूर्वस्यां सहस्रफणमंडितं आग्नेय्यां तक्षकं चैव युतं पं
चशतैः फणैः सहस्रफलसंयुक्तमनंतं दक्षिणे यजेत् निर्ऋत्यां वासुकिं नागं युतं सप्तशतैः
फणैः शंखपालं च वारुण्यां युतं सप्तशतैः फणैः महापद्मं च वायव्यां युतं पंचशतैः फणैः कं
बलं चैव कौबेर्यां हस्त्रत्रिंशतफणैर्युतं कर्कोटकं तथैशान्यां स्वेतत्रिंशत्फणायुतं रुद्रपीठमिदं सा
वैरुद्धकं त्येभ्र विश्रुतं शंभुना स्वयमाख्यातं भक्त्यानुग्रहकाम्यया कुंकुमागरुकर्पूरैर्भूर्जप
त्रे यवा पटे लिखित्वा पूजितं भक्त्या सर्वकामार्थसिद्धिदं एता देवताश्च वर्ण्येन नमोन्तेन तत्तन्नाम
मंत्रेणावाह्य पूजयेत् शुभमंडलविंतं तदैशान्यां रुद्रकलशं संस्थाप्य तत्र वरुणं संपूज्य रुद्रैकादशिनीज
पार्थं विप्रैर्ब्राह्मण्यादिभिस्त्वपि ब्रह्मा: ततो यजमानेन त्यागे कृते ग्रहेभ्यः सांगेभ्यो ग्रहयज्ञवद्धुत्वा रुद्र
होमे कृते रुद्रपीठदेवताभ्य आज्यकृत्वा स्विष्टकृदादि प्रायश्चित्तहोमान्ते दिक् पालेभ्यो न वा १८९

ग्रहादिभ्यश्च माषभक्तबलीं दत्वा समुद्रादूर्मिरिति तिसृभिश्चेन मूर्धानं प्रत्नस्त्वादित्याः पूर्णादर्वि समन्नेधा मंते
इति पूर्णाहुतिं हुत्वा एवं च मकेनाग्निमीळे नवभिर्विसोर्नं कं षड्भि रातेऽषितः पंचदशभिः स्वादिष्ठयेति दश
भिर्महावैश्वानर ज्येष्ठसामभ्यां च वसोर्धारां हुत्वा पूर्णापात्रविमोकादि शेषं समाप्य विप्रेभ्यो दक्षिणां दद्यात्
तत्र रुद्रदक्षिणोक्ता बौधायनसूत्रे सौवर्णं शतं स्वर्णं प्रधानं वा दद्यात् ऋषभो रुद्रस्य दक्षिणा ए
कादश गा दद्यादिति शालीकिः उपधाने हैमनं तत्कृतं तमुपवर्हणं सौवर्णशतेन तच्छिद्रं रुद्रो लब्धरु
द्रः प्रकारांतरमाह महार्णवः तत्र सौवर्णनिष्काणां दशसाहस्त्रिकोत्तमा तदर्धा मध्यमा प्रोक्ता तृतीया
त्रिसहस्त्रिका उत्तमा त्रिशती वा स्याद्द्विशती मध्यमा मता शतमात्राऽधमा ह्येषा प्रकारः कीर्त्यते परः उ
त्तमा तु चतुःषष्टिस्तदर्धं मध्यमा स्मृता चतुर्विंशतिरन्या स्याद्दण्यान्तोविधिरुच्यते सहस्रं दक्षिणा देया द
शपुरुषकर्तृके शतानि पंच देयानि अतिकृपंचककर्तृके अथैककर्तृके देयं शतत्रयमिति स्थितिः
ततो ग्रहादिकलशोदकेनाभिषिक्तो यजमानो ग्रहादीनामुत्तरपूजां कृत्वा विसृज्य श्रीरुद्रप्रतिमां स्वर्ण
मयीं वस्त्रयुगान्वितां श्रीरुद्रप्रीतये चापि प्रमातिष्टनिहनये शर्थिताभीष्टसंसिध्यै तमंत्रं श्रीरुद्रस्प्रीणि
तं प्रदद्याद्विधानेन यथोक्तफलमस्त्वमे रतिरुद्रतिमामाचार्याय दत्वाग्निं संपूज्य विसृज्य विप्रान्रुद्रै

धा·क·
१५·
190

कादशिन्यां चीनेकचेतिसंभोज्यकर्मैश्वरार्पणं कुर्यादिति प्रश्नार्थं महारुद्रविधौ एवं त्वनापत्स्वत्त्वहरेक म
विपाके वक्ष्यामः इतरमंत्रप्रयोगभाष्यकारभट्टभास्करोक्तो महार्णवे ज्ञेयाः आचाराभावे त्वाच्यं
ते इति मन्नारायणभट्टसूनुरामकृष्णभट्टात्मजकमलाकरभट्टकृते शान्तिरत्ने रुद्रविधाने समाप्तं अ
थर्ववेदपारायणं तत्रादौ कलशस्थापनाद्युक्तं महार्णवे तीर्थे देवालये गेहे प्रशस्ते सुपरिष्कृते क
लशं संस्थापयेत्तत्र मृत्तिकाक्तसुभूषिते पुष्पपल्लवमालाभिश्चंदनैः कुंकुमादिभिः मृत्तिकायवसं
मिश्रवेदिमध्ये न्यसेत्ततः पंचाशद्भिः कुशैः कार्यो ब्रह्मा पश्चात्स्वरैः स्थिते स्थापितस्यापितस्यापि
तः कुंभे चतुर्वेदज्ञस्तु सुरैः वस्त्रजालाकृतिं वेदसूत्रराशौ कुशोक्तते ब्रह्मोपधाने दत्वा च ततः स्व
स्त्ययनं पठेत् प्रतिष्ठां कारयेत्पश्चात्स्वजादद्व्यमपोच्यते यज्ञोपवीतनैवेद्यवस्त्रचंदनकुंकुमैः स
कृत्पदीपैस्तांबूलैरत्नैर्गुणितामहः ब्रह्मनक्षत्रमिति वा गायत्र्या वा प्रपूजयेत् उपाध्यायश्च
से पूज्य यथापाठं पठेत्ततः ततो वक्ष्यमाणहोमादि कृत्वा पठेदिति स्मर्यः तत्रैव बौधायनः स्थंडिलं
कल्पयित्वाग्निमुपसमाधाय संपरिस्तीर्याज्येन ताभ्यो जुहोत्यग्नये सोमाय विश्वेभ्यो देवेभ्यः ब्रह्मणे
ऋषिभ्यः ऋग्भ्यो यजुर्भ्यः सामभ्यः श्रद्धायै मेधायै धारणायै श्रियै ह्रियै सावित्र्यै सविश्वप्रजापतये का १५·

उ ऋषये अग्नये कांड ऋषये विश्वेभ्यो देवेभ्यः कांड विश्वेभ्यो देवेभ्यः अन्नमसौ स्विष्टकृते च एष्य कृ स्वाहा
कारेण हुत्वा व्याहृतिभिश्च हुत्वा ततः परिषिंचति समाप्ते देवता यज्ञषा तर्पयति एवमृग्वेदस्य कांड
ऋष्यादि वर्जं मा स्विष्टकृत तेषां स्थाने शतर्चिभ्यो माध्यमेभ्यो गृत्समदाय विश्वामित्राय वामदेवा
य अत्रये भरद्वाजाय जामदग्न्याय गौतमाय वसिष्ठाय प्रगाथेभ्यः पावमानीभ्यः क्षुद्रसूक्तेभ्यो महासूक्ते
भ्यो महानाम्नीभ्य इति ततो वेदादिमारभ्य संततमधीयीतेत्याह भगवान् बौधायनः अथात अत्
पारायणविधिं व्याख्यास्याम श्रासमासे नाष्ठी पाषण्य प्राक्कृत्वा पयः पयः फलान्योदनं वा हविष्य
मात्रमनं भुक्त्वा तत्रादेशेषमधीयीत ग्रामात्प्राचीमुदीचीं वा दिशमुपनिष्क्रम्याग्निमुपसमाधाय परि
स्तीर्य यथं प्रदायाज्येनैताभ्यो देवताभ्यो जुहोति अग्नये सोमायेंद्राय प्रजापतये बृहस्पतये विश्वेभ्यो दे
वेभ्यो ब्रह्मण ऋषिभ्यो यजुर्भ्यः सामभ्यः श्रद्धायै मेधायै प्रज्ञायै धारणायै सदसस्पतये अनुमतये श्रियै ह्री
यै सावित्र्यै सवित्रे प्रजापतये सोमाय कांड ऋषये अग्नये कांड ऋषये विश्वेभ्यो देवेभ्यः कांड ऋषिभ्यः सा
हितिकीभ्यो देवताभ्यः उपनिषद्भ्यो याज्ञिकीभ्यो देवताभ्य उपनिषद्भ्यो वारुणीभ्यो देवताभ्य उपनि
षद्भ्यो हव्यवाहाय विश्वेभ्यो देवेभ्यो वरुणेभ्यो अन्नमसौ स्विष्टकृते च एष्यकृ स्वाहाकारेण हुत्वा व्याहृ

धं॰क॰
१९१

तिभिस्त्रिपुनः परिषिंचति समाप्ते श्वेताय यजुषा तर्पयति अंते पवाग्नीषोमाभ्यां यजुषा यजुर्वेदेन स
ह तर्पयेत् यदाभ्रं देवास्तर्पयामीत्यादि यजुषा तर्पयित्वाग्न्यादींस्तर्पयेदित्यर्थः मा हमा हा शिवः एव
म्रग्वेदिनो कांडऋष्यादिवर्जं मास्विष्टकृतस्तेषां स्थाने घातर्चिभ्यः स्त्यादि महानाम्नीभ्यः स्त्यंतं प्राग्वत् न
ना वेदादिमारभ्य संततमधीयीत नास्यांतरानध्यायो नास्यांतरा जननमरणे अशुचिः आशौचेनैते हेतुस्
र्थः नांतरा व्यवहारो न च विरमे यावद्वेदमधीयीत यावत्प्रथमं पदं तावन्मध्ये न विरमेत आसन्नं च वदेदित्यर्थः
यदंतरा विरमेत् त्रीन्प्राणानायम्य प्रणवं वा प्रविधाय यावत्कालमधीयीत ततः सर्वतिर्यांतरं संध्यामा
रण्य सलिले लोप्य पतिर्ध्यात् तिर्यांतरं संध्यानिषादी लोप्य विहाय समापयेत्यर्थः श्राद्धं वैते
च ब्राह्मणभोजनं च दक्षिणां दद्यात् य एतेन विधिना वेदमधीयीत स ततः पूतो वेदो भवति मनस्शु
द्धिश्च भवति वेदरूपो भवतीत्यर्थः श्राम्यां पारायणाभ्यां मरिवित्तिभिश्च भोजनं रहस्याधीनेरतेभ्यः प्रमन्यते त्रिभिः
पत्नीयेभ्यः शूद्रायां रेतः सिक्तायां गायत्री मर्जश्च भवति चतुर्भिः शूद्रान्नभोजनात् स्त्रीसेवनाच्च पंचभिरया
ज्ययाजनादप्रतिग्रहणात् षड्भिर्ब्राह्मणात् स्त्रीलोहितकरणात् रुग्रहननात् तस्करीत्तेयात् पतितसंयोगाच्च
सप्तभिः प्राजापत्यस्पर्हीनाचरणात् यतो यवधनाच्च अष्टभिः शूद्रापण्यरस्तत्रगमनात् जस्तलागमनाच्च नवभिः १९१

सुरापानाद्दशभिरसोमपानादेकादशभिर्ब्राह्मणभोजनात् द्वादशभिः पुनर्जन्मेहजन्मकृतैः ।
सर्वैः पापैः प्रमुच्यते स्वर्गलोकं गच्छत्यग्निष्टोमादिकृतफलसिद्धिर्भवति वेदाध्यायी सदैव स्याद्दाशु
ष्मान्सत्यवाक्शुचिः यं यं काममयते कामं तं तं वेदेन साधयेत् अस्याध्ययनाल्लियत्किंचिद्ब्रह्मलेणोहि
फलं महद्ब्रह्मणो हि फलं महदिति कृविधाने आदावेव तस्या विद्याकर्म कुर्वित शान्तये पुष्टये पशुला
भाय धनलाभाय भूतये एषा हि संहितादेवैः सर्वब्रह्ममयीति हुत उग्रे पतपसा दृष्टा विद्यामित्रेण
धीमता होमाश्च जपयज्ञाश्च नित्यं कुर्वित वैतया सर्वकामसमृध्यर्थं परं ब्रह्मेदमुच्यते एषैव प्रति
लोमोक्ता पञ्चः शत्रुविनाशिनी अक्षरप्रतिलोमेय ममभिचारे शुभशस्यते सर्वसंहितया पञ्चहोमः
आज्येन तिलैर्वा आज्यं द्रव्यमनादेशेज्जहोति शुविधीयते इति बाह्माक्तेः सर्वपापहरो होमस्तिलैः
सर्वत्र शस्यते इति विस्तुधर्मोत्तरात् एवं सामवेदादावपि शातातपः कृच्छ्रादेव्य पुनं चैव वेदपा
रायणं तथा तिलहोमसहस्रं च समेतच्चतुष्टय इदं केवलं मंत्येचांद्रसमं इति कमलाकारभ
ट्टैर्वेदपारायणं जातवेदसे इत्येतत्सूक्तं सर्वार्थसाधने आयुरारोग्यमेवदं भूमिदं शत्रुनाशनं य
द्यद्वाञ्छति यो विप्रस्तत्तदाप्नोत्यसंशयं सूक्तेनानेन न्यञ्जपाद्युक्तेवरधरः श्रुचिः जपेद्धाति यतो

शां॰क॰
१५२

मंत्रं हविष्याशी जितेंद्रियः पश्चात्पुरश्चरणार्थी प्रत्येकं लक्षमभ्यसेत् कुंडे वा स्थंडिले वापि होमं कुर्याद्दशांश
तः वन्हस्तं भवेत्कुंडे मेखलात्रयसंयुतं स्थंडिलाग्न्यभागांतं यत्तत्तत्र प्रकल्पयेत् दुर्गामावाहयेत्कुं
भस्मात्पश्चाष्टमहाभुजां नीलोत्पलदलश्यामां किरीटाद्यैर्विभूषितां ततश्चाराध्यतां देवीं स्तुत्वस्तिस्त्रो
र्थोदकान्विते आवाहनेन हविषा समिद्भिस्तु पृथक् पृथक् मंत्रेणानेन जुहुयादष्टोत्तरशतानाहुतीः ततः स्वि
ष्टकृतं चैव होमशेषं समापयेत् उत्थायाप्यजपेन्मंत्रमेतं भक्त्या समन्वितः ऋग्विधाने जातवेदस
इत्यादि स्तदा स्वस्त्ययनं जपेत् दुर्गं पथि प्रयातस्य नास्यारिभ्यो भयं भवेत् राजकार्ये स्वगृहे वाभि
शस्तोप्यनेकधा अशक्ते प्रतिमाकार्यं भये प्राणांतिकेपि वा जातवेदस इत्येतां जपेत्स्त्रिभ्यः प्रमुच्यते
स्मिसायथिप्रवर्ये च शास्थितो मनसा जपेत् सिद्ध्यर्थे स्वास्तिमानेति चौरैर्वाध्येत नाश्यति कृतार्थः स्वगृ
हान् गच्छेत्तामेव सततमभ्यसेत् अदितेः सवितर्येतां जपेद्दक्षिणेन तथा अहः स्वस्त्ययनेशस्त्र रात्रौ
स्वस्त्ययनेति च अष्टायां च जपेत्त्रिस्य मे तो ङ्गः स्वमनाशनी इति जातवेदाकल्पः अथ त्वरितरुद्रः
शिवपूजाविधायसंकल्पः मूलेन प्राणायामः अस्य त्वरितरुद्रमंत्रस्याथर्वण ऋषिः अनुष्टुप् १५२
छंदः त्वरितरुद्रो देवता नमः इति बीजं स्वाहेति शक्तिः अथ मूलेन करशुद्धिं कृत्वा प्रणवं करेत

त्रयो विन्यस्य षडंगं कुर्यात् तद्यथा यो रुद्रः अंगुष्ठाभ्यां नमः ॐ अग्नौ तर्जनीभ्यां नमः ॐ यो ऽप्स्वन्तः मध्य
माभ्यां नमः ॐ य ओषधीषु अनामिकाभ्यां नमः ॐ यो रुद्रो विश्वा भुवना विवेश कनिष्ठिकाभ्यां नमः ॐ
तस्मै रुद्राय नमो ऽस्तु करतलकरपृष्ठाभ्यां नमः एवं हृदयादिन्यासः यो रुद्रो हृदयाय नमः ॐ अग्नौ शिर
से स्वाहा ॐ यो ऽप्स्वन्तः शिखायै वौषट् ॐ य ओषधीषु कवचाय हुं ॐ यो रुद्रो विश्वा भुवना विवेश नेत्र
त्रयाय वौषट् तस्मै रुद्राय नमो ऽस्त्वस्त्राय फट् इत्येतेन दिग्बन्धः अथ पदन्यासः ॐ यः पादाभ्यां
नमः रुद्रः जंघाभ्यां नमः अग्नौ जानुभ्यां · य रुद्र ऊरुभ्यां · अप्स्वन्तर्गुह्याय यमेढ्रायः ओषधीषु नाभ्यै · य · उदरा
य रुद्रः हृदयाय · विश्वा कंठाय · भुवना मुखाय विवेश नासिकायै नमः तस्मै नेत्रद्वयाय रुद्राय · मू
मध्याय · नमः ललाटाय अस्तु शिरसे नमः अथ ध्यानं रुद्रं चतुर्भुजं देवं त्रिनेत्रं वरदायकं अंकस्थस्या
म उमां पद्मे दधानां च करद्वयं अपः करद्वये कुंभमातुलिंगं च बिभ्रतीं दधानमूर्ध्वहस्ताभ्यां मलं उम
रुमेव च एवं ध्यात्वा देवं मूलमंत्रेणावाहनादिषोडशोपचारैरभ्यर्च्य नित्यमष्टोत्तरशतं जपेत् एष
नेह दुर्भागा इति मद्रा अथ होमविधिः लिंगमभिमुखे उपविश्य हुताशनी जुहुयात् एवं कृते पुर
श्चरणो भवति हुताशने मौक्तिकामः दूर्वाभिरायुष्कामः कन्यामो लाजैः अपामार्गैर्वश्यकामः

पा॰क
१९२
193

मधुपुष्पैर्वशकामः श्रीपत्रैः श्रीकामः सिद्धार्थैः पुष्टिकामः त्वोरिभैस्तेजस्कामः श्रोत्रवरैः पुत्रकामः प
लाशैः सर्वकामः गुडूचीखण्डैर्ज्वरनिवृत्तिर्भवति उत्पलैर्दधिमधुप्लुतैरष्टसहस्रं जुहुयात् यथेष्टाश्रीर्भवति
विल्वपत्रैर्दधिमधुप्लुताक्तैः सहस्रहोमात्सर्वं नाशयति शाल्मलीसमिद्भिः पाशरुधिराक्तैरष्टसहस्रं जुहुया
त् शत्रूणां सद्यो मरणं भवति शुक्लवस्त्रवासस्त्रक्चाभिमन्त्रः सहस्रं मासिकमार्जनं स्नायपरराष्ट्रसंगपर्वादी
न्शमयति मासद्वयेवेतालादीन्त्विषयति मासेन ब्राह्मणादि देवा समागच्छन्ति सनरो विद्रूपालो भूतगणैः
परिवृतो महादेवस्याह भगवान् बोधायनः हेमाद्रौ शान्तिकाण्डे भीष्मः अथ वरिमहरुद्रस्य न्याससमग्रः
क्रमेणोक्त जपहोमादिकं सर्वं कथ्यते सर्वसिद्धये यस्य कुक्षौ जगत्सर्वं स्थावरं जंगमं च यत् दुःख
च्छिदे नमस्तस्मै ब्रह्मविष्णुशिवात्मने क्लेदान्दृष्ट्वथवाचक्रविक्षिप्तरितसत्तके देवतास्त्वरितोरुद्राभी
जशक्तिर्नमोस्त्विति देवागारे नदीतीरे शुचौ देशे यथावात्मतः उपविश्य नियम्यात्मसंकल्पादिसंस्थितं
करयोस्तलमयोश्चैव मूलमन्त्रेण विन्यसेत् क्रमेणोक्तषडंगानां न्यासस्यात् हृदयादिभिः न्यासमंत्रपदैः कुर्या
न्वभिहृदयादिकं यो रुद्रो अग्नौ हृदिन्यस्य शीर्षे यो अप्सु इति न्यसेत् यो ओषधीषु शिखायां यो रुद्रः कवचं न्यसेत् विश्वा भुव
नाविवेशेति नेत्रं वैसमस्त्राय हृते नमो रुद्राय परा हृदिन्यासमपवमस्त्राय ततः अंगुल्यग्राणि मूलेन नकुर्यात्गृष्टेन पीडयेत् १९२

सामुद्रास्तु भगा प्रोक्तास्ततो ध्यानं समाचरेत् पश्चिमे रुद्रभागे तु लिंगमुद्राप्रदर्शनं श्रीकामः श्रीसिंकु
वितितेजस्कामस्तु नेत्रयोः महदैश्वर्यकामस्तु ग्रीवायां रोगनाशने हृदये सर्वकामस्तु नाभौ ज्ञानप्रदं
भवेत् प्रजाकामस्तु गुह्ये वै पशुकामस्तु गुह्ये वै पशुकामस्तु जंघयोः जानुभ्यां ग्रामकामस्तु सर्वका
मस्तु गुल्फयोः वशीकरणकामस्तु वामबाहौ प्रदर्शयेत् पापक्षये भिचारे वा व्याधिरूपगमे तथा व
ह्निः शरीरात्तु कविनाशिवस्याग्रे तु संस्मरेत् भवत्त्वधिजं तिद्वेषं च शुद्धास्फटिकसंनिभं प्रसन्नेन वक्त्रे
रौद्रो कलुषो हस्तयोर्द्वयोः हस्तद्वयेन योगास्य कृतमुद्रास्थिरासनं सर्वकामप्रदं शांतं शंकरं
करुणाकरं उग्रकर्मणि चैवोग्रमूर्तिं ध्यायेदुमापतिं द्विभुजं नागपाशं च शूलपाणिं जटाधरं एवं
ध्यात्वा महादेवं समभ्यर्च्य सुभक्तितः अथः शाप्येकभक्ताशी ब्रह्मचारी हविष्यभुक् अयुते द्वे जपे
त्सर्वं प्रत्यहं पूजयेच्छिवं जुहुयात्तद्दशांशतः तद्दशांशेन तर्पणं मार्जनं तद्दशांशेन ततो ब्राह्मणा
भोजनं पुरश्चरणमेवं च कृत्वा संपूज्य शंकरं जपेत्त्रिरुद्रं तु सर्वकामफलप्रदं श्रीकामः
शांतिकामो वा जपेल्लक्षमतंद्रितः बिल्वसमिद्भिः श्रीकामः शांतिकामः शमीमयैः जुहुया
दाज्यसंमिश्रैस्तर्पणं मार्जनं तथा एवं सर्वेषु कामेषु होमांते जुहुयाद्वै जपमालं ततश्चार्घ्यं

यां.क
१९४
194

पायसं जुहुयात्ततः विनायकश्रीफलैर्होमे राष्ट्रवृद्धिर्भवेद्ध्रुवम् तिलैराज्यसंमिश्रैस्तेजस्कामो हुनेत्तु वै
व्रीहिभिः पशुकामस्तु राष्ट्रकामस्तु वै यवैः पायसं सर्वकामेन होतव्यं शर्करान्वितं मधुक्ताम्राग्रपर्णा-
नि सिद्धज्वरविनाशने महाभूतग्रहे चैव गुडूचीभिर्हुनेद्ध्रुवं सर्वरोगविनाशाय सर्षपैरभिमन्त्र्य वा जपेत् घृ
घृते दत्त्वा जपेद्धोमः कार्यः केसरसमिद्भिः शुभैः श्रीकण्ठवैरैरक्तकामस्तेजस्कामस्तु खादिरैः अपामार्गसमिद्धो
मात् भूतबाधाविनश्यति उग्रबाधाविनाशाय जपेद्दशसहस्रं तिथौ लवणासितदध्याक्ततीक्ष्णग्राश्व
स्य संभवः दध्यक्ताः समिधः शुष्काः स्वाहान्तमन्त्रमुच्चरेत् दशापं चाहुतिं कृत्वा गाढगाढेतु दीरयेत्
यावद्धोमं बलिं देयः पुरुषाहारसंमितः एवं कृते विमुच्येत दुर्भिक्षादेवमहाग्रहात् धूपं तु मिके
सरहेषु तस्याभिमन्त्र्य वो जपेत् जुहुयाच्छतपत्राणि सर्वेषु त्रयमाप्नुयात् लाजाहोमं तु कुर्यात्
कन्याप्राप्तौ तु रूपिणी लाजाश्च मधुसंयुक्ताश्चैतद्व्याणि वा पुनः द्वयं ते हरिते देशे तस्य विषुव
णि भवेत् वामाङ्गमुन्नतं कृत्वा स्त्रीवशीते विचक्षणः हस्तिश्यामात्यपां तस्य तिलैश्चाज्येन संयुतैः
होमस्थाने तु संस्थाप्य कुम्भमेकं जलान्वितं मन्त्रयित्वाष्टसाहस्रं हुतशाखां निक्षिपेत् अभिष
कस्यैते स्तेषां शान्तिः प्रोक्तः प्रदक्षिणं ग्रहयामादिपां तिस्रः सर्वैः कार्या तद्दैववत् वस्त्रपूजास्तु १९४

कर्तव्या एकाशीतिपदैः शुभैः ईशानाय बलिं कार्यो भूतानां पतये तथा एवं कृते पशूनां च प्रजानां शां
तिमाप्नुयात् अष्टौ ते शुच सर्वेषु दिशायां ग्रामवाह्यतः उपविश्य जपेन्नूरुद्रं त्वरितं बलिभिः सह होमः
पालाशसमिधैः कर्तव्यो हुतसंयुतैः ईशानाय बलिः कार्यो यस्यां दिशि नदर्भुतं तदाशापतये तस्त्व
स्त्वेनां पतये तथा वृद्धिकामो जपेल्लक्षं तिलैर्होमो हुतान्वितैः बलिः प्रजापकर्तव्याः शिवस्य वरुणस्य
च सर्वकामेषु चैवार्थं त्वरितस्य जपो भवेत् अयुतं दयमल्पेन पावल्लक्षेन नोधिके एवं कृते तु
सिद्धिः स्यात् विद्याकामः प्राप्नुयाच्छिवं ऐहिकामुष्मिकान् भोगान् भुक्त्वा मासायुज्यमाप्नुयात् इति हेमा
द्रौ शांतिकांडे गर्गाद्य प्रोक्तः त्वरितरुद्रविधिः अथ स्वप्नः तत्र देव स्नादीन् देवं च संपूज्य तत्काद्भुत
सागरे पराशरः अभ्यर्च्यमेवं स्त्वपुरोहिते स्त्र संयम्य तस्याभ्युविसंयतां च ब्राह्मी शुभ्रं वा परभाग
पुष्यकृतां पयानशिरसि सितितीधः तपो कम्भकुदाहिणपार्श्वशीर्षी स्वप्नपरी हते तपथापदेशांत
मः शंभवे त्रिनेत्राय रुद्राय वरदाय च वामनाय विरूपाय स्वप्नाधिपतये नमः भगवन्देव देवेश
शूलभृद्वृषवाहन इष्टानिष्टे समाचक्ष्व मम सुप्तस्य शाश्वत एकं वक्त्रेकपालीयैं स्वप्नः प्रयतमा
नसः निशांते पश्यते स्वप्नं शुभं वा यदि वाशुभं शुभस्य मान्याह हह यान्त्रे वराहः पौलस्त्यसार

नागाश्ववृषभारोहणं हितं चंद्रतारार्कग्रहणां परिमार्गणमेव च मूर्धंगृधीनां ग्रसनं शत्रूणां च वधक्रि
या जयो विवादश्च तेषु संग्रामे च तथा जयः भक्षणं चैव मांसानां मत्स्यानां पयसां तथा दर्शनं रुधिरस्या
पि स्नानं वा रुधिरेण च सुरारुधिरमद्यानां पानं क्षीरस्य पायसः श्वेतेन वेष्टितं मूमोनिर्मलं गगनं तथा
स्वेन दोहनं धात्रीमहिषीणां तथा गवां सिंहानां हस्तिनीनां च वडवानां तथैव च प्रसादो देवविप्रेभ्यो गु
रुभ्यश्च तथा शुभः श्वेतसाहभिषेकश्च स्वयं राज्यप्रदं हितं राज्याभिषेकश्च तथा छेदनं शिरसोऽपि च
मरणं वह्निलाभश्च वह्निदाहो गृहादिषु तथोदकानां तरणं तथा विषमलंघनं हस्तिनीवडवानां च ग
वां च प्रसवो गृहे आरोहणं गजेंद्राणां रोदनं च तथा शुभं परस्त्रीणां तथा लाभं तथालिंगनमेव च निग
डैर्बंधनं धन्यं तथा विष्टानुलेपनं वीजानां भूमिपालानां सुहृदामपि दर्शने शुभान्येतानि प्रोक्तानि रा
ज्यलाभकराणि च अद्भुतसागरे पराशरः वज्रेवा निगडैर्ग्रसेद्ध दहनं नाराचैस्तो वाच्छनाच्छत्रं वा
द्विरदादिरोहणं विधिर्दिव्योपि च ब्राह्मणः दिनकरशशितारभक्षणस्पर्शनानि विशरणमपि
मूर्धसमपेच त्रिधा वा वृषभगृहनरेंद्रश्वेतसिंहादिरोहाः स्वसमसदधिमूर्ध्नो भूमिराज्यप्रदानि
विपुलरणविमर्दः पूतनावादैर्जयश्च पशुस्वगमनजानां लब्धिरथ्यासनं वा विउशनपरिलेपोऽगम्य

नारिगमोवास्वप्नप्राणिपिविलाभः सस्यसंदर्शनेचसितस्वरभिमनोज्ञालेपमाल्याम्बराणांद्विजस्वरा
गृहराज्ञांदर्शनान्यापिवस्त्र मणिरजतस्वर्णभोजपात्रेषुभुंक्तेचघृतदधिपरमान्नंसर्वजनन्वाकुंभेच
बृहस्पतिसंहितायां यस्यक्षेत्रेनसर्पेणदंशितोदक्षिणेभुजे सहस्रलाभस्तस्यात्एणोनदशमेदि
नेउरगोवृश्चिकोकाकजलूकादंशतेयदि विजयेचार्थसिद्धिंचपुत्रंतस्यविनिर्दिशेत् वलाकाकुक्कु
टीक्रौंचीलभायः प्रतिबुध्यते कोशंतालभतेभूमिंभार्याचप्रियवादिनी रुधिरंपिबतिस्वप्नेसुरां
पिबतियःक्वचित् ब्राह्मणोलभतेविद्यामितरस्तुधनंलभेत् क्षीरंपिबतियःस्वप्नेसफेनंदोहनेकृ
ते सोमपानंभवेत्तस्यधनंवावह्नवादिशेत् दधिलाभेवनंतस्यात् घृतलाभेध्रुवंयशः घृतप्राशे
महान्क्लेशोयपायास्तदधिभक्षणे गोधूमैर्वायवैर्वापिलाभंसिद्धार्थवेषुच पुष्पप्राप्तेधनंवि
द्यात्फलेवृद्धिरनुत्तमाः आसनेशयनेयानेशरीरेवाहनेगृहे ज्वलमानेविबुध्येतनस्यश्रीसर्वतो
मुखी वराहः वृश्चिकादिदंशनमणिरत्नकांचनकलशप्रदीपाङ्किपोराः वत्सहंसराशादपोभिक
लाभः प्रवलाभाय विस्मधर्मोत्तरे पकसंगयदिवारात्रौशुभंवायदिवाशुभं पश्चाद्दृष्टेनयानतस्य
पाकंविनिर्दिशेत् अथजःस्वप्नाः भुज्जनसागरेदेवलः रक्तगंधांवरंस्रग्वीगच्छेदादातिण्मवृदः

शं·क
१९८
196

खरोष्ट्रमहिषारोहे त्रिमासान्नाभिजीवति स्वप्ने यो नीयते तस्य प्रेतैर्वा स्वपिधीयते नचोत्तिष्ठति यस्तस्मात्
दिनेनैतस्य जीवितं मार्कंडेयः वांत्या मूत्रपुरीषं तस्य सुवर्णं रजतं तथा प्रत्यक्षमथवा स्वप्ने जीवेन दशमासिके
केशांगारं तथा भस्म उरगान्निर्जलां नदीं दृष्ट्वा स्वप्ने दशाहात्तु म्रियते काष्ठपोटिने करालैर्विकटैः कृष्णैः
पुरुषैरुद्यतायुधैः पाषाणैस्ताडयेत् स्वप्ने सद्यो म्रियते नरः रक्तकृष्णाम्बरधरा गायन्ति च हसन्ति च द
क्षिणाशां नयेन्नारी स्वप्ने सोपि न जीवति वराहः हरिणारोहे भ्रमणं मृत्युर्नैरेण सूकरारोहे उष्ट्रारोहे
व्याधिर्वृद्धिः स्यात् कुंजरारोहे मांस्ये· विस्मयमौनतैव च मालिनो वस्त्रधारित्वमभ्यंगपंकदिग्धता उच्चात्
पतनं चैव दोलारोहणमेव च पाकध्वजस्य पतनं पतनं पाणिस्थयोः देवद्विजातिभूपानां प्रजानां क्रो
धएव च आलिंगनं कुमारीणां विधवानां च मैथुने हानिश्चैव स्वगात्राणां वीरकेंद्रमतः प्रिया दक्षिणा
भिगमनं व्याधिनाभिभवस्तथा फलापहारश्च ज्ञानपाषाणदलानां विशोधनं ग्रहाणां चैव भंगश्च गृहसं
मार्जनं तथा क्रीडा पिशाचक्रव्यादवानरश्वनरैरपि कषायवस्त्रधारित्वं तद्वत्क्रीडनकं तथा तैलपा
नावगाहे च रक्तमाल्यानुलेपनं एवमादीनि चान्यानि दुःस्वप्नानि विनिर्दिशेत् पराशरः कायस्या
लेपनं वा कल्कषजलमपी गोमयस्नेहपंकैः कटकांजिकादेन वाप्यथ पतनमथवा नर्ध्यशोकप्रदायीति १९८

लैंगे स्वक्के घोहस्तेश्चैव गायते नृत्यते नरः याम्यादिदिग्विभागेतो गच्छेत्तदन्ते तस्य जीवितं अत्येण
योगाभीष्मद्रोणकर्णपर्व युद्धकांडादौ भारत रामायणादौ हेयः मासेविस्मयमीत्तरे स्वप्नस्तु प्रथमे
यामे संवत्सरफलो भवेत् षड्भिर्मासैर्द्वितीयामे नत्रिभिर्मासैस्तृतीयामिकाः चतुर्थमास मात्रेण फलं भव
निताम्यथा पराशरः पादाद्विपादोत्तरपादहृध्या वर्षार्धमासत्रयमासकालाः निशाविभागेषु च
त्वष्टुदृष्टः स्वप्नाः प्रतिष्ठफलप्रदाः स्युः वराहः आद्येवर्षात्तत्त्वर्धाद्वितीयपाकोवर्षार्धभा
गेतृतीये मासात्पाकः शार्वरीपश्चिमांते भवेत्तः ऐतरेयोपनिषदि अथस्वप्नाः पुरुषं कृष्णं कृष्णदं
तं पश्यति सएनं हंति वराहएनं हंति मर्कटएनमास्कंदयत्याशुवायुरेनं प्रवहति सुवर्णं खादित्वा
पगिरति मधुअश्नाति बिसानि भक्षयत्येकं पुंडरीकं धारयति खरैर्वराहैर्युक्तैर्याति कृष्णां धेनुं कृष्णव
त्सां नलदमाली दक्षिणामुखो व्रजयति मय एतेषां किंचित्पश्येज्जुपोष्य पायसं स्थालीपाकं श्रपा
यित्वा रात्रीसूक्तेन जुहुयात् एवमादौ तद्दर्शने शांतिरुक्तैः तथा चंडीपाठोऽपि पौष्टिकर्माणि सर्वत्र नृत्या
दुः स्वप्नदर्शने ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते
इत्यादि मार्कंडेयपुराणोक्तं पराशरः देवद्विजाग्निप्रतिपूजनानि मंत्रोपवासादि च विप्रसेवा तिलान्न

गोभूमिहिरण्यदानं दुःस्वप्नहं स्मृतिपथस्थं गोदानं तिलानामयुतं तत्र जुहुयात्तु समाहितः तिलोसी
ति च मन्त्रेण पश्चाद्दद्याच्च दक्षिणां ब्राह्मणांस्तर्पयेत्तत्र दक्षिणाभोजनादिना दानं च विविधं देवमशु
सेन स्वयं ब्रह्मेति मन्त्रपूर्वकं कृत्वा तत्समापयेयुः हीनातिरिक्तिवर्णैश्च व्यंजनैश्च स्वरैः [illegible]
जपो मे तन्मतादेव प्रसादेक्रुरु किंकरे महारुद्रजपे होमेन्यूनतस्त्वैर्वाधिकस्त्वयः सर्वः संपूर्णतां २९

यान्तत्वत्प्रसादान्मदाशिव पदत्तरपदभ्रष्टं मात्राहीनं च यद्भवेत् तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वरेति
ततश्चाचार्यः कुंडे स्थंडिले वा स्वशाखोक्तविधिनाग्निं प्रतिष्ठाप्यन्वासीनिर्वापादिना चरुं पक्काज्यभागांत
कृत्वा समित्तिलचर्वाज्यैः प्रतिद्रव्यं जपदशांशेन होमं कुर्यात् ऋत्विग्भिः सह अत्र सर्वेषां द्वादशैकादशि
नीजपरूपाणि शतं द्वात्रिंशाच्च तद्दशांशास्तु योदश रूपाणि तथाऽऽज्ञतयोऽष्टचत्वारिंशत्सषट्शता
नि चत्वारिंशानि सप्तशिष्टरूपद्वयेदशांशाश्चाज्ञतयो दश सर्वाः द्वयन्यूनसार्द्धषट्शतानि एतावान् प्र
तिद्रव्यं होमः अशक्तो वा दशपादिपक्षेणाशक्तो तु प्रतिमंत्रपक्षेण होमः कार्यः तत्र एकादशपात
संख्येन कपत्रे मूलमंत्रेण होमः कार्यः सर्वोपि वा होमो मूलमंत्रेणैव कार्यः मूलमंत्रस्य परमेष्ठी ऋषिः
रुद्रो देवता पंक्तिः छंदः होमादौ विनियोगः अथ न्यासः परमेष्ठिने ऋषये नमः शिरसि पंक्तये छंद
से नमः मुखे रुद्राय देवतायै नमः हृदये नमः इति शिखायां शंभवः इति शिरसि चेति ललाटे नमः इति ने
त्रयोः भवः इति श्रोत्रयोः चेति नासिकायां नमः इति मुखे शंकराय इति ग्रीवायां चेति हृदये मयः इति जठ
रे स्कंदाय इति नाभौ चेति श्रोण्यां नमः इति कट्योः शिवाय इत्यूर्वोः शिवतराय इति जान्वोः चेति पादयोः
नमः शंभवे इति हृदये मयोभवे इति शिरसि नमः शंकराय च इति शिखायां मयस्कराय चेति कवचा

शां॰क॰
२१८

ॐ नमः शिवाय चेति नेत्रत्रयाय वौषट् शिवतनवाय वेत्यस्त्राय फट् एवं होमं कृत्वा स्विष्टकृदादि पूर्णा
हुति प्राक्तनेहोमशेषं समाप्याचार्यो देयो गंधाद्युपचारैः हृदस्मो नरेषु जां कृत्वाभिषेकार्थं हृदमासा
शाग्रे कृतरतनस्युत्तरस्य स्वस्तिकोपेतं मंडलं कृत्वा तत्रोर्ध्वे वरकाष्ठपीठद्वयोपरि स्थिताहतस्त्रेनव
स्त्रौ दंपती प्राङ्मुखावुपवेश्य स्वयमुदङ्मुखस्तुरधिकसमप्राताकं पत्रैः कृत्वैकादशिन्या मूलमंत्रे
णाभिषिंचेयुः अत्र माध्यंदिनशाखाध्यायिनां रुद्राध्यायगतानां चतुः षष्टिमंत्राणामेकादशिन्यां च
तुरधिकप्रातप्रातसंख्या भवति तेनैकैकेन मंत्रेणैकैकेनार्कपत्रेणाभिषिच्य पत्राणि त्यजेत्तू ष्ण
त्येषां तु शाखिनां मूलमंत्रेणैव तावद्वारावृत्तेन तन्त्रेणैवाभिषेक इति वोध्यायनसंप्रदायः ततः पल्ल
वैः आपः शिशानरति सूक्तेनाप्यायस्वेति सूक्तेन यदंति यच्चेत्यादिपावमानीभिरापोहिष्ठेत्या
दिभिः समुद्रज्येष्ठा इत्यादिभिः सहस्राक्षेणेति त्रेयेन सुरास्त्वामित्यादि पौराणैश्चाभिषिच्या
शिवं शिवमिति वदेयुः इहवाचार्यान्त्यार्कपत्राणि तृष्णीं यादित्येके ऋत्विजस्त्वार्कपत्रैरेकादशिन्या
चार्यस्तु पंचपल्लवैः सूक्तैरभिषिंचेदित्यन्ये ततः सर्वौषधिभिः समस्तद्भिर्न घोउभयकलशस्य दाच
सर्वांगेषु तु लिप्तौ दंपती विशेषः कुशादिदेशेन तन्त्रिका स्विष्टं शिष्टेनाहृतेन सर्वकलशोदकेन स्ना

त्तिं गोशृङ्गोदकेन स्नापयेद्गुः ततस्तां शरीरस्यास्य ये देवा ये दोषा गर्भवीजयोः सर्वे ते नाशमायां
तु कर्मणानेन भो द्विजाः इति मंत्रमुच्चार्याभिषेकवाससी त्यक्त्वा शुद्धवाससी परिधाय शुक्लचंदनमा
ल्याद्यलंकृतो भवेत् ततश्चाचार्यो यजमानाभ्यामन्वारब्धः समुद्रादूर्मिरित्यादिमंत्रैः पूर्णाहुतिं कृ
त्वा वसोर्धारां जुहुयात् ततश्चावयेत्सूक्तमाग्नेयं वैश्वदेवं रौद्रमैंद्रं महावैष्णवं रसामज्येष्ठं साम च पा
ठयेत् ततो यजमानः सपत्नीकः कृतश्राग्रषकरणः पूजापूर्वकमाचार्याय पयस्विनीं धेनुं सव
त्सां यथाशक्तिदक्षिणां दत्वा ब्राह्मणेभ्यश्च भस्त्रादिभ्यो यथाशक्ति दत्वा हेमाद्यपय श्रीरुद्रायावाहि
तदेवताविसृज्य श्रीरुद्रप्रीत्यर्थं शतं दशं वा ब्राह्मणान् भोजयित्वा तैः संपूर्णतां वाचयित्वा जीववत्य
स्त्रियश्चाभिवर्धापनादि कृतमंगलो ब्राह्मणाशिषो गृह्णीयात् अनेन विधिना कार्यो रुद्रकलशस्ना
नकः शुभं च सकलान्भोगान् प्रसादाच्छंकरस्य चेत्याह भगवान्बोधायनः भट्टरामेश्वरसूनोभ
ट्टनारायणात्मजः रामकृष्णास्त्विमां चक्रे श्रीरुद्रस्नानपद्धतिः २ ॥ इति श्रीमन्नारायणभट्ट
सूरिसूनुरामकृष्णभट्टकृतो रुद्रस्नानविधिः अथाहेमाद्रौ भविष्योत्तरे रुद्रस्नाने युधिष्ठि
र उवाच रुद्रस्नानं विधानेन कथयस्व जनार्दन सर्वारिष्टोपशमनं सर्वसंपत्प्रदं नृणां कृष्ण

धां॰ क॰ २१५ उवाच देवसेनापतिं स्कंदं हृष्टं षडाननं प्रणम्य मुनिपुंगवो मनेन सर्वसंपत्प्रदं नृणां ईलः स्त्रवोसी
नमवाचह सर्वज्ञोहि कुमारस्त्वं प्रसादाच्छंकरस्य वै स्नानं रुद्रविधानेन स्त्रीणां ब्रूहि कथं भवेत् ॥ स्कं
द उवाच मृतवत्सा तु या नारी दुर्भगा पुत्रवर्जिता या स्त्री नैककन्यका वंध्या स्नानमासं विधापने अष्ट
म्यां वा चतुर्दश्यामुपवासपरायणा उत्तरायणे हि प्राप्ते सूर्यदिनेऽथवा नद्योस्तु संगमे कुर्यात्स्
स्नानं योषिद्विशेषतः शिवालयेऽथवा गोष्ठे विविक्ते वा गृहांगणे आहिताग्निद्विजेंद्रांस्तु धर्मज्ञं सत्यवादिनं
स्नानार्थं प्रार्थयेद्देवं निपुणं रुद्रकर्मणि ततस्तु मंडपं कुर्यात्तोरणस्तम्भदकुपल्लवं बद्धवंदनमालं च गो
मयेनानुलेपितं तन्मध्ये चतुरस्रं सा संपूर्णं पद्ममालिखेत् तस्य मध्ये महादेवं स्थापयेत्कर्णिकोपरि
दद्याद्दलेषु नंद्यादीन् चतुर्षु विधिपूर्वकं इंद्रादिलोकपालांश्च दलेष्वष्टसु विन्यसेत् देवीं विनायकं
चैव स्थापयेत्तत्र पार्थिव दत्वार्घ्यं गंधधूपं च पुष्पदीपं गुडोदनं भक्ष्याणि नानाविधानि दद्यात्फलानि विवि
धानि च ततः कोणेषु भृंगारमष्टस्य जलपूरितं एकैकं विन्यसेत्कुंभं तत्र सर्वौषधिसमन्वितं मं
डपस्य चतुर्दिक्षु दद्याद्भूतबलिं तदा आग्नेय्यां दिशि कर्तव्यो मंडपस्य समीपतः अग्निकार्यं शुभे कुं
डे पत्रपुष्पैरलंकृते लवणं पयसा युक्तं हुत्वेनं मधुना सह मानस्तोकेति मंत्रेण जुहुयात्कृतहोमे नवग्रहे २१५

219

द्वितीयस्याग्निकार्यस्य कर्ता च ब्राह्मणो भवेत् रुद्रजप्यकृदाचार्यः सितचंदनचर्चितं सितवस्त्रपरी
धानं सितमाल्यविभूषितं शोभयेत्कंकणै रुक्मकर्णवेष्टाङ्गुलीयकैः पूर्वमंडलवत्कार्यं द्वितीयमंड
लेऽशुभं तन्मध्ये तु सा नारी श्वेतपुष्पैरलंकृता श्वेतवस्त्रपरीधाना श्वेतगंधानुलेपना सर्वासनोपवि
ष्टा स्यादाचार्यो रुद्रजापकः अभिषिंचेत्ततस्तेनाम्रकुपत्रपुटांबुना चतुःषष्टिकचेन्नैव रुद्रैर्नैकादशो
चेत् षानानि सप्तपर्णानां चतुर्भिरधिकानि तत् पर्णानामिति कचानां तांच चतुःषष्टिसंख्यानामेकाद
शरुद्रैः पठितानामियं संख्या अच्छिद्रेणोनि मंत्रेण स्नानार्थं विनिवेशयेत् अथ स्थानाद्गजस्थानाद्व
ल्मीकात्संगमाद्ध्रदात् वेश्यागणाद्राजगृहाद्गोष्ठाद्दादापयेन्मृदं सर्वौषधिरोचनां च नदीतीर्थोद
कानि च एतत्सर्वं समं कलशे कुशलाकाचिदंगना रुद्राभिजपेन ततः स्नापयेत्कलशेन ततः तोयपू
र्णैर्दकलशैरश्वत्थदलपूरितैः सर्वदिक्संस्थितैः पश्चात्स्नापयेत्कलशाष्टकैः एवं स्नाना स्नापकाय द
द्यात् कांचनं तथा होतारे वाचयेत् दक्षिणां गोप्रदा स्विनी ब्राह्मणानामथान्येषां स्वशक्त्या मनिर्दुत
व स्वगवस्त्रकांचनादीनि दत्त्वा सर्वं तु समापयेत् कृतेनानेन विप्रेंद्र रुद्रस्नानेन भामिनी सुभगा कां
ति संयुक्ता वंध्यापि प्रजायते सर्वेष्वपि हि मासेषु ब्राह्मणानुमतेषु च तस्मादवश्यं कर्तव्यं प्रयत्नेन स्त्रीस्व

शां·क·
२२·

सावमरच्छति यः स्नानमाचरति रुद्रमिति प्रसिद्धं अष्टाविंशतिना हि जनवश्यानुमतेन तां गी दोषाद्विहंत्यसकलान्
स्वशरीरभाजो भर्तुः प्रिया भवति भारतजीववत्सा ॥ इति हेमाद्रौ भविष्योत्तरोक्तं वैधात्वहरहस्नानं ॥ अ
थ हेमाद्रौ वन्ध्यास्नानं ॥ पार्वत्युवाच येनजाः प्रजा वापि स्त्री प्रजा वापि जायते ग्रहरोगात्विना वापि
त्यक्त्वात्यजति वा पतिं देवदेव कथं तस्याः सर्वमेतद्धि नश्यति जायते च तथाभीष्टमतः इच्छामि शंक
र ॥ ईश्वर उवाच शृणु येन प्रनश्यति दोषाः स्त्रीणां त्वयोदितः जायते च तथाभीष्टं यथावत्कथयामि ते
गोमूत्रगोमयाभ्यां च भूशुद्धिं परिकल्पयेत् आहतो वितनोदेषो यत्र नान्यः प्रपश्यति कुंभांस्तमानयेत
द्वदेशे कं च तथा द्विजान् आहूय प्रार्थयेत्सर्वान्चंयेत्रिय हकालिकया प्रचाल्य स्थापयेत्कुंभान्पूरये
त्तीर्थवारिणा कृत्वात्मरक्षां विधिवत्स्वस्तिकं च तथा मतं यजेन्मां सर्वकामेषां प्राणानायम्यवाप्यतः
संकल्पावाप्यकुंभेषु मासे वा त्वावहं त्विति प्रासादिनं समस्तं नतद्वैव परिकल्पयेत् कुंभस्यवाप्यदे
शेन लोकपालान्प्रपूजयेत् बौधायनोक्तविधिना गंगामीशानसंनिधौ त्वरितश्च ततो नत्वा रुद्रादी
न्मूलमंत्रतः प्रणवश्चादितः कार्यो नमश्चान्ते तथैव च देवतापरमध्यस्तु मूलमंत्रः प्रकीर्तितः रु
द्रेकादशिनीमेकां स्वष्टाकुंभोदकं जपेत् पुनः संप्रज्य विधिवद्ग्रीरुद्रादींस्तथैव च एवं सर्वेषु कुंभे २२·

ब्रह्मस्वैः कार्यं द्विजोत्तमैः ततः कुंभात्समादाय क्रमात्सर्वं विसर्जयेत् एते देकादशावृत्त्यां कर्तव्यं द्विज
सत्तमैः एकादशावृत्तिविधिर्वक्तव्यो द्विजतर्पणं दत्वा च दक्षिणां तेभ्यो नमस्कृत्य विसर्जयेत् एवं दे
वाः प्रणश्यंति नायते नोपपद्यासिते ब्रुहपस्यापि कर्तव्यं ग्रहरोगान्वितस्य च भूम्यायुर्बलकामस्य तत्ति
थस्य जयापार्थिनः प्रतिसंवत्सरं यस्तु चैत्रशुक्ले शुभे दिने करोति श्रद्धया युक्तं मूनेकाढ्यं यत्नतः ये ॥ इति
रुद्रस्नानं ॥ अथ पाठनं चंडीसहस्रं चंडीव वाराहीतंत्रे चंडीपाठफलं देवि शृणुष्व गदतो मम संकल्प
पूर्वं संप्रजप्त्वा स्यामेशुभमनुक्रमात् पठनाद्वालिदानाद्विसिद्धिमाप्नोति साधकः उपसर्गोपशांत्यर्थं
त्रिरावृत्तिं पठेन्नरः ग्रहोपशांतौ कर्तव्यं पंचावृत्तिं वरानने महाभये समुत्पन्ने सप्तावृत्तिं समुच्चरेत्
नवावृत्त्या भवेच्छान्ति वाजपेयफलं लभेत् राजवश्याय भूत्यै च रुद्रावृत्तिमुदीरयेत् अर्कावृत्त्या काम्य
सिद्धिर्वैरिहानिश्च जायते मन्वावृत्त्यादेरिनाशः स्त्रीवश्यतामियात् सौख्यं पंचदशावृत्त्या श्रि
यमाप्नोति मानवः कलावृत्त्या पुत्रपौत्रधनधान्यागमं विदुः राजभीतिविमोक्षाय वैरिणोच्चाट
नाय च कुर्यात्सप्तदशावृत्तिं तथाष्टादशकं प्रिये महावृत्तविमोक्षाय विंशावृत्तिं पठेत्सुधीः
पंचविंशावर्तनात्तु भवेद्बन्धमोक्षणं संकटे समनुप्राप्ते दुश्चिकित्स्यामये तथा जा

श्रो·क
२२१


[illegible]सेकुलो[illegible]ग्रुपेमा[illegible]यते वैरिहृद्रो व्याधिहृद्रो धनधानाशेनथाद्दये
[illegible]व[illegible]त्यामेन[illegible]वेवानिपातके कुर्याद्यत्नाद्व्रताहत्तेततः संपद्यते शुभं
[illegible]हाढ्यैः शतनाहमादान्यसंवृद्धिस्तथापरा मनसाचिंतितं देविसिद्ध्येद्दृष्टांतराछ
[illegible] शतमावर्तनान्मन्त्रीराहणोतिस्वयं स्थिरा भक्त्या मनोरथान्कामान्नरो मोदतमा
[illegible]यात् चंड्याः शतावृत्तिपाठात्सर्वाः सिध्यंतिसिद्धयः शतसाहस्रिकाहृत्या दिक्रम त्या
[illegible]पत्तिर्भवेत् ततॐ नारायणाय नमः नराय नरोत्तमाय देव्यै सरस्वत्यै व्यासाय
इत्युक्त्वा य हेत विधिवाक्यपाठस्तम[illegible]लोकांतानां अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन तर
कुर्वे[illegible]विरामे मध्ये त्वध्यायादिपठेच्चरः तथा देव्यर्चामग्रतः कृत्वा ब्राह्मणानाविप्रोष[illegible]
ग्रंथ वा[illegible]थिलं कुर्याद्वाचकः कुरुनंदन ॥ अथ शतचंडीप्रयोगः नत्वा गणेश्वरं देवीपि
तरौ राघवं वशिवं रामकृष्ण तत्तनेन कमलाकरशर्मणा शमवंशाम लंचैव योगिनीतं
त्रमेवच वाराहीतंत्रमन्याश्च ग्रंथानालोक्य यत्नतः सहस्रचंडिकायाश्च शतचंड्यास्तथैव
च नवार्णन्यासविधिनाप्रयोगः प्रोच्यतेधुना तत्र यजमानः शुभदेशे मंडपं चिकीर्षुर्गणे २२१

च्या=२

गरेशाकुम्भेशोघवसुधाधूजनम्पूर. ᳚तत्वशञ्जां षोडशहस्तः सहस्रं चेडंग्रा । विंशति हस्ते मण्डपः तत्र

शाकुम्भेशोघवसुधानां पूजनं कृत्वा शतं चेडंग्रा षोडशहस्तं सहस्रं चेडंग्रा विंशतिहस्तं मंडपं प्रसाध्य त
दाग्रे पसंभावदेवा पूर्वोक्तदेवानां पूजां कृत्वा तान्सा पात्रेर्घ्यमादाय जानुभ्यामवनिं गत्वा प्राग
क्षे सर्वकल्याणविधायै लोकधारिणि उद्धृतासि वराहेण सशैलवनकानना मंडपं कारयाम्यह
त्वहर्षं शुभलक्षणे गृहाणार्घ्यं मया दत्तं प्रसन्ना शुभदा भव इति भूम्यै अर्घ्यं दत्वा मंडपं विधाय तन्मध्ये
ईशान्यां हस्तमात्रां चतुरंगुलवर्षां गृहवेदीं कृत्वा पश्चिमे शतं चेडंग्रा द्विहस्तं सहस्रं चेडंग्रा चतुर्हस्तं षड्ह
स्तं वा चतुरस्रं पद्मकुण्डं वा कुर्यात् तत्राष्टचत्वारिंशदंगुलानि चतुर्हस्ते करणी अष्टपंचाशदंगु
लानि सप्तपर्वाः पंचहस्ते वषट्हस्ते करणी एवं कुण्डं कृत्वा मंडपमध्ये अष्टकोणां वेदीं कुर्यात् त
यथा मध्यस्तंभचतुष्कमध्यसमे चतुरस्रं कृत्वा षोडशहस्तमंडपे षष्ठांशगुले विंशतिहस्ते च
विंशत्यंगुलाधिकहस्तेन कोणाष्टभयतो कर्षयित्वा सूत्रदानाद् अष्टास्रमिति राघवभट्टोक्तः प्रयोगः
अथवा षोडशांगुलाधिकहस्तमात्रं मध्ये चतुरस्रं कृत्वा तत्स्तवप्राणि चतुर्दिक्षु तन्मानानि च त्वा
रि चतुरस्राणि कृत्वा वा एवं चतुरस्राणां कोणाष्टद्वयात्सूत्राणि दत्वा दिक्षु चतुरस्रत्रयाणां स्य
जेदित्यष्टास्रमेवमष्टकोणां हस्तोच्चां वेदीं कृत्वा तत्परिवाहणे मंडलं सर्वतोभद्रं वा कृत्वोपा

यूकाद्यग्र्य





श्रा·क
२२२

रिविन्नानेकिंकिणीचामरादिभूतंवधाशान्तंचंडांपलेननदर्घेननदर्घेनवासहस्रचंडांतपलपंचके
ननदर्घेननवर्घेनवादेवीमूर्तिमष्टादशभुजांकुर्यात् अथप्रयोगः शुभेह्नि कर्त्तासपत्नीकः तिल
तैलेनकृताभ्यंगोभूषितःसंपूर्णकलशहस्तोभद्रंकर्णेभिरितिमंत्रंपठन्प्रदक्षिणीकृत्यपाङ्मुखद्वारेण
प्रविश्योपविश्यदेशकालौसंकीर्त्यममेहजन्मनिदुर्गाप्रीतिद्वारासर्वापच्छान्तिपूर्वकदीर्घायुर्वि
पुलधनपुत्रपौत्राद्यनवच्छिन्नसंततिवृद्धिस्थिरलक्ष्मीकीर्त्तिलाभशत्रुपराजयसदभीष्टसिद्ध्यर्थंम
मामुककार्यसिद्ध्यर्थंवासनवग्रहमखांशान्तचंडीसहस्रचंडीवासंयंब्राह्मणद्वारावाकरिष्ये तदं
गतयागणेशपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकृत्वाचार्यंवृत्वाप्रार्थयेत् आचार्यस्तुय
थास्वर्गेशक्रादीनांबृहस्पतिः तथात्वंममयज्ञेस्मिन्नाचार्योभवसुव्रतेति ततोब्राह्मणान्वृत्वा
यथाचतुर्मुखोब्रह्मास्वर्गलोकेपितामहः तथात्वंममयज्ञेस्मिन्ब्रह्माणंत्वामहंवृणेइतिप्रार्थ
येत् ततःसदस्यंगणेशजपार्थंवृत्वास्मिन् कर्मणिऋत्विक्त्वेनत्वामहंवृणेइतिशतचंडीनव
ऋत्विजोवृणुयात् सहस्रचंडीशान्तौ ततोद्वारपालान्वृत्वासभदेसर्वेषांमधुपर्कपूजांकु
र्यात् अंगुलीयककर्णभूषणांवस्त्रद्वयं जलपात्रासनार्घ्यपात्राभरणीदद्यात् दक्षिणांमाचार्यायदद्यात् २२२

अथाचार्यो पदत्र संस्थितं भूतमिति सर्षपान्विकीर्य पंचगव्येन कुशैरभ्युक्षी वोह्वयेतित्येनापोहि
ष्ठेन च मंडपं प्रोक्ष्य स्वस्थापनं नाहं इति मंत्रद्वयं पठेत् ततो मल्लक तंतुलापद्धति मार्गेण मंडप पूजा
प्राणाभिस्थापनं कुर्यात् ततः पूर्वे कालं वरि गजारूपे वज्रहस्ते पहिह्रि आगच्छ गंधपुष्पसहितं मि
मंत्री राज्ञ वलिं गृह्णन् मम सितं कुरु कुरु स्वाहेति दत्वा द्वारपालयो ब्रह्माणी माहेश्वरी चिविक्क त्येम्मा
याणामे पाचे विपाचे शोवति धयेप्रम्मति धये द्वाराश्रियेन मः इति संपूज्याधः वास्तुपुरुषमसितां
गभैरवं च पूजयेत् ततश्चाग्नेये उल्के अजारूपे पात्किहस्ते पहि हीत्यादि रुभैरवश्च ततः दक्षिणेक
गालिमहिषारूपे दंडहस्ते पहि ही द्वारपालयोः कौमारी वैष्णवी पूर्वं वज्रिक्क त्यादीत्संपूज्य चंड
भैरवं प्रपूजयेत् ततो नैरृत्यां रक्षोधि प्रेतारूपे खड्गहस्ते पहि हीत्यादि क्रोधभैरवश्च ततः पश्चिमे
कोवेरि ग्रस्थारूपे पाशहस्ते पहि हीत्यादि द्वारपालयो वाराही मिंद्राणी चिविक्क त्यादीष्ठ संपूज्य उन्म
त्तभैरवं प्रपूजयेत् ततो वायव्ये मृगवाहने कुशहस्ते पहि हीत्यादि कपालभैरवश्च ततः उत्तरे प्रतिलि
सिंहवाहिनि गदाहस्ते पहि हीत्यादि द्वारपालयोः चामुंडा महालक्ष्मी च विविक्क त्यादीन्संपूज्य भीषण
भैरवं प्रपूजयेत् ईशान्यां कंकालि वृषभारूपे त्रिशूलहस्ते पहि हीत्यादि संहारभैरवश्च ईशानपूर्वमध्ये स

वैराज्येऽग्रहिवाहने चक्रहस्ते एह्येहि ह्रीं त्वादिभूमिपूजां च पश्चिमनिर्ऋतिमध्ये सरस्वत्यै हंसवाहने अक्षसू
त्रकमंडलुहस्ते एह्येहि ह्रीं त्वादिभूतनिपूजां च ततो देव्या अग्रे आग्नेये बिम्बे वैष्णवे रुद्राय शान्त्या ब्रह्मणे पश्चिमे गणेशा
य मध्ये महाकाल्यै महालक्ष्म्यै महासरस्वत्यै वध्वजपताकोत्तरूपणां कृत्वा पूजयेत् अथाचार्यो ग्रहदेव्या अ
ह्रां स्त्रं पूजनमध्ये देव्याः पीठे उपविश्य गुं गुरवे गं गणपतये दां श्रियै दुं दुर्गायै क्षं क्षेत्रपालाय फः अस्त्राय फट्
इति वास्तुपुरुषाय महालक्ष्म्यै नमः इति नत्वा पृथ्वीत्यासनं कृत्वा अनंतासनाय विमलासनाय पद्मासनाय
नमः इति नत्वा अपसर्पन्तु भूतानि अपसर्पन्तु ते भूता इति वामपादघातत्रयं कृत्वा हुं अस्त्राय फ
ट् इति तालत्रयं कृत्वा गणपति सरस्वती क्षेत्रपालान्नत्वा रः फडिति अग्निप्राकारं विचिन्त्य समन्नाज्जल
धारां दत्वा मूलेनाचम्य प्राणानायम्य देशकालौ स्मृत्वा अस्मिन् प्रातश्चण्डीकर्मणि श्रीमहालक्ष्म्या नवार्ण
विधानेन न्यासपूजादि करिष्ये इति संकल्प्य भूतशुद्धिं कुर्यात् स्वजीवं हंसः सोऽहमिति शिरःस्थित
परमात्मनि संयोज्य पादाद्याजानु लं पृथ्वीमण्डलं हरामीति सर्वज्ञानपंगः जान्वादिनाभिं वं अप धा
लं नमस्ति· नाभेराकंठं रं तेजो वायो' कंठाद्याभ्रूमध्यं यं वायु· माकाशो' भ्रूमध्याद्ब्रह्मरंध्रं हं ब्रह्माकाश
महंकारे अहंकारं महति महांतं प्रकृतौ प्रकृतिं पुरुषे पुरुषं परमात्मनि महालक्ष्मीसंज्ञे ब्रह्मणि

त्रिघनीकृत्य हमिति व

संहारामीत्यसुषुम्णामार्गेण भूतानि संहृत्य वामकुक्षावंगुष्ठमात्रं पापपुरुषं यमिति पूरकेण १६ संशोष्य
रमिति अग्निबीजेन कुंभकेन ६४ दग्ध्वा यमिति रेचकेन ३२ निःसार्य वमित्यमृतबीजेन १६ प्लाव्य ल
मिति संमेलय्य लोमिति बीजेन देहावयवान् ध्यात्वा जीवं क्रों सोहं हंस इति तत्र संयोज्य ब्रह्मणः प्रकृतिः
प्रकृतेर्महान् महतोऽहंकारो अहंकारादाकाशः आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी पृथिव्या
ओषधय ओषधीभ्योऽन्नमन्नाद्रेतो रेतसः पुरुष इति देहोत्पत्तिं विभाव्य प्राणप्रतिष्ठां कुर्यात् प्राणप्रति
ष्ठामंत्रस्य ब्रह्मविष्णुरुद्रा ऋषयः ऋग्यजुःसामानि छंदांसि चैतन्यरूपिणी जगत्सृष्टिकर्त्री प्राणशक्ति
देवता आं बीजं ह्रीं शक्तिः क्रों कीलकं प्राणप्रतिष्ठायां विनियोगः ॐ आं ह्रीं क्रों अं कं ङं पृथिव्यप्तेजो आं
वाय्वाकाशात्मने आं अंगुष्ठाभ्यां ॐ रं चं शब्दस्पर्शरूपरसगंधात्मने ईं तर्जनीभ्यां ॐ उं टं श्रोत्रत्वक्च
घ्राण क्षुर्जिह्वाघ्राणात्मने ऊं मध्यमाभ्यां ॐ एं तं वाक्पाणिपादपायूपस्थात्मने ऐं अनामिकाभ्यां ॐ ओं पं
वचनादानविहरणोत्सर्गानंदात्मने औं कनिष्ठिकाभ्यां ॐ अं यं मनोबुद्ध्यहंकार इति हृदयात्मने अः
करतलकरपृष्ठाभ्यां एवं षडंगं ॐ ह्रीं आं क्रों यं रं लं वं शं षं सं हं हंसः सोहं क्रों ह्रीं आं मम प्राणा
इह प्राणाः पुनरेवं मम जीव इह स्थितः पुनरेवं मम सर्वेन्द्रियाणि ———— पुनरेवं मम वाङ्

अं पं ५ औं कनिष्ठिकाभ्यां नमः अं यं ५ अः करतलकरपृष्ठाभ्यां नमः हृदयादिषडङ्गन्यासः ततः कराष्टस्ये

प्राणा न्

यां० क०
२२५

नश्चक्षुःश्रोत्रजिह्वाघ्राणा इहागत्य स्वस्तये सुखेन सुचिरं तिष्ठन्तु स्वाहेति शिरसि दिवाकरदत्ताभिः सकुश
जलाञ्जलिं पञ्चदशवारं प्रणवजपेन १५ संस्काराणां भावयेत् अथ मातृकान्यासः अस्यां मातृकामन्त्रस्य ब्रह्मा ऋ
षिः गायत्री छन्दः मातृकासरस्वती देवता हलो बीजानि स्वराः शक्तयः त्वं कीलकं न्यासे वि० अं कं ५ आं
अंगुष्ठाभ्यां० इं चं० ५ ईं तर्जनीभ्यां० उं टं० ५ ऊं मध्यमाभ्यां० एं तं० ५ ऐं अनामिकाभ्यां० [illegible] षोडशदलेपद्मे अका
रादिषोडशस्वरान्यसेत् अं नमः आं नमः इत्यादि० हृदि द्वादशदले कादिठान्तान् नाभौ दशदले डादि
लिङ्गमूले फान्तान् तदधः षड्दले बादिलान्तान् आधारे चतुर्दले वादिसान्तान् ललाटे द्विदले हक्षमिति तत
मातृकाः अथ बहिर्मातृकान्यासः ऋष्यादिषडंगान्ते पूर्ववत् अं नमः शिरसि आं नमः मुखवृत्ते ने
त्रकर्णनासागण्डकपोलौष्ठदन्तपंक्ति[redacted]षु इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं इति न्यसेत् अं जिह्वाया
मः कंठोदक्षकरसंध्यग्रेषु कवर्गं वामकरे चवर्गं दक्षिणवामपादयोः टतवर्गौ कुक्षिद्वयपृष्ठ
नाभ्युदरेषु पवर्गं यं हृदि रं कंठे लं ककुदि वं स्कंधयोः शं हृदादिदक्षकरे षं हृदादिवामकरे सं हृ
दादिदक्षपादे हं हृदादिवामपादे लं क्षमिति व्यापके अथ निवृत्त्यादिकलान्यासः अं निवृत्त्यै नमः
शिरसि आं प्रतिष्ठायै० मुखे इं विद्यायै० ईं शान्त्यै० नेत्रयोः उं इन्धिकायै० ऊं दीपिकायै० कर्णयोः ऋं २२५

गुदमेढ्रान्तराले

रेचिकायै॰ ऊं मोचिकायै नासापुटयोः लृं परायै॰ लॄं सूक्ष्मायै॰ कपोलयोः एं सूक्ष्मायैः कपोलयोः
ऐं सूक्ष्मामृता ऐं ज्ञानामृतायै दंतपंक्त्योः ओं आप्यायिन्यै औं व्यापिन्यै ओष्ठयोः अं व्योमरूपायै॰ जिह्वायां
अः अनंतायैः कंठे अथ दक्षकरे कं सृष्ट्यै खं ऋद्ध्यै गं स्मृत्यै॰ घं मेधायै॰ ङं कान्त्यै॰ इति वामकरे चं लक्ष्म्यै॰
छं द्युत्यै॰ जं स्थिरायै॰ झं स्थित्यै॰ ञं सिद्ध्यै॰ दक्षपादे टं जरायै ठं पालिन्यै॰ डं शान्त्यैः ढं ऐश्वर्यै णं रत्यै॰
इति वामपादे तं कामिकायै॰ थं वरदायै दं ह्लादिन्यै॰ धं प्रीत्यै॰ नं दीर्घायै इति पं तीक्ष्णायैः फं रुद्रायैः
कक्ष्योः बं भ्रमायै॰ पृष्ठे भं निद्रायै नाभौ मं तन्द्र्यै॰ उदरे यं क्षुधायै॰ हृदि रं क्रोधिन्यै॰ कंठे लं क्रिया
यै ककुदि॰ वं उद्गार्यै॰ स्कंधयोः शं मृत्यवे॰ दक्षकरे षं पीतायै॰ वामे सं श्वेतायै॰ दक्षपादे हं अरुणायै॰ वा
मपादे ळं असितायै मूर्द्धादिपादांतं इति कलान्यासः ततो मूलेन त्रिः प्राणानायम्य अस्य श्रीनवार्ण
मंत्रस्य ब्रह्मविष्णुरुद्रा ऋषयः महाकालीमहालक्ष्मीमहासरस्वतीदेवता गायत्र्युष्णिगनुष्टु
भ्छंदांसि नंदजाशाकंभरीभीमाः शक्तयः रक्तदंतिकादुर्गाभ्रामरीबीजानि अग्निवायुःसूर्यस्तत्वानि जपपूजादो
अथैकादशन्यासः ह्रींबीजप्रकाशात् वृषभकारादिचक्रांतान् वर्णान्गुह्यवाहिनीं मातृकास्थाने न्यसे
त् ह्रीं अं नमः शिरसीत्यादि ओं ऐं ह्रीं क्लीं बीजादीनि करद्वये कनिष्ठाद्यंगुष्ठांतेषु करतल करपृष्ठम

ग्रं॰ क॰ णिबंधेषु वन्यसेत् ॐ ऐं क्रीं ह्रीं नमः कनिष्ठिकाभ्यां नमः इत्यादि एवं हृदयादिषडंगाः एवं दशादिक्षु च
इति द्वितीयः ॐ क्रीं ऐं ब्राह्म्यै नमः पूर्वे ॐ ह्रैं माहेश्वर्यै आग्नेय्यां ॐ क्रीं क्रौं कौमार्यै दक्षिणे ॐ क्रीं ह्रीं वैष्ण
२२५ व्यै निर्ऋत्यां ॐ क्रीं वाराह्यै पश्चिमायां ऐं क्रीं नारद्राण्यै वायव्ये ॐ ह्लीं नारसिंह्यै उत्तरे ॐ क्रीं रक्ताचामुं
डायै ऐशान्यां ॐ क्रीं वामेश्वर्यै ऊर्ध्वायां ॐ क्रीं सप्तद्वीपेश्वर्यै भुवि ॐ क्रीं नागेश्वर्यै पाताले इति तृतीयः
सर्वज्ञादौ प्रणवः ॐ नं देवजायै पूर्वे फ्रैं रक्तदन्तिकायै दक्षिणे ऐं फ्रैं शाकंभर्यै पश्चिमाने फ्रें दुर्गायै वामां
गे फ्रैं भीमायै मस्तकादादिपादांतं श्रीं भ्रामर्यै पादादिशिरोंतं इति चतुर्थः ॐ क्रीं ऐं ब्राह्मण्यै नमः पादा
द्यानाभि ॐ क्रीं श्रीं विष्णवे नाभेराहृदयं ॐ क्रीं महेश्वराय हृदयाच्छिरः ॐ क्रीं हंसाय पादहृदये ॐ क्रीं वै
नतेयाय करद्वये ॐ क्रीं वृषभाय चक्षुषोः ॐ क्रीं हरये व्यापकं इति पंचमः ॐ क्रीं महालक्ष्म्यै म
ध्यदेहे ॐ ऐं सरस्वत्यै ऊर्ध्वदेहे ॐ क्रीं महाकाल्यै अधोदेहे ॐ क्रीं ह्सौः सिंहाय स्तनद्वयोः ॐ क्रीं महि
षमर्दिन्यै नमः पादयोः ॐ क्रीं चंडिकायै सर्वांगे इति षष्ठः ॐ ऐं नमः मूर्ध्नि ॐ क्रीं नमः दक्षनेत्रे ॐ
ह्रीं नमः वामनेत्रे ॐ चां दक्षकर्णे ॐ मुं वामकर्णे ॐ डां नासिकायां ॐ यैं नमः मुखे ॐ विं लिंगे ॐ
च्चे पायौ इति सप्तमः ॐ च्चे पायौ ॐ विं लिंगे ॐ यैं मुखे ॐ डां नासिकायां ॐ मुं वामकर्णे ॐ चां दक्षि २२५

णो कर्णे ॐ ह्रीं वामनेत्रे ॐ क्लीं दक्षिणनेत्रे ॐ ऐं॰ मूर्ध्नि इत्यष्टमः ऐं ह्रीं क्लीं चामुंडायै विच्चे स्वाहेति
मूलमन्त्रेण त्रिर्दक्षिणपार्श्वमवामांसेषु आरोहावरोहाभ्यां शिरःस्तः पादान्तं पादादिशिरोंतं च न्यसेत्
इति नवमः एवं व्याकसमग्रमूलमन्त्रेण हृदयादि षडंगः इति दशमः ततः खड्गिनी शूलिनी घोरेत्य
केश्लोकमन्त्राय वर्णं ध्यात्वा हृदयाय नमः शूलेन पाहि नो देवीति श्लोकचतुष्टयेन रक्तवर्णं ध्यात्वा
शिरसे स्वाहा सर्वस्वरूपे सर्वेशे इति श्लोकपंचकं पठित्वा धेनवर्णं ध्यात्वा शिखायै वषट् इत्येकादश
न्यासः ततो योनिमुद्रां दर्शयेत् सा चैवं दक्षिणकरस्य तर्जन्या वामस्यानामिकां वामतर्जन्या द
क्षिणस्यानामिकां च धृत्वा अग्रमध्यमांगुलीद्वयेन दग्रेकनिष्ठिकाद्वयं तदग्रे गुष्ठमिति अथ ध्यानं द्वय
खेनाननानीलभुजासश्वेतस्तनमंडला रक्तमध्या रक्तपादा नीलजंघोरुरुन्मदा सुचित्रजघना चि
त्रमाल्याम्बरविभूषणा चित्रानुलेपना कान्तिरूपसौभाग्यशालिनी अष्टादशभुजा पूज्या सा सहस्र
भुजा सती आयुधान्यत्र वक्ष्यन्ते दक्षिणाधः करक्रमात् अक्षमाला च कमलं बाणोसिः कुलिशं
गदा चक्रं त्रिशूलं परशुः शंखो घंटा च पाशकः शक्तिर्दण्डश्चर्म चापं पानपात्रं कमण्डलुमिति
ततो देवीं सर्वतोभद्रं कृत्वा देवतास्थापयेत् मध्ये वालाणां उग्रादिसामादीन् । वायुसोमम

ध्यादिशक्रमेण जन्मयाश्चेति वसून् आहृशामस इति रुद्रान् त्वाजुर्द्रवियानिति द्वादशादित्यान् अश्विनाव
ति रित्यश्विनौ ओमासश्चर्षणीधृत इति विश्वेदेवान्· अभित्यं देवमिति समयुत्तान् आयंगौरिति सर्पान्
अप्सरसां गंधर्वाणामिति गंधर्वाप्सरसः ब्रह्मसोममध्ये कुमारं मातेति कुमारं ऋषभं मे त्वृषभं यदिति
विजनिष्टेति दंदं च वह्नीन्द्रमध्ये नाम अग्निवर्णामिति दुर्गां इदं विष्णुरिति विष्णुं च अस्ता(त्रि)मध्ये उदीरतामि
ति स्वधां ब्रह्मयममध्ये परं मृत्यो इति मृत्युरोगान् ब्रह्मनिर्ऋतिमध्ये शंनो देवीरित्यपः ब्रह्मवायुमध्ये
मरुतो यस्येति मरुतः ब्रह्मणः पादमूले स्योनेति भूमिं तत्रैव इमं मे गंगा इति गंगादिनपः धाम्नो धाम्न
इति सप्तसागरांश्च वहिः सोमादिसंनिधौ क्रमेण गदा त्रिशूलं वज्रं शक्तिं दंडं खड्गं पाशांकुश· कृशाव
यनहृत्तरादि गोतमं भरद्वाजं विश्वामित्रं कश्यपं जमदग्निं वसिष्ठमत्रिमरुंधतीं एवांदिपुंडीकौमा
रीं ब्राह्मीं वाराहीं चामुंडां वैष्णवीं माहेश्वरीं वैनायकीं ततस्तत्र रत्नावाणसंपूज्य वा नन्मध्ये महीद्यौरि
ति भूमिं स्पृह्णोषधयः सामिनि समधान्यानि चाकलशेषु इति हेमं राजतं ताम्रमयं मृन्मयं वा
कलशं संस्थाप्य गंधद्वारामिति गंधं याओषधीरिति सर्वौषधीः काण्डात्काण्डादिति दूर्वा अश्वत्थेवर
इति पंचपल्लवान् स्योनेति सप्तमृदः याः फलिनीरिति फलं सहिरण्यानि पंचरत्नानि ^ युवेति वस्त्र य २२९

पूर्णादर्वीति पूर्णपात्रं निधाय
तत्र वस्त्रे-२

या चतुर्द्वारं चतुरस्रत्रयं कृत्वा तन्मध्ये वषट्कोणाः संपद्यंते तन्मध्ये वान्यत्रिकोणं कृत्वा तन्मंडलमम
न्यत्रिकोणमिति उद्धारो यथा यद्वा मध्ये त्रिकोणं तद्बहिः षट्कोणं तद्बाह्ये हतेन तद्बाह्ये ष्टौदलानि तद्बा
ह्ये चतुर्द्वारं चतुरस्रत्रयमिति एवं यंत्रं विलिख्य तत्र शतवंडं हेमपलेन तदर्धेन तदर्धेन वा कृतं तासह
स्रचंडं तत्र विंशति दश पंचान्यतमसुवर्णकृतं ध्यानोक्तामष्टादशभुजां रहस्योक्तामष्टभुजां वा महिषा
सुरहंत्रीं सिंहस्थां देवीमुत्तिरक्तपट्टकूलयुग्मच्छन्नां संस्थाप्य पूजयेत् तद्यथा स्ववामे स्त्रायफडिति
ज्वालितं मूलेन मूलजलपूरितं कुंभं निधाय पुष्पाक्षतगंधादिभिर्मूलेन तत्पात्राणि पूर्यादेवं देवि
ह्द णोन्यसेत् ततो मध्यस्थपद्यात्रिकोणेनाँ बहिः षट्कोणं तद्बहिश्चतुरस्रं तद्बाह्ये हंते गोमयेन जलेन वा वि
लिख्य शालमध्यादष्टभ्य वह्नयेदशकलात्मने धूम्राच्चैशाक्रपर्यन्ते ज्वलिन्यै ज्वालिन्यै विस्फुलिंगि ऊष्मायै
न्यै सुश्रियै सुरूपायै कपिलायै हव्यवाहायै कव्यवाहायै नमः इत्यर्च्य षट्कोणे ग्नीशानिर्ऋतिवा
युकोणेषु हृदयाय नमः शिरसे स्वाहा शिखायै वषट् कवचाय हुं इति अग्रे नेत्रत्रयाय वौषट् सर्वतः
अस्त्राय फडिति अष्टभुजैः संपूज्यागुरुज्वालिनं पात्रं संस्थाप्य हं सूर्यमंडलाय द्वादशकलात्मने नमः
तपिन्यै तापिन्यै धूम्रायै मरीच्यै ज्वालिन्यै रुच्यै सुषुम्णायै भोगदायै नमः विश्वायै बोधिन्यै धारिण्यै क्षमायै

द्यातैः म्णा

नैड्ग्रा

पा॰ क॰ २२७

इति षोविद्धनैः संपूज्य तत्र गंधपुष्पाणि हृदयमंत्रेण दत्त्वा ह्रां नमः लं नमः हं नम इत्यादीनि विलोममा
तृकादिभिः शिरोमंत्रेण जलेनाभ्युक्ष्य ॐ सोममंडलाय षोडशकलात्मने· अमृतायै· मानदायै· पूषायै·
तुष्ट्यै· पुष्ट्यै· रत्यै· शशिन्यै· चंद्रिकायै· कांत्यै· ज्योत्स्नायै· श्रियै· प्रीत्यै· अं यै· पूर्णायै· पूर्णामृतायै न
मः कामदायै· इत्यभिमंत्र्य अंकुशमुद्रया हृत्सूर्यमंडलात्तीर्थमाकृष्यावाहनादिमुद्राः प्रदर्श्य शिवामं
त्रेण धेनुमुद्रां मालिनीमुद्रां गरुडमुद्रां करद्वयांगुष्ठतर्जन्यग्रसंयोगे मालिनीमुद्रा करद्वय ष्ठसंयो
ज्य कनिष्ठिकाभ्यामनामिके वस्त्रष्टभ्याथांगुष्ठौ पुरतस्तर्जन्यौ च संयोज्य मध्यमानामिकयोर्मुक्तयोः प्र
सारितयोस्तु गरुडमुद्रां च दर्शयेत् नेत्रमंत्रेण संवीक्ष्य कवचमंत्रेण सकलीकृत्य तत्र षडंगानि विन्यस्या स्पर्शं
स्त्रमंत्रेण र क्षां कृत्वा मूलेन गंधपुष्पैरभ्यर्च्य हस्तेनाच्छाद्य मूलेन सप्तवारमभिमंत्र्य मुद्रया संरक्ष्य चक्र
तज्जलं किंचित् कुंभे दत्त्वा स्त्रमंत्रेणात्मानं प्रजाद्य वाणीच संप्रोक्ष्य मूलेन षडंगं कृत्वात्मानं गंधपु
ष्पैरभ्यर्च्य मूलेनाक्षिः स्वशिरसि पुष्पांजलिं दत्त्वा धूपदीपनैवेद्यादि मनसा निवेद्यैवं वह्नपः सन्मूले
न महादेवाय जयंतिने यप्रघ्यमाण्डाय कुंभोदराय नमः इति वामे दक्षिणा हस्ते प्रदद्यात्पूपीठं पूजयेत् यथा
देवी दक्षिणे गं गुरुभ्यः पं परमगुरुभ्यः पं परात्परगुरुभ्यः पं परमेष्ठिगुरुभ्यो नमः इति संपूज्य वामे गं गणपतये· २२७

पश्चात् वन्ताके

अस्तानाय अ=४

ॐ दुर्गायै॰ क्षं क्षेत्रपालाय॰ मध्ये आधारशक्त्यै॰ मूलप्रकृत्यै॰ कालाग्निरुद्राय॰ महामंडूकाय॰ कूर्माय
न॰ वराहाय॰ अनंताय॰ भूम्यै॰ अमृतार्णवाय रत्नद्वीपाय॰ हेमगिरये॰ नंदनोद्यानाय॰ मणिभूम्यै॰
रत्नमंडपाय॰ कल्पतरवे॰ रत्नसिंहासनाय नम इति संपूज्य आग्नेयादिकोणेषु धर्माय॰ ज्ञानाय वैराग्या
पूज्य य॰ ऐश्वर्यायेति संपूज्य दिक्षु अधर्माय अवैराग्याय अनैश्वर्याय ऊर्ध्वकमले अधोनंताय॰ मध्ये वास्तु
ॐ कामगिरि पीठेश्वर पुरुषायै निःसंपूज्य मध्ये सत्त्वाय॰ रं रजसे॰ तं तमसे॰ मां मायायै॰ विं विद्यायै॰ ॐ कां कामपीठाय पूर्णगिरि
हितां कामगिरि पीठेश्वर्यं वा पादुकां पूजयामि उड्या= रिपीठाय॰ सर्वा पूर्वादिदिक्षु [illegible] णपीठेश्वरसहितां उड्या [illegible] णपीठेश्वर्यं वा पादुकां पूजयामि॰ ॐ मां मातृ
पीठेश्वरसहितां मातृकापीठेश्वर्यं वा पूजयामि॰ ॐ जां जालंधरपीठेश्वरसहितां जालंधरपीठेश्वर्यं
वा पूजयामि ॐ कों कोल्हारगिरिपीठेश्वरसहितां कोल्हारगिरिपीठेश्वर्यं वा पू॰ ॐ पूं पूर्णगिरिपीठे
श्वरसहितां पूर्णगिरिपीठेश्वर्यं वा पूज॰ ॐ सं संहारगिरिपीठेश्वरसहितां संहारगिरिपीठेश्वर्यं वा
पू॰ कां कामरूपपीठेश्वरसहितां कामरूपपीठेश्वरसहितां कामरूपपीठेश्वर्यं वा पू॰ ततः पूर्वादिदिक्षु
जै वीं नमोंतैः सर्वज्ञगणेशाय॰ क्षेत्रपालाय॰ पादुकेभ्यो॰ वटुकेभ्यो॰ [illegible] इत्यादिः जयायै॰ विजया
यै॰ जयंत्यै॰ अपराजितायै॰ नवैव अग्निमुखवेतालाय॰ प्रेतवाहनवेतालाय॰ ज्वालामुखवेताला

आगे

नालाय=१

अं धा=३ श्री उं क्षु=२

शा·क·
२२८

पृ· धूम्रान्तवेतालाय· कंदाय· दलेभ्यः केसरेभ्यः कर्णिकायै· अं सूर्यमंडलाय· सोममंडलाय· मंव
ह्निमंडलाय· आं आत्मने· अं अन्तरात्मने· पं परमात्मने· ह्रं ज्ञानात्मने· ततः दिक्षु मायायै चैवे
न्तायै· डं डुण्ड्यै· निं निद्रायै· तुं तुष्ट्यै इति पूर्वे· क्षां क्षमायै· ग्रं ग्रान्त्यै· तं तस्मायै· कां कान्त्यै· जा
जात्यै· लं लज्जायै· इति दक्षिणे· शं शान्त्यै· श्रं श्रद्धायै· कां कान्त्यै· लं लक्ष्म्यै· धं धृत्यै· हं हृध्यै· इति
पश्चिमे सं सरत्यै· दं दयायै· तं तुष्ट्यै· पुं पुष्ट्यै· मां मातृकायै· भ्रां भ्रान्त्यै· इत्युत्तरे ॐ ह्रीं सर्वश
क्ति कमलासनाय सर्वात्मसंयोगपीठात्मने नमः इति पीठपूजा ततो हृदिस्थां ज्योतिर्मयीं सपरि
वारां महालक्ष्मीं ध्यात्वा आगच्छ वरदे देवि दैत्यदर्पनिषूदनि पूजां गृहाण सुमुखि नमस्ते शंकर
प्रिये दुर्गे देवि समागच्छ सांनिध्यमिह कल्पय बलिपूजां गृहाण त्वमष्टाभिः शक्तिभिः सहेति मंत्रं
पठित्वा दक्षिणनासारंध्रेण वायुं पुष्पाञ्जलावानीय मूलेन मूर्तौ आवाहनादि मुद्रां प्रदर्श्य मुद्राश्च
दर्शयन् मूलेन षडंगं कृत्वा मूलेन जयंती मंगला काली इत्यनेन वा आसनपाद्यार्घ्याचमनमधुपर्कादि वेद
येत् तत्र पात्रचतुष्टयमस्त्रेण प्रक्षाल्य गंधादिभिः लिपेत् तत्र पाद्ये दूर्वाविष्णुक्रान्ता पद्मश्यामाकाप
द्मानि अर्घ्ये गंधपुष्पाक्षतकुशाग्रतिलसर्षपयवदूर्वाः आचमनीये जातीफलकंकोललवंगानि

ग्र

सर्वा

स्वावा

पत्र

२२८

मधुपर्कं दधिमधु च ततः सुगंधतैलं पंचामृतोस्नोदकं तीर्थोदकैः श्रीसूक्तदेवीसूक्तसरस्वतीसूक्तैरभि
षिच्य पुनराचमनं दत्वा पट्टकूलयुगं कंचुकाभरणादि गंधविल्वपत्रनानापुष्पहरिद्राकुंकुमसिंदूराल
क्तकपरिमलद्रव्याणि समर्प्य पंचविंशति द्वादशाशीति सहस्राणि पंकवा सहस्रपुष्पाणि समर्पयेत्
त्रिकोणे देव्या ष्यावरणपूजा दक्षिणे ऐं महाकाल्यै विच्चे नमः वामे क्लीं सरस्वत्यै विच्चे नमः वामे हूं महिषाय द हू
क्षिणे हौं सिंहाय· पुरः गं गणपतये· क्षं कालाय पश्चात् अं मृत्यवे· षट्दलेषु हृदयाय ह्रीं गौर्यै
श्रीं विल्ववे· श्रीं लक्ष्म्यै· ऐं ब्रह्मणे· ऐं सरस्वत्यै· तत्रैव· ह्रां हृदयाय ह्रीं शिरसे स्वाहा ह्रूं शिखायै हूं = हि = हूं =
हः ह्रैं कवचाय हुं· ह्रौं नेत्रत्रयाय· ह्रः अस्त्राय· तत्रैव गुरुभ्यः पं परमगुरुः· पं परमेष्ठि· [illegible]ये· हराय·
गणेशाय· दिक्षु श्रीं ब्राह्म्यै· लीं रुद्राण्यै· ह्रौं नारसिंह्यै· स्रैं चामुण्डायै· दिक्षु अं असितांगभैरवाय·
रुं रुरुभैरवाय· चं चंडभैरवाय· क्रों क्रोधभैरवाय· उं उन्मत्तभैरवाय· कं कपालभैरवाय· भिं भीष
णभैरवाय· सं संहारभैरवाय· इन्द्रादि लं इंद्राय रं अग्नये· मं यमाय· क्षं निर्ऋतये· वं वरुणाय·
मं वायवे· सं सोमाय· हं ईशानाय· बहिः वज्राय· शक्त्यै· दण्डाय· खड्गाय· पाशाय· अंकुशाय· ग
दायै· त्रिशूलाय· ततो मूलेन धूपदीपौ दत्वा नैवेद्यमस्त्रेणाभिमंत्र्य मूलेन प्रोक्ष्य कवचेनावगुण्ठ्य



खपूरे

अष्टौ च्य स्त पंक्तीः कृत्वा

धूपं दत्वा धेनुमुद्रयामृतीकृत्य तेन निवेद्यमासमुद्रां प्रदर्श्य मध्ये पानीयमुत्तरापोशनं च दत्वा करोद्वर्त
नं फलं ताम्बूलं दक्षिणां नीराजनं छत्रचामरदर्पणगीतवाद्यादीनि प्रशस्तं कृत्वा नवरात्रविधिना योक्तवि
धिना माषभक्तकूष्माण्डादिबलिं दत्वा पूजां समर्पयेत्‌ अथ चतुःषष्टियोगिनीपूजा तत्र देव्यग्रे र
क्तवस्त्रे ऽष्टौ ष्टौ कोष्ठाणीत्येकापंक्तिः एवं वक्ष्यमाणनामभिरावाह्य संपूज्य पायसबलीन्दद्यात्‌ शुक्ल
वर्णे शूलडमरुपाशासिधरे सर्वालंकारभूषिते समस्तसैन्ये जये एह्येह्यागच्छेमं पायसबलिं गृहाण ममे
प्सितं कुरु स्वाहा एवं विजये· जयंति· अपराजिते· दिव्ययोगिनी· महायोगिनी· सिद्धियोगिनी· ग
णेश्वरि· ततः गौरवर्णे अक्षमालांकुशपुस्तकवीणाधरे प्रेताशिनी एह्येहीत्यादि प्राग्वद्देव· डाकिनी
कालिका कालरात्रि निशाचरि· वंकारिणी· रुद्रवेतालि· फट्कारिणि वीरभद्रे धूम्राक्षि· कलहप्रिये
ततो विद्युत्कान्तिभयध्वजबाणधनुः पाशांकुशत्रिशूलेएह्येहीत्यादि· एवं रक्ताक्षि· विश्वरूपे भयंकरि वी
रकौमारि· चंडिके वाराहि· मुंडधारिणि ततः आदित्यवर्णे कमलाक्षमालाभयवरकरे भैरवि
एह्येहीत्यादि एवं ध्वांक्षिणि धूम्राक्षि प्रेतवाहिनि खट्वांगि [illegible] दीर्घलंबोष्ठि मालिनि· ततः स्तनी
लेपाब्जचक्राभयवरकरे कालि [illegible] ततः भुजंगिनि एह्येहीत्यादि एवं चक्रिणि कंकालिनि· २२५

गदा द ग=४

हुंकारिणि [illegible] ज्वालाशक्तिमभयवरदकरे ऊर्ध्वकेशि एह्येहीत्यादि

भे=१ विरूपाक्षि २ शुष्का ३ नरभोजिनि ४ = ५

नी ५ मन्त्रयोगिनि = २

त्रो गं ततः पुञ्जाभिमे खड्ग=१

ऋवनेश्वरि क्रोटकि महामारि यमहृति· करालिनि विटपहिंसापरशुहस्ते कोशिनि· एह्येहि त्वरित प
वेमर्दिनि रोमजंघे· निवारिणि विष्णालिकामे किलोलि मृत्युमरिचि ततः छुम्नवर्णेन कृतनखे दभिंडिपाल
मालाकरे मुद्गरधारिणि एह्येहि त्वरित एवं व्याघ्रि[illegible]कात्विरिणि प्रनरूपिणि धूर्जटि घोरि करालि·
प विकराले विनि इति योगिनी पूजा ततः गणपतये· वं वटुकाय पिंगलभासुरनेत्राय वलिं गृह्ण रत्तर क
दनर क्रां क्रीं ॐ स्वाहेति वटुकाय क्षेत्रपालाय च दत्वा प्रभञ्जन वलिं दद्यात् तत्र मंत्रः सर्वपीडोपपीडानि
हारोयस्तु रोगापिच क्षेत्र क्षेत्रत्र संदेहास्सर्वे दिग्भागे संस्थिताः योगिनी योग वीरेन्द्राः सर्वे येत्र समाग
ताः नगरे वाप्यवाग्रामे श्रृंटव्यां सरितस्तटे वापिकूपेषु हृदे च श्मशाने चत्वरेषु पे नाना रूपधरापे च
वहु रूप धरा श्चये तेसर्वे चैव संतुष्टा वलिंगृह्णन्तु मे सदा शरणागतोस्म्यहं तेषां ते सर्वे मम सप्रदाः
वलिना नेन संतुष्टाः प्रयच्छन्तु ममाशिषं ते सर्वकार्याणि कुर्वन्तु दोषांश्च ध्नंतु मे सदेति अथ कुमारि
पूजा ना[illegible]स्वप्रस्त्वहं पाणे ते न वै पूज्याः आत्मणी सर्व कार्येषु जयार्थे नृप वेश्मनो लाभार्थे वै एवं वेशा
स्यांसत्ता थे शूद्रं वंशजा दारुणे त्यजाती ताः पूजयेद [illegible] नोर रस्तु न्कामाग्रा स्यानपा नवमिलेभ
ते भूमिमे श्वर्यं दिग्वणे नत पक हस्सालभेत मंपकेकेन श्रियं लभेत् वर्ज्यास्तु एकवर्षा तथा कन्या

वा ते धि न- व

यां॰ क॰
२३

पूजार्थं नैव विवर्जयेत् । ग्रंथिस्फुटितवर्णांगीं रक्तश्यामव्रणांकितां । जात्यंधां केकरां काणीं कुरूपां तनुरो
मशां । वर्जयेत्सर्वकार्येषु दासीगर्भसमुद्भवामिति । विशेषो मत्स्यकेतुनिर्णयसिंधौ ज्ञेयः । तत्र सुगंधतै
लाभ्यंगं कारयित्वालंकृतां पीठे उपवेश्य देशकालौ स्मृत्वामुकफलसिद्ध्यर्थं ममुककर्मणि कुमारी
पूजनं करिष्य इति संकल्प्य मूलेन षडंगं कृत्वा मूलमंत्रमंत्रार्थमंत्राक्षरमयीं लक्ष्मीं मातॄणां रूपधा
रिणीं । नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहमित्यावाह्यासनं पाद्यं च दत्वा सोदकेन पादौ प्रक्षा
ल्याचम्याचमनं स्नानं पट्टकूलवस्त्रं कंचुकालंकारादि दत्वा सुगंधेनानुलिप्य हरिद्रकुंकुमसिंदूराक्ष
तकांदनपुष्पमालाभिरभ्यर्च्य धूपदीपौ दत्वा पायसान्नानाभक्ष्यैर्भोजयेत् । भोजनकाले च मूलमंत्रं
समग्रं तां वा पठेत् । ततो नानाफलतांबूलदक्षिणानीराजनपुष्पांजलीन् दद्यात् । एवमन्याः पूज
येत् । आवाहने तु मंत्रभेदः । मंत्राक्षरमयीमिति सर्वत्रोक्ता । जगत्पूज्ये जगद्वंद्ये सर्वशक्तिस्वरूपिणि
पूजां गृहाण कौमारि जगन्मातर्नमोस्तु ते । इति प्रथमां । त्रिपुरां त्रिगुणाधारां ज्ञानमार्गस्वरूपिणीं
त्रैलोक्यवंदितां देवीं त्रिपुरां पूजयाम्यहमिति द्वितीयां । कालिकां तु कलातीतां कारुण्यकपरां शि
वां । कल्याणजननीं नित्यं कल्याणीं पूजयाम्यहमिति तृतीयां । अणिमादिगुणोदारां माकारा २३

घस्तात्मिकां अनंतशक्तिसहितां कामाख्यां पूजयाम्यहमिति चतुर्थी कामचारां महामायां कामाह्वय

रूढ्रूपधारिणीं कामदां करुणाम्पदां रोहिणीं पूजयाम्यहमिति पंचमी चंडवीरां चंडमायां चंडमुंडप्रभ

ब्र ञ्जनीं [illegible] स्वरूपां विस्तृतमिमां चंडिकां पूजयाम्यहमिति षष्ठी सदानंदकरीं शांतां सर्वदेवनमस्कृतां

सर्वभूतात्मिकां देवीं शांभवीं पूजयाम्यहमिति सप्तमी सुंदरीं स्वर्णवर्णाभां सर्वसौभाग्यदायिनीं सं

तोषजननीं देवीं सुभद्रां पूजयाम्यहमित्यष्टमी दुर्गमे दुस्तरे कार्ये भयशोकविनाशिनीं पूजया गा=६

मि सदा भक्त्या दुर्गां दुर्गार्त्तिहारिणीमिति नवमी ततो ब्राह्मणवासिनीः पूजा एवं देवीकुमार्यादिपू

जा नवरात्रेऽपि प्रत्यहं कार्या इयं शतचंडी आदिन चतुर्थ्यादिद्विगुणा दिग्भ्या कार्या सहस्रचंडी दशांता

मर्प्य राह्यतिरिति ततः पूजां देव्याः स[illegible] सर्वैर्विप्रैः कृतांगन्यासाः शतं नवार्णमंत्रं जप्त्वा कवचार्गलाकी

लकानि सहस्रनामानि सप्तशतीजपं नानेरहस्यं नवार्णं च शतं जपेयुः कवचादीनां [illegible] स्याह्वतिनाह्यतिः प्र=४

एवं रात्रिचरः प्रत्येकं प्रथमे [illegible] के द्वितीये द्वे तृतीये त्रीणि चतुर्थे चत्वारि रूपाणीत्येवं जपं कुर्युः अष्टमि

जां कृत्वा प्रत्यहं दीक्षा [illegible] शानमशक्तो ह्यविशेषेऽनेन वा प्रत्यहं सहस्रं शतं वा वा ब्राह्मणान् भोज

येत् पंचमेऽष्टमे होमः तत्र नवरात्रे नवमस्यां सर्वहोमः अष्टहोमः तत्र श्लोकस्य ग्रामो कृतं त्र

त्रा
दूयो=२

धेनुयोनिमुद्रां प्रदर्श्यो ... संरक्ष्य =५

ग्रं·क
२३१

स्वचसमुच्चयः गृह्योक्तं कृत्वा आगमोक्तं कुर्यात् यथा देशकालौ स्मृत्वा ब्राह्मणद्वारा कृतस्य नवचंडीस
हस्रचंडीशतचंडीनामन्यतमस्य जपस्य संपूर्णतासिद्ध्यर्थं दशांशेन तिलमिश्रपायसद्रव्येण होमं करि
ष्ये तदंगत्वेन कुंडसंस्कारादिस्थापनादि करिष्ये मूलेन कुंडं वीक्ष्य संप्रोक्ष्य तेनैव दर्भैः संताड्य कवचे
नाभ्युक्ष्य ... समिधा मूलेन प्रागग्रा उदगग्राश्च तिस्रो लेखाः कृत्वा प्रागग्रास्तत्र वि[illegible]पाशकारावदग
ग्रास्तत्र यमचंद्रान् मध्ये च सप्त ब्रह्माणमुद्धृत्य लेखाः कृत्वाग्निं मूलेनाभिमंत्र्य कवचेनावगुंठ्य गंधाद्यैः
संपूज्य मूलेन प्रतिष्ठाप्य ओं [illegible] चित्पिंगल हन १ पच २ दह सर्वज्ञाज्ञापय स्वाहा इति ज्वालिनीमुद्रा
प्रदर्श्य ध्यानेः समिध्यासेण दर्व्यां कुर्यात् वह्नेर्गर्भाधानादिसंस्कारान्कुर्यात् प्रतिसंस्कारं मूले
नाज्येन जुहुयात् नामकर्मणि तु शतं मंगलनामाग्निं [illegible]नेति नाम कृत्वा जुहुयात् अथ षड
देहन्यासः ओं ह्रां पद्मरागायै अग्निजिह्वायै नमः लिंगे ओं [illegible] सुवर्णायै नमः हृदये ओं [illegible] भद्रलोहि
तायै शिरसि ओं [illegible] लोहितायै मुखे ओं [illegible] श्वेतायै घ्राणे ओं [illegible] धूम्रिन्यै नेत्रयोः ओं [illegible] करालै:
सर्वांगे सहस्रार्चिषे हृदयाय नमः स्वस्तिपूर्णाय शिरसे स्वाहा उत्तिष्ठपुरुषाय शिखायै धूमव्यापि
ने कवचाय हुं सप्तजिह्वाय नेत्रत्रयाय धनुर्धराय अस्त्राय अग्नये जातवेदसे नमः [illegible] अग्नये सप्त

चामुंडायै कवचाय हुं
हवी
सर्वज्ञा
२३१

ग·कुं ह्री·जा·ना·अ·चौ·
उप· स· वि·

जिह्वा[illegible]दलके अग्नये हव्यवाहनाय दलकंठां अग्नये श्वोदराय लिंगे अग्नये वैश्वानराय वा
मकंठां अग्नये कौमारतेजसे वामपार्श्वे अग्नये विश्वमुखाय प्रागंसे अग्नये देव[illegible]मुखाय पाशिवायां
ततो ग्निं ध्यात्वा परिसमूह्य परिस्तीर्य परिधीन् विस्तिष्यापरि मेखला क्रमेण ब्रह्मा विष्णुरुद्रान् यो तत्वा
गौरीं च संपूज्य वक्ष्यमाणं विचिन्त्य षट्दलेषु आग्नेयादिकोणेषु पुरतः पश्चात् मध्ये च मुखपद्मरागायेर
त्यादि· एवं तत् सप्त जिह्वाः संपूज्य आग्नेयादिकोणेषु पुरः पश्चाच्च सहस्रार्चिषे इत्यादि षडंगानि संपू
ज्याष्टदलेषु पूर्वादिदिक्षु अग्नये जातवेदसे इत्याद्यष्टमूर्तीः संपूज्य चतुरस्रे इन्द्रादीन् लोकपालान् संपूज्य
च[illegible]कुंडं तत्र समूह्य आसंवेशपात्रासादनादि स्वगृह्योक्तं कृत्वा निर्वापादिना प्र
भृतपायसं श्रपयित्वा आज्यं च संस्कृत्य [illegible]मित्यभिमंत्र्य धेनुमुद्रां दर्शयेत् ततः स्विष्टवतो नीवन्होति स्वः स
मिधोभ्याधाय वामदक्षिणयोर्विज्ञपिंगल मध्ये सुभ्रुत्वा च ध्यात्वा च दक्षिणे [illegible] मीशामाभ्यां मध्ये अग्नये स्वि
ष्टकृते च मध्ये हुत्वा पूर्वोक्त सप्त जिह्वादिमूर्तिषु ततः मंत्रैरेकैकामाज्याहुतिं हुत्वा मन्त्रैभ्यः पित्
भ्योपहेभ्यो नागेभ्यश्च हुत्वा कांचनगृहीत्वा वैश्वानर जातवेद इहावह लोहिताक्ष सर्वकर्माणि सा
धयस्वाहा वौषट् इति हुत्वा गणेशमंत्रेणाज्यं हुत्वा यात् ततः पूर्वोक्तसर्वन्यासान् कृत्वा वन्हौ पीठपूजां

ग्रंथस्यं आज्यभागान्तं स्वगृह्योक्तं कृत्वेति मुद्रितपुस्तकपाठः ॥ ५

गन्धर्वेभ्यो

नमो

धं·क २३२ कृत्वा देवीमावाह्यावाहनादिमुद्राः प्रदर्श्य षडंगं कृत्वा षोडशोपचारैः संपूज्य मूलेन शतमेकादशाधिक
मावर्त्य ज्ञात्वा नवग्रहेभ्यो लोकपालेभ्यश्च तत्तन्मंत्रैः समिदाज्यचरून् हुत्वा पायसतिलपलाशपुष्पसर्ष
पपूगीफललाजाहवींकुरयवबिल्वफलरक्तचंदनगुग्गुलद्रव्याणि· तिलमिश्रपायसमेव वा कवचा
र्गलकीलकरहस्यैः प्रतिश्लोकं हुत्वा हुतस्य जपस्य दशांशेन प्रतिश्लोकं सप्तशतीमंत्रैः एतेक्तद्रव्याणि
मिश्र तिलद्रव्याणि तिलपायसं वा जुहुयात् प्रतिश्लोकं च जुहुयात्पायसं तिलसर्पिषेति वचनात् अथवा
पायसमात्रेण वा चरूलेन च पत्रपुष्पफलैर्होमः यद्वा द्रव्यान्तरं तेनैव नवार्णेन वा जपदशांशहोमः एवं
प्रधानहोमं कृत्वा नामभिः स्रुवेणाज्यं पायसं च जुहुयात् यथा कात्यायन्यै स्वाहा दुर्गायै· कपालिन्यै· श्व रक्ताद्ये
तैकादश्यै· ह्रसिनायै· यक्षिण्यै कंकाल्यै· सर्वज्ञेश्यायै सर्वराज्ञ्यै· ब्राह्म्यै· माहेश्वर्यै· कौमार्यै· वैष्णव्यै·
वाराह्यै· ऐन्द्र्यै· नारसिंह्यै· चामुंडायै· धात्रे· विधात्रे· ईशानिधये· पद्मनिधये द्वारश्रियै वास्तुपु
रुषाय ऐरावताय· पुंडरीकाय· वामनाय· कुमुदाय· अंजनाय· पुष्पदंताय· सार्वभौमाय· सुप्र
तीकाय· दमनकाय· पुंडरीकाय· गुग्गुलाय· कुरंदकाय· ऋग्वेदाय यजुर्वेदाय· सामवेदाय· २३२
अथर्ववेदाय· नवग्रहाणां दिक्पालानां च नामभिः असितांगभैरवाय· रुरुभैरवाय· चंडभैरवाय·

ह्रीं=४ रा ओं

क्रोधभैरवाय· उन्मत्तभैरवाय· कपालभैरवाय· भीषणभैरवाय· संहारभैरवायनतः सर्वो
क्त आधारशक्त्यादिपीठदेवताभ्य आवरदेवताभ्यश्च हुत्वा स्विष्टकृतं हुत्वा ओं क्रीं माहेश्वरी वैस्णवी वारा
ही नारसिंहि ऐंद्री चामुंडा विच्चे स्विष्टकृते स्वाहेति स्विष्टकृतं हुत्वाज्यं जुहुयात् ओं क्रीं नंदायै विच्चे स्वा
हा ओं क्रीं रक्तदंतिकायै विच्चे· ओं शाकंभर्यै वि· ओं क्रीं दुर्गायै वि· ओं क्रीं भीमायै वि· ओं क्रीं भ्रामर्यै वि·
ओं क्रीं कालिकायै वि· ओं क्रीं शिवहस्त्यै वि· ओं क्रीं प्रजापतये स्वाहेति हुत्वा प्रायश्चित्तहोमांते दिक्पा
लनवग्रहविनायकादि क्षेत्रपालादिभ्यो माषभक्तबलीन् दत्वा द्वादशगृहीतेन समुद्रादूर्मिरि
ति न्नेचैन मूर्धानं दिवः पुनस्त्वादित्याः पूर्णादर्वि· समते· धामंतत्रस्येनेम् लेनच पूर्णाहुतिं हुत्वा रुद्र
मग्रये वैश्वानराय वसुरुद्रादिभ्यः प्रातकत्वे समवनेग्रये ज्ञामहालक्ष्म्ये च नमेति स्जेत् ततो व
सोर्धारां कृत्वा संस्रवान्प्राशयप्रणीताविमोकादिकर्मशेषं समाप्य मूलमंत्रेण होमदशांशेन तर्पयेत
जलेन वा तर्पयित्वा तद्दशांशेन मार्जयेत् ततः श्रेयः संपाद्याचार्यादीन् वस्त्राद्यैः संपूज्याचार्याय
नदर्थे प्रातेन तदर्थं मस्तौ वा गोमिथुनानि सुवर्णं च तद्दयं च दद्यात् ब्राह्मणे निष्कद्वयं गोद्वयं च ऋत्विग्भ्यः
प्रत्येकं निष्कत्रयं गोमिथुनं च रुद्रं समुद्रस्तवं चेंधांतदर्थं प्रातं चेंध्या तदर्थं नव चेंध्या श्रप्राक्तो सर्वेभ्यः

द

यां॰ क॰

२३३ सुवर्णं ततो दानान्याचार्यादिभ्योन्येभ्योपि दद्यात् यथा विप्रं संपूज्य कपिलां स्वर्णशृंगीं रौप्यखुरां ताम्र
पृष्ठीं कांस्यदोहनां रत्नपुच्छां सवत्सां संपूज्य॰ कपिले सर्वभूतानां पूजनीयासि रोहिणि तीर्थदेवमयी
यस्मादतः शांतिं प्रयच्छ मे इति मंत्रेण दद्यात् यथा रत्नेषु सर्वेषु सर्वे देवा व्यवस्थिताः तथा शांतिं प्र
यच्छन्तु रत्नदानेन मे सुराः इति नीलमणिं प्रथमं तावद्दाने विप्रं संपूज्य शुभं हेमपल्याणं रौप्यक
टकं गजदंतवज्रनेत्रं ताम्रमयपल्लवं क्षौमपुच्छं स्वर्णललाटपट्टकं त्वास्त्राग्रुधग्रैवेयसवस्त्रयुतं
धान्यरत्नोपरि स्थितं कृत्वा मार्तंडाय सप्तवेगाय काश्यपाय पापविमर्जनेय गजदीपाय सूर्याय त्रिवेदाय
नमो नमस्त इत्यश्वं ब्राह्मणायैकशर्मणेऽनेकशाखाध्यायिने सूर्यलोकनिवासकामनया देवीप्रीतिकामनया
वा रत्नश्रेष्ठं तुभ्यमहं संप्रददे नमः मम सुत्तकार्णीं विप्रहस्ते दत्वा मंत्रं पठेत् महार्णवे समुत्पन्न उच्चैःश्रवसपुत्रकःस्म
यावं विश्वस्वरूपत्वं नोऽहयस्त्वं भव इमं विप्र नमस्तुभ्यमस्तेन प्रतिदिनं प्रतिगृह्णीष्व विप्रेंद्र मया दत्तं सशोभनमिति
ततः सुवर्णं दक्षिणां दद्यात् ततः स्वहास्तुज्ञातपत्राणं कुरुकेष्वमेप्रभो छत्रं चत्वीनयेदत्तं ब्राह्मणाय मया सहेति
छत्रं शशांककरसंकाशं हिमडिंडीरपांडुरं प्रोत्साररयाशु हरिनंवामरास्रवलभेति चामरं सर्वसस्याश्रया भूमिर्व २२२
राहेण समुद्धृता अनंतसस्यफलदा अतः शांतिं प्रयच्छ मे इति भूमिं यथानक्रमस पापं तेभ्यं सागरजा तथा

देवीमुखं

शाय्यामममाप्यमूर्न्यास्तत्तथाजन्मनिजन्मनिश्तिशय्यां तस्मिंकरोतिभूतानामिहलोकेपरत्रच। तस्मा
त्प्रदीयतेधान्यमतः शांतिंप्रयच्छमेइतिसप्तधान्यानिचदद्यात् ततोहोमजापकर्मभ्योयथाशक्तिदक्षिणां
दद्यात् ततः सर्वकलशोदकेनसामान्ययजमानंसमुद्रज्येष्ठाइत्याद्यैः स्वशास्त्रोक्तादिपौराणैश्चाभिषिं
चेयुः ततोयजमानोनवग्रहाणांउत्तरपूजांकृत्वाविसर्ज्याचार्यहस्तेदत्वादेवींसंपूज्यवलिंदद्यात् त
त्रस्त्रियादिनाऽश्वमेषच्छागमहिषाणामन्यतरंदेयं विशेषेणतुकूष्माण्डंविल्वमिववस्त्रदेयाः यथा
देवींद्रोणपुष्पविल्वाम्रदलजातिचंपकैः संपूज्यउदङ्मुखः कर्त्ताएवंमन्त्रेणवावलिंगंधादिनाभ्यर्च्य
पशुस्त्ववलिरूपेणममभाग्यादुपास्थितः प्रणमामिततः सर्वरूपिणंवलिरूपिणं चंडिकाप्रीतिदानेन
दातरापद्विनाशनं चामुंडावलिरूपायवलेतुभ्यंनमोस्तुते यज्ञार्थेवलयः सृष्टाः स्वयमेवस्वयंभु
वा यतस्त्वांघातयाम्यद्य [illegible] तस्माद्यज्ञेवधोवधः त्वामिमंत्रप्रैंज्रींश्रीमितितत्रपुष्पंदत्वाखा र
सनात्वंचंडिकायाः सुरलोकप्रसाधकः ह्रींक्लींखड्गाय फट्इतिखड्गंमंत्रयित्वाशस्त्रंसंपूज्यॐकालि
कालिवज्रेश्वरिलोहदंडायैनमः इतिछेदयित्वाॐऐंह्रींक्लींकौशिकीरुधिरेणाप्यायतामितितित्येव देव्यैनिवेद्यशेषं
पोगृहीत्वाएतन्नामैत्ररवैयः विदार्यपापराक्षसैवं निवेद्यमाषपिष्टमयंपशुंकृत्वाखड्गेनच्छे

क्ँ कुंतय २ पूरय २ स्तनु धातु

श्रो·क दयित्वास्कंदायविशाखायचदत्वाबलिशेषंरहोभ्योहरेत् मंत्रस्तु ॐक्लींस्फुर २ कुंस २ स्तनं २ गल २ धातु २
२३४ मारय २ विद्रावय २ कंपय २ कुंपातय· ग्रस २ ॐक्लींॐॐफट २ ॐमर्दय· ॐ इति· ततः शेषेणवहिर्दिया
त् १ तत्रमंत्रः वलिंगृह्णन्त्विमेदेवाआदित्यावसवस्तथा मरुतश्चाश्विनौरुद्राः सुपर्णाः पन्नगाग्रहाः अ
सुरायातुधानाश्चपिशाचोरगराक्षसाः डाकिन्योयक्षवेतालायोगिन्यःपूतनाःशिवाः जृंभकाःसिद्ध
गंधर्वानागाविद्याधरानगाः दिक्पालालोकपालाश्चयेचविघ्नविनायकाः जगतांशांतिकर्तारोब्रह्मा
द्याश्चमहर्षयः माविघ्नंमाचमेपापंमासंतुपरिपंथिनः सौम्याभवंतुतृप्ताश्चभूतप्रेताःसुखावहा इ
ति ततश्चतिलकंकृत्वाविद्धिनीशूलिनीत्यनेन शूलेनपाहिनोदेवीतिचतुष्टयेन नमोदेव्याइतिपं
चकेनप्रार्थयेत् रूपंदेहियशोदेहिभगंभगवतिदेहिमे पुत्रान्देहिधनंदेहिसर्वान्कामांश्चदेहिमे
महिषघ्निमहामायेचामुंडेमुंडमालिनि आयुरारोग्यमैश्वर्यंदेहिदेविनमोस्तुते ततः गुह्यातिगु
ह्यगोप्त्रीत्वंगृहाणास्मत्कृतंजपं सिद्धिर्भवतुमेदेवित्वत्प्रसादान्नवंदरीतिदेव्यैनिवेद्यमूलेनपुष्प
णदेवीमुद्राप्यनामयाहृदिप्रविष्टांविभाव्यषडंगंकृत्वाअभ्यर्च्यमितिविसृज्याचार्यायदत्वामंत्रपा
ठेन त्रैलोक्यमातर्देवित्वंसर्वभूतदयान्विते दानेनानेनसंतुष्टासुप्रीतावरदाभवेति नवरात्र २३५

अध्याय:४ श्लो-२३
१ शूलेनपा
२ प्राच्यां र·
३ सौम्यानियाः
४ ...

अ·५ श्लो·८
· नमोदेव्यैम· नमःप्रकृत्यै १
रौद्रायैन· ज्योत्स्नायै २
कल्याण्यैप्र· नैर्ऋत्यैभू· शर्वा ३
दुर्गायैदुर्ग· ख्यात्यैतथैव·कृष्णा ४
अतिसौम्याति· नमो नमःप्रतिष्ठायै देव्यै ५

ग ३६

त्र विशेषः दशम्यां देवीं विसर्जयेत् मंत्रस्तु उत्तिष्ठ देवि चंडेशि शुभां पूजां प्रगृह्य च कुरुष्व मम कल्या
णमष्टाभिः शक्तिभिः सह॥ स्वस्थानं गच्छ गच्छ परस्थाने स्वस्थाने देवि चंडिके व्रज स्रोतोजलं वृद्ध्यै
स्थीयतां च जले त्विह दुर्गे देवि जगन्मातः स्वस्थानं गच्छ पूजिते संवत्सरे व्यतीते तु पुनरागमनाय
वै इमां पूजां मया याम या देवि यथाशक्त्योपपादितां रक्षार्थं त्वं समादाय व्रज स्वस्थानमुत्तममिति ज
ले प्रवाहयेत् ततोग्निं संपूज्य विसृतिष्ट स्वां गच्छेति विसृज्य सहस्रं वाऽयुतं सहस्रं शतं वा यथाशक्ति
वा विप्रान् संभोज्य स्वस्वस्त्याः प्रमादात्कुर्वतां मिति नयति ब्राह्मणानां वाचयित्वा कर्मेश्वरार्पणं कृत्वा
स्वयं भुंजीत इत्येवं पूजाहोमबल्यादिविधानं नवरात्रेपि होयं विशेषस्तु मत्कृते निर्णयसिं
धौ नवरात्रनिर्णये ज्ञेयः श्रीमन्नारायणाख्यात्समजनि विबुधो रामकृष्णाभिधानस्तत्सूनुः सर्ववि
द्यासु [illegible] णि निबुलकीकाकरतः कुंभजन्मा दृष्ट्वा नानानिबंधान्स्वरचयदतुलं ग्रंथमस्त्वाकराख्यः पि
त्रोः पादाब्जभृंगो रघुपतिपदयोः स्वश्र्वापपद्म्ये भट्टोत्र गहनार्णवकर्णधारः प्रास्त्रातेरश्रुति
स्मृतिविलेषपि समर्मसेता योत्रक्रमोस्ति विहितः कमलाकरेण प्रीतोमनास्त्वग्रहकृती बुधरामकृष्णः
इति श्रीमत्पदवाक्यप्रमाणपारीणरामेश्वरभट्टसूनुनारायणभट्टसूनुमीमांसकरामकृष्णभट्टा

मं

शां० क०
२३५

नराजकमलाकरभट्टकृतें शान्तिरत्नं समाप्तं संपूर्णम् ॥ संवत् १५०४८ भाद्रशुक्लपक्षएकादश्यां
रविवारे० जेष्ठमध्ये० शान्तिकमलाकरलिखितं संपूर्णं समाप्तम् ॥
शुभमस्तु सर्वजगताम् ॥
॥ ❀ ॥

२ा

जरगं

नं. ४६६८

पत्र
शांतिकमलाकर रत्न २३५

श्लोक ७१००

३९३३